The incident in Act IV seems to have taken place within ten days after the marriage ceremony in Act II and the honey moon scene in Act III for the presentation of red garments to the bride groom is to be made within ten days after the marriage It seems that the Dipavali festival is to be celebrated in a day or two and hence Mitravasu was called by the father to select a present to be offered to the bride groom on the Pratipal day The events in this Act take place in the morning

The events in the Fifth Act take place immediately after those in the Fourth Act The lamentation of the parents and Malayavati the return of Shankhachuda and the consequent conversation with Garuda and the hero's revival—all these will require about two hours

Thus the action of the play seems to be stretched over a period of three weeks starting about the first week of Ashvina and closing by the end of Ashvina The marriage seems to have been celebrated about the fifth day of the dark fortnight of Ashvina Though Hindu custom does not allow marriages in Ashvina the rule is not applicable if marriages take place in holy places or on mountains

All the incidents take place on the Malaya mountain, thus maintaining the unity of place essential to a drama

6 SOURCES OF THE PLAY AND THE CHANGES MADE BY THE DRAMATIST

In the prologue of the play there is a mention that the story of the drama is taken from the Vidyadhara

Jataka, but the collection of Jatakas now available does not contain one named Vidyadhara Jataka

The story of Jimutavahana is found in the Kathasaritsagara of Somadeva and Brihat Kathamanjari of Kshemendra both written in 11th century A D It occurs twice in these two books, being written in two different contexts Both these books give a shorter narration in one place and a longer one in another place The story of Nagananda follows closely the shorter narrations in both these books Both these books are the Sanskrit versions of the Brihatkatha of Gunadhya in Paishachi language, composed about the 1st century A D The original Brihatkatha is now lost and its two above mentioned Sanskrit versions are only available This original Brihatkatha was well-known during Shri Harsha's time

Neither the Kathasaritsagara nor the Brithatkathamanjari, both composed in 11th century A D can be accepted as the source of Nagananda which was composed in 7th century A D The plot of Nagananda agrees closely with the shorter versions of the story in the two above-mentioned books, but in certain places it also agrees with the story in the longer versions

It is clear, therefore, that the original source of these two books is also the source of Nagananda The Kathasaritsagara pays more attention to the narration while in the Brihatkathamanjari, the author indulges in description, thus cutting short the story-element. For practical purposes, therefore, it is better to take the Kathasaritsagara as the source of Nagananda and see where our dramatist has followed the original and where he has deviated from it.

(1) In the original, there is the mention of the birth of Jimutavahana by the favour of the kalpa tree

In the Nagananda, there is no reference to the birth of the hero

(2) In the original the hero abandons the kingdom when he hears that his kinsmen desire to invade his country *He does not want to be the cause of their* slaughter

In the Nagananda, the hero abandons the kingdom to serve his aged parents The dramatist lays stress upon the hero's devotion to his parents The hero considers the pleasure of serving the parents far superior to the enjoyment of a kingdom

(3) In the original, the story is drab and dull The hero, visiting the temple of Gauri meets Malayavati and comes to know her name and account from her girl friends and also tells his own account

In the hands of our dramatist the dry incident in the original is woven up with coloured threads of imagination and romance The hero going to the temple of Gauri, meets Malayavati as Chandrapida does Mahashveta in the Kadambari and they depart suddenly at the arrival of the Tapasa without getting a chance to know each other This gives rise to the amusing incident of the hero declining to marry his own beloved when the offer was made by Mitravasu and the misunderstanding of the heroine that the hero has been attracted to another girl

(4) In the original a divine voice prevents the heroine from committing suicide and promises that the Emperor of Vidyadharas will marry her There is no mention of the boon in the dream

Our dramatist has made this incident also more romantic by making the hero rush to the scene to rescue the heroine The change is indeed artistic and appeals to the hearts of the audience

(5) In the original, there is no reference to Vita and Cheta There is no mention of the news of the attack on the kingdom of the hero by Matanga

The entire Third Act, which affords comic relief in a pathetic play like Nagananda, is the invention of the dramatist The news of invasion is purposely introduced to bring out the selfless character of the hero

(6) There is no mention of the drawing of the portrait on the slab in the original

The dramatist introduces this change to provide an element of romance He has made the musings of the hero very charming indeed

(7) The symbol of red garments is also wanting in the original and it appears to be the invention of the dramatist so that Garuda's mistake in carrying away the hero may appear natural

(8) In the original, the crest-gem of the hero falls at the feet of Malayavati, and Jimutaketu knows of the fate of his son by his supernatural power

The dramatist makes the crest-gem fall at the feet of the hero's father whom the hero pays his last respect by thus bowing down at his feet This is again done to emphasise the hero's great devotion to his parents, as he does not think much of his love for Malayavati as against the higher duties of life In the play, Shankhachuda informs the father of the fate of his son to make the scene more pathetic

(9) In the original Garuda gives a boon to the hero which is omitted in our play.

From the above account of deviations, it will be seen that the dramatist has added the erotic and comic scenes in the play as pure pathos is not suited to a drama One cannot play too long on the suspense of the audience This also serves to make the character of the hero more noble and lofty as he forgets even his beloved, who had cast a spell over him earlier, when thinking of saving the life of another by sacrificing himself The boon given by

viz, the hero is a Vidyadhara, the heroine, a Siddha, a serpent from the nether world, a heavenly bird and Goddess Gauri The whole background is thus supernatural

The sentiment of love dominates the first three Acts, and that of Pathos prevails in last two Acts But the drama leaves an impression of a sentiment different than these two and it is the Heroic sentiment which lifts up the drama on a higher level than those treating the purely erotic or pathetic themes *The heroism of self-sacrifice to* save the life of another and of bearing the physical pain patiently produces a unique satisfaction in our mind by virtue of its noble and lofty ideal It would have been a real tragedy if the hero was not made to recover by the intervention of the supernatural and also more effective, but as the Sanskrit drama does not allow a tragedy, the drama is ended happily In the opinion of some, the 'miracle' of the revival of the hero by Gaurī is a defect for it is too sudden and unexpected for the audience to feel happy when their minds are overpowered by the tragic yet lofty self sacrifice of the hero But the setting itself is supernatural and the author is bound by convention and hence the defect may be excused

There is one serious defect in the construction of the drama that *it lacks the Unity of Action There is no* relation between the events of the first three Acts and those of the last two Acts There are references to the benevolent nature of the hero but it is not enough to give us an exact idea of what the author intends to depict later on The first three Acts refer to the love-affair between the hero and the heroine and their marriage and the last two acts refer to the sacrifice of the hero We do not pass gradually from one episode to another and the latter is not the natural development of the former If the drama had ended with the Third Act, it would have been a *light comedy The second episode appears to be patched* up with the first, for it has no major connection with the

first except that the red garments offered after marriage are used as the mark of a victim As Dr Dasgupta remarks in his 'History of Sanskrit literature', 'The one part is not made essential to the development of the other, there is thus no unity of action or balance between the two isolated parts It is difficult to reconcile also the picture of Jimutavahana's unlimited benevolence and resolution in the face of death during which he does *not even think of Malayavati with the unnecessary and* unrelated preliminary account of him as the conventional love sick hero or of Malayavati as the simple sentimental heroine It is not his love which inspires his Act of sacrifice, nor is it rendered difficult by the memory of that love, an inexplicable hiatus is therefore, felt when *one passes from one episode to another*''

Some minor defects in the play are to be noticed It appears improbable that the hero and the heroine should depart without trying to know the identity of each other at least through their friends. This seems to be done purposely to introduce the scene of 'suicide by the heroine' It also appears unjustified that Shankhachuda should think of going to pay his respects to southern Gokarna when every moment Garuda's arrival was expected This also seems to be done with an intention to give an opportunity to the hero to offer himself

One notable feature of the play is that there is a happy blending of the Hindu and Buddhist trends of thought. Hindu gods and Bodhisatva, both find a place in it near each other and Hindu tenets and Buddhist canons are both glorified in it

The hero is a *Bodhisatva* and the Nandi invokes the Buddha There are references to Buddhistic notions such as Mara, the Kleshas and the story glorifies the Budhistic ideal of self sacrifice and benevolence The heroine on the other hand is a great devotee of the Hindu Goddess Gauri and the hero is ultimately brought back to life by her favour Various Brahmanical conceptions such as the

parents of the hero taking to the life of 'Vanaprastha' in a forest and maintaining the sacred fire, the kalpa tree, the nectar possessed by Gods, and observance of the Dipavali festival are also referred to This harmonious blending of the Buddhist and Brahmanical conceptions marks a stage in the history when Buddhist trend of thought was treated with tolerance It was only later on in the 8th century that there arose a mutual hatred in the followers of these creeds In the dramas written before this period Buddhist characters find a place of respect. It is believed that Shri Harsha became a Buddhist in his later age and the drama may have been written when he was just thinking of changing his religion

One minor mistake in the story is that the dramatist refers to Gokarna as being in the vicinity of the Malaya mountain as Shankhachuda desires to bow down to the God and come back immediately to the place of slaughter The time for Garuda's arrival was drawing near and he had to return within a very short time This Gokarna (referred to as southern Gokarna to distinguish it from the one in northern India i e, Nepal) is situated on the Malabar coast, but it is separated from the Malaya mountain by nearly thirty miles But this is obviously not the fault of the play-wright as in the source of the play itself, the same faulty reference is found

8 HARSHA AS A DRAMATIST

On a detailed study of Harsha's dramas one must admit that he cannot be ranked as one of the brightest stars in the galaxy of Sanskrit dramatists, like Kalidasa or Bhavabhuti But it will be unfair to compare him with those first-rate poets who are unrivalled in their treatment of a theme or subtle analysis of human mind Harsha is an author of a different kind, 'a memorable example of a conscious literary artist'. He cannot be credited with originality in his dramas for he is indebted to Kalidasa and others for many ideas, situations and expressions in

his play The scene, for instance, of the meeting between the hero and heroine in Act I of the Nagananda is obviously suggested by a similar scene in Shakuntala. The description of the penance grove in Nagananda is also similar to the one in Shakuntala and also in Kadambari. The imprisonment of the heroine in Priyadarshika and Ratnavali seems to be suggested by the imprisonment of the heroine in Malvikagimitra Sankrityayani in Priyadarshika reminds us of the Parivrajika in Malavikagnimitra

Though Harsha is thus greatly indebted to other authors, he must be credited for ingenuity in weaving the plot 'If Kalidasa supplied the pattern, Harsha has undoubtedly improved upon it in his own way and succeeded in establishing the comedy of court-intrigue as a distinct type in Sanskrit drama The situations are prepared with practised skill, they are admirably conducted, adorned but not over-embellished, with poetical sentiment and expressions no wonder that the Ratnavali, which the masterpiece of Harsha is quoted as an example of a well-knit play 'Harsha is graceful, fluent and perspicuous; He possesses a quaint and dainty fancy and a gift of writing romantic poetry with frequent felicities of expression and musical cadence considering his contemporary and protege Bana, his style is remarkably simple and his prose is unadorned the types of conquering heroes and frail heroines he draws may not possess great appeal but they have a tender and attractive quality of romance the dramas of Harsha give the impression of a remarkably fine but even writer seldom rising far above or sinking much below a uniform level of excellence (Dr Dasgupta 'A history of Sanskrit Literature)

Harsha does not display a keen insight into human nature as does Kalidasa who infused Shakuntala with the breath of life nor can he present a picture of elevated sentiment or depth of pathos as does Bhavabuti in his Uttar-ramcharita, but he does not lack an insight into the

aims and actions of the characters. It is true that his characters cannot be called 'life-like' and acting from a spontaneous urge, for he has not identified himself with these characters He draws them with a conscious hand, supplying them with necessary qualities, as he thinks over them again and again and hence they are a picture of studied effort and elegance rather than natural portraits He however displays a considerable skill in weaving the plot as in Ratnavali though in Nagananda he has failed to weave the two episodes of love and self-sacrifice into a good combination

Though Harsha may rank very high among second-class Sanskrit dramatists, his dramas leave an impression of delightful pieces of literature on account of his charming verses and his simple and fluent style, easy to follow and his choice of melodious words Harsha indeed deserves our admiration for his taste in selecting delicate words to depict a scene of tender emotions The romantic scene in the third Act of Nagananda may be pointed out as an example of such elegance of words and style He can depict with equal grace and ease the lofty spirit of self-sacrifice as in Nagananda or the love scene in the Ratnavali His power of description is also remarkable He avoids the use of long compounds and indulges in a moderate use of figures of speech Dr Dasgupta therefore remarks 'Harsha claims place among the worthies of his period not so much by any transcendent genius but by a pleasing gift of delicate workmanship Conscious but not too studied, assured but not ingenious

१. SOME IMPORTANT TECHNICAL TERMS

नान्दी It is defined as follows (आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः नान्दीति कथ्यते ।) A Sanskrit drama begins with one or two benedictory verses, usually addressed to the favourite deity of the author Further, the नान्दी is expected to contain a suggestion of the plot of the drama (see Notes at the end) It is recited by सूत्रधार.

Thus the second verse in our नान्दी may be suggestive of the fact that the hero remained firm in his resolve to sacrifice his own self, not considering his parents or the newly wedded beloved and that even the Gods appreciated his spirit of self sacrifice and the Siddhas and Vidyadharas bowed down their heads in respect

प्रस्तावना or Prologue—The नान्दी is followed by प्रस्तावना. The सूत्रधार, पारिपार्श्वक and नटी figure in the प्रस्तावना. Sometimes only the सूत्रधार and नटी carry out the work as seen in our play Through the प्रस्तावना we get an information about the dramatist and the drama concerned Generally the सूत्रधार or नटी sing a song descriptive of the season before the commencement of the drama proper The prelude ends by hinting directly or indirectly at the character who is to enter the stage immediately afterwards

In the prologue of the नागानन्द, सूत्रधार and नटी, through their conversation, inform us that the drama नागानन्द, written by king Shri Harsha, was to be enacted during the Indra festival to be celebrated that day The drama was based on a novel theme connected with the Vidyadhara Jataka The सूत्रधार considers himself fortunate that they are enacting the drama of a clever poet like Harsha, that the actors were skilled and the theme of Bodhisatva, universally attractive At the end, the सूत्रधार leaves 'to go to the forest to serve his aged parents like Jimutavahana' thus hinting at the entrance of the hero

विष्कंभक and प्रवेशक

A dramatist presents before the audience only certain incidents which have a dramatic significance There remain certain facts which must be informed to the audience to make them follow the plot These facts are supplied through the short introductory scenes called प्रवेशक or विष्कम्भक These interludes are also justified on the grounds of propriety and economy. Incidents such as wars, massacres etc , are not allowed to

be represented on the stage. But the knowledge of these incidents is necessary for understanding the story properly and hence this information is given to the audience through the conversation between (1) lower or (2) middling and lower characters.

The interludes give us an information of the incidents not represented on the stage or those supposed to have taken place during the interval.

A प्रवेशक is defined as follows.

(यन्नीचैः केवलं पात्रैः भाविभूतार्थसूचनम् ।
अङ्कयोरुभयोर्मध्ये स विज्ञेयः प्रवेशकः ॥)

—सुधाकरे

A प्रवेशक is a short scene which comes in between two acts. It can never come in the beginning of the first act. It indicates the events in the past and suggests the future incidents through the conversation of the lower characters only.

A विष्कंभक —

(वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षेपार्थस्तु विष्कंभो मध्यपात्रप्रयोजितः ॥)

—दशरूपके.

A विष्कंभक is a short scene which summarises the events in the past and indicates future incidents through the conversation of the middling characters.

विष्कंभक is of two types. शुद्ध (pure) and मिश्र (mixed.) In the शुद्ध variety only medium characters take part while in the मिश्र variety, both middling and lower characters participate. It naturally follows that शुद्ध विष्कंभक is in Sanskrit only while मिश्र विष्कंभक has both Sanskrit and Prakrit.

The distinction between a विष्कंभक and प्रवेशक is this—(१) विष्कंभक may come even at the beginning of the first act. A प्रवेशक can never come at the beginning of the first act, (2) In प्रवेशक only lower characters take

The विदूषक is नागानन्द conforms to all these traits of his character But as the drama treats the love-theme in the first three accts only, the विदूषक appears only in the first part of the drama The dramatist uses him to supply comic relief in the IIIrd act of the play As the last two acts depict a lofty theme full of pathos, the Vidushaka is absent there

रस or Sentiment—According to Bharata, there are eight रस, शृङ्गार, हास्य, करुण, रौद्र, वीर, भयानक, बीभत्स and अद्भुत From among these either शृगार, वीर or करुण should be the prevailing sentiment and others should help the development of the principal sentiment. In this drama, शृङ्गार is predominant in the first three acts while करुण in the last two acts The sentiment that dominates the whole drama is that of वीर i e the noble and lofty self-sacrifice of the hero and his patient suffering to save another from danger

भरतवाक्य—A Sanskrit play ends with benediction or prayer for plant of food, timely rain and general prosperity All actors in the play assemble on the stage to sing it

In a Sanskrit drama, death of the hero is never exhibited This accounts for the absence of tragedies Our author is bound by this convention and hence the introduction of Gauri at the end to revive the hero and make the end happy

DRAMATIS PERSONAE

Men

Jimutavahana—The hero and Vidyadhara Prince.

Jimutaketu—The father of hero.

Vidushaka (Atreya)—The friend of the hero.

Mitravasu—Son of the Siddha king Vishvavasu and brother of *the heroine.*

Vita and Cheta—Attendants in the palace of Vishvavasu.

Kanchukin—Superintendent of the harem.

Shankhachuda—A serpent, intended to be the victim of Garuda.

Garuda—King of birds and enemy of the serpents.

Women

Malayavati—The heroine and daughter of the Siddha king Vishvavasu.

Devi—The mother of the hero.

Vriddha—The mother of Shankhachuda.

Chaturika, *Manoharika*, *Navamalika* — Maids of Malayavati.

Gauri—The Goddess.

श्री हर्षदेव विरचितं

नागानन्दम् ।

THE NĀGĀNANDAM OF HARSHA - DEVA

अथ

नागानन्दम् ।

प्रथमोऽङ्कः ।

ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षण
पश्यानङ्गशरातुर जनमिमं त्रातापि नो रक्षसि ।
मिथ्या कारुणिकोऽसि निर्घृणतरस्त्वत्तः कुतोऽन्य पुमा
न्सेर्ष्यं मारवधूभिरित्यभिहितो बुद्धो जिनः पातु वः ॥ १ ॥

१ स क २ व र ३ बोधौ

यत्पदाम्भाजमाश्रित्य जडोपि सुमहान् क्षणात् ।
प्रकृष्टा धियमाप्नोति स दत्त शिवदोस्तु मे ॥
तत्कृपामवलम्ब्यैव नागानन्दाख्यनाटके ।
उत्सहे सरला टीका विधातु न स्वपाटवात् ॥

अथ तत्रभवान् कविवर श्रीहर्षदेव काव्यस्य यशआदिसम्पादनद्वारा श्रेय साधनता विभावयस्तत्रापि—(न तज्ज्ञान न तच्छिल्प न सा विद्या न ता कला । नासौ नयो न तत्कर्म नाटके यन्न दृश्यते ॥) इति दृश्यकाव्याङ्गभूतस्य नाटकस्यैव महिमवर्णनात् नागानन्द नाम नाटक निर्मित्सु—(प्रत्याहारादिकान्यङ्गान्यस्य भूयासि यद्यपि । तथाप्यवश्य कर्तव्या नान्दी विघ्नोपशान्तये ॥) इति वचनात्तदङ्गतया रङ्ग विघ्नोपशान्तये—(यत्राष्टभिर्द्वादशभिरष्टादशभिरेव वा । द्वाविंशत्यापदैर्वापि सा नान्दी परिकीर्तिता ॥) इति वचनानुरोधादादौ अष्टपदा मङ्गलस्वरूपा नान्दीं रचयति—ध्यानेत्यादिश्लोकद्वयेन । ध्यानेति । ध्यान एकतानेन मनसा स्मरण ध्यानमुच्यते । इत्युक्तलक्षणमेव व्याज मिष तमुपेत्याश्रित्य का चिन्तयसि । ध्रुव ध्यानमिषेण त्व कामपि प्रिया ध्यायस्तिष्ठसीति भाव । क्षण चक्षु उन्मील्य उद्घाट्य अनङ्ग शरातुर नास्त्यङ्गमस्यासौ अनङ्ग काम तस्य शरा ।(उन्मादनस्तापनश्च शोषण स्तम्भनस्तथा । संमोहनश्च कामस्य पञ्च बाणा प्रकीर्तिता ॥) इत्युक्ता । तं आतुर

NAGANANDAM

ACT I

Whom are you thinking of, assuming the pretence of meditation? Open your eyes for a moment and look at these persons (i e us) distressed by the arrows of Cupid (i e the bodiless one) Though (called) a Protector, you do not protect (us) You are falsely (called) kind How can any other person be more merciless than you? May the victorious Buddha, thus jealously addressed by the women of Māra, protect you! (1) and moreover,

---

आर्तं इमं जनं अस्मानित्यर्थः। पश्य। नेत्रयोरनुन्मीलनादाहुः—त्रातापि नो न रक्षसि। अतः मिथ्या कारुणिकोसि। करुणा शीलमस्य कारुणिकः। शीलमिति ठक्। त्वयि करुणा नास्तीत्यर्थः। त्वत्तः त्वद् अतिशयेन निर्घृणः निर्दयः निर्घृणतरः अन्यः पुमान् कुतः। नास्ति कोपीत्यर्थः। मारप्रधाना वध्वः मारवध्वः कामिन्यः। मारपुत्र्य इति केचित्। मदनो मन्मथो मारः इत्यमरः। ताभिः इत्थमुक्तप्रकारेण ईर्ष्यया सहितं यथा तथा सेर्ष्यं सासूय अभिहितः उक्तः बुद्धं ज्ञानमस्यास्तीति बुद्धः। ज्ञानी। अर्शआदिभ्योऽच्। जिनः वः सामाजिकान् पातु। यद्वा जयति संसार शत्रून् वा इति जिनः बुद्धः वः पातु इति योज्यम्। अत्र सत्यपि विकारहेतौ ध्यानान्न चलित इति गम्यमानत्वाद्विशेषोक्तिर्व्यङ्ग्या। सति हेतौ फलाभावो विशेषोक्तिर्निगद्यते। इति लक्षणात्। बुद्धो जिन इति पुनरुक्तवदाभासोऽपि। तदुक्तम्—आपाततो यदर्थस्य पौनरुक्त्यावभासनम्। पुनरुक्तवदाभासः स भिन्नाकारशब्दगः॥ इति। शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥ अष्टपदा नान्दीं निर्वाहयन्नाह। कामेनेति। यः ध्यायन् ध्याननिष्ठः न चलितः समाधेः चित्तैकाग्र्याच्च प्रच्युत इति विस्मयाद् दृष्टः। स मुनिषु इन्द्र इव मुनीन्द्रः बुद्धः वः पातु इत्यन्वयः। कैरित्याकाङ्क्षायामाह। चापमाकृष्य कामेन। प्रहारार्थमवसर प्रतीक्षमाणेन किंत्वलभमानेनातो विस्मयः इति भावः। हताः पटव उच्चैःशब्दायमानाः पटहा यैस्ते आवल्गन्ति उद्धतं चरन्ति नृत्यन्ति वा तच्छीलाश्च। हताः पटवः पटहा यस्मिन्कर्मणि तथा वल्गिन इति वा। तैः। मारवीरैः मारसहायैर्यर्थवादप्रभृतिभिर्देशभिः। भ्रुवोर्भङ्गः भ्रूभङ्गः। भ्रूभङ्गश्च उत्कम्पश्च जृम्भा च स्मितं च इत्येतैः शृङ्गारविकारैः ललिते। पाठान्तरे 'चलिते चञ्चले। दृशौ यस्य तेन। ललितवता इति पाठे—सुकुमाराङ्गविन्यासो मसृणो ललितं भवेद्। इति तद्वता। अयं पाठः साधीयान्। दिवि भवो दिव्यः यो नारीजनस्तेन। प्रह्व नम्रमुत्तमाङ्गं शिरः येषां तैः सिद्धैः देवयोनिविशेषैः। पुलकाः अस्य सञ्जाताः तत्पुलकितं रोमाञ्चितं। तदस्य

अपि च ।

कामेनाकृष्य चापं हतपटुपटहावल्गिभिर्मारवीरै-
भ्रूभङ्गोत्कम्पजृम्भास्मितललितदृशा दिव्यनारीजनेन ।
सिद्धैः प्रह्वोत्तमाङ्गैः पुलकितवपुषा विस्मयाद्वासवेन
ध्यायन्यो योगपीठादचलित इति वः पातु दृष्टो मुनीन्द्रः ॥ २ ॥

नान्द्यन्ते ।

१ उत्क्षेप. २ वता. ३ ध्यायन्बोधेरवासाव.

सजातमिति तारकादिभ्य इतच् । इति इतच् । वपुः यस्य तेन । अत्र सत्यां विचलनकारणे न चलित इति विशेषोक्तिरलंकारः । एकस्य मुनीन्द्रस्यानेकधोल्लेखादुल्लेखालंकारोपि । तदुक्तं ।(क्वचिद्भेदाद्ग्रहीतॄणां विषयाणां तथा क्वचित् एकस्यानेकधोल्लेखो यः स उल्लेख इष्यते ॥) इति । स्रग्धरा वृत्तम् ॥ २ ।(अत्र प्रथमपद्येन मलयवतीकृतं नायकस्य निर्भर्त्सनं द्वितीयपद्येन कामपाशबद्धस्यापि जीमूतवाहनस्य स्वप्राणव्ययेनापि तार्क्ष्यात् शङ्खचूडरक्षणं विद्याधरपतिभिः कृता प्रणतिश्चेति मनाक्कार्यार्थः सूचितः ॥) नान्द्यन्ते इति । नन्दन्ति देवता अस्यास्तस्मान्नान्दीति कीर्तिता । इति निरुक्तायाः—(आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति कीर्तिता ॥) इत्युक्तलक्षणायाश्च नान्द्या अन्ते । नान्दीं पठित्वेत्यर्थः । सूत्रधारो वदतीति शेषः । यद्यपि सूत्रधारः पठेदेनां मध्यमं स्वरमाश्रितः । इति भरतवचनात्सूत्रधार एव नान्दीं पठति तथापि सूत्रधार इति प्रथमं नोक्तं मङ्गलार्थं देवतानमस्कारादेरेवादौ कर्तव्यत्वात् । नाट्योपकरणादीनि सूत्रमित्यभिधीयते । सूत्रं धारयतीत्यस्मात्सूत्रधारो मतो बुधैः ॥ इति सूत्रधारलक्षणम् । अलमिति । किंचित्प्रयोजनं नास्ति । अतिविस्तरः नाट्याङ्गानां पठनरूपः तेनालं स मास्तु इत्यर्थः । इन्द्रस्य उत्सवः महः इन्द्रोत्सवः शक्रध्वजोत्थानसंज्ञः । तस्मिंस्तत्समये । मह उद्धव उत्सव इत्यमरः । अस्मिन्नुत्सवे इन्द्रध्वजः किल राजभिः ऐश्वर्यमभ्युदयार्थं च पूज्यते । तदुक्तं भविष्योत्तरे—एवं यः कुरुते यात्रामिन्द्रकेतोर्युधिष्ठिर । पर्जन्यः कामवर्षी स्यात्तस्य राज्ये न संशयः ॥ इति । चतुरस्रं ध्वजाकारं राजद्वारे प्रतिष्ठितम् । आहुः शक्रध्वजं नाम पौरलोकसुखावहम् ॥ गजाकारं चतुस्तम्भं पुरद्वारे प्रतिष्ठितम् । पौराः कुर्वन्ति शरदि पुरुहूतमहोत्सवम् ॥ अत्रेयं पौराणिकी कथा—पुरा किल दानवपरिभूता इन्द्रपुरःसरा देवाः क्षीरसागरशायिनं भगवन्तं शरणं ययुः । तदा विष्णुर्दैत्यकुलसंहाराय दिव्यमभाव विविधं ध्वजमेकं महेन्द्राय प्रादात् । तत्प्रभावादिन्द्रो दानवान्सर्वाञ्जघान । इन्द्रदत्तं च तं ध्वजं पूजयित्वा वसुर्नाम चेदिनृपः परां सिद्धिं

FIRST ACT

May the Lord of Sages protect you—the Lord, who was beheld with wonder, as he (remained) meditating undisturbed in the posture of Yoga (i e concentration), by Kama, with his drawn bow, by the heroes of Mara, dancing as the deep-sounding drums were beaten by the heavenly nymphs, casting lovely glances (accompanied) with the knitting of the eye-brows, tremor, yawning and smile, by the Siddhas, with their heads bent (with respect), and by Indra, whose body was full of horripilation

(At the end of the Nandi)

लेभे । ततः प्रीतो महेन्द्रो व्यादिदेश – प्रीतो महेन मघवा प्राहैव ये नृपाः करिष्यन्ति । वसुवद्वसुमन्तस्ते भुवि सिद्धाशा भविष्यन्ति ॥ मुदिताः प्रजाश्च तेषां भयरोगविवर्जिता । प्रभूतान्नाः । इत्यादि ॥ बहुमानेन सह यथा स्यात्तथा सबहुमानम् । नाना दिश येषां ते नानादिशः । नानादिशः देशा नानादिग्देशाः तेभ्याः आगतेन । पादौ पद्मे इव पादपद्मे ते उपजीवतीति तेन । न विद्यते पूर्वं यस्य तदपूर्वं अद्भुतं वस्तु इतिवृत्त रचना च ताभ्यामलंकृतम् । यद्वा अपूर्वा या वस्तुरचना तया अलंकृतम् । विद्याधरचक्रवर्तिना प्रतिबद्धं सम्बद्ध विद्याधरचक्रवर्तिप्रतिबद्धं । स यत्र नायक इत्यर्थः । नागाना आनन्दः नागानन्दः । स एव प्रतिपाद्यप्रतिपादकयोरभेदोपचारात् नागानन्दं नाटकम् । सोऽस्मिन्वर्ण्यते इति वा । नाटकवाचितया नागानन्दशब्दस्य नपुंसकत्वम् । श्रोत्रयोः परम्परा श्रोत्रपरम्परा तया । जनश्रुत्येत्यर्थः । प्रयोगत रङ्गभूमौ अभिनीतमित्यर्थः । सकलजनाना हृदयानि आह्लादयितु शील यस्य सकलजनहृदयाह्लादी तस्य । यथावत् साधुः प्रयोगस्तेन । यथावदिति भिन्नं वा पदम् । नेपथ्यरचना रङ्गभूमिविन्यासं नाट्योचितवेषविधान वा । नेपथ्य तु प्रसाधने । रङ्गभूमौ वेषभेदे । इति हैमः । आवर्जितानि आकृष्टानि । सकलाश्च ते सामाजिकाः सभ्याश्च तेषा मनासि । समाज समवयन्ति इति सामाजिकाः । समवायान्समवैति इति ठक् । श्रीहर्ष इति । निपुणः नाटकरचनापटुरित्यर्थः । एषा पुरत स्थिता परिषीदन्त्यस्यामिति परिषद् सभापि गुणान् गृह्णाति तच्छीला । गुणपक्षपातिनीत्यर्थः । सिद्धाना राजा सिद्धराजः विद्याधरेश्वरो जीमूतवाहनः । बोधिसत्वचरितमिति पाठे बोधिसत्वा बुद्धविशेषास्तेषां चरितम् । बोधिसत्वा जीमूतवाहनादय इति मालतीमाधवटीकाया (अ. १०) जगद्धरः । नाट्ये अभिनयकर्मणि दक्षाः निष्णाताः । एतेषा मध्ये एकैकमपि वस्तु इहास्या रङ्गभूमौ वाञ्छित अभीष्ट यत्फल तस्य प्राप्तिः लाभ वाञ्छितफलप्राप्तिः तस्याः पदं स्थानम् । हेतुरिति यावत् । मम भाग्य भाग्य तस्य उपचयःप्रकर्षात् समुदितः एकत्र मिलित इत्यर्थः । अथ सर्वः गुणाना गण किं पुनः वाञ्छितफलप्राप्तेः पद इति किमु वक्तव्यम् । अत्र वाञ्छितफलप्राप्तिहेतुभूतानां वाक्यगतत्वात्काव्यलिङ्गमलङ्कारः । तदुक्त – हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते इति । शार्दूलविक्रीडित वृत्तम् ॥ ३ ॥

१ **सूत्रधारः**— अलमतिविस्तरेण । अद्याहमिन्द्रोत्सवे सबहुमानमाकार्य नानादिग्देशागतेन, राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः। यथा—"अस्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनाऽलङ्कृतं विद्याधरजातकप्रतिनिबद्धं **नागानन्दं** नाम नाटकं कृतमस्माभि: श्रोत्रपरंपरया श्रुतं न तु प्रयोगतो दृष्टम्। तत्तस्यैव राज्ञः सकलजनहृदयाह्लादिनो बहुमानादस्मासु चानुग्रहबुद्ध्या यथावत्प्रयोगेण त्वया नाटयितव्यमिति । तद्यावदिदानीं नेपथ्यरचनां कृत्वा यथाभिलषितं संपादयामि । (परिक्रम्यावलोक्य च ।) आवर्जितानि च सकलसामाजिकानां मनांसीति मे निश्चयः । यतः

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च सिद्धराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥ ३ ॥

तद्यावदहं गृहं गत्वा गृहिणीमाहूय संगीतकमनुतिष्ठामि । (परिक्रम्य नेपथ्याभिमुखमवलोक्य च ।) इदमस्मद्गृहम् । यावत्प्रविशामि । (प्रविश्य ।) आर्ये इतस्तावत् ।

१ आहूय. २ चक्रवर्तिप्रतिबद्ध. ३ च मया. ४ लोकानन्दि. ५ बोधिसत्त्व. ६ अस्मात्पर इदं पद्यं त्रि. पुस्तके—

द्विजपरिजनबन्धुहिते मद्भवनतटाकहंसि मृदुशीले ।
परपुरुषचन्द्रकमलिन्यार्ये कार्यादितस्तावत् ॥

संगीतकं संगीतमेव संगीतकम् । स्वार्थे कः । नृत्तं गीतं तथा वाद्यं त्रयं संगीतमुच्यते । इति संगीतरत्नाकरे । आर्ये मान्ये । वाच्यौ नटीसूत्रधारावार्यनाम्ना परस्परम् । इति साहित्यदर्पणे । आर्यस्य श्वशुरस्य पुत्रः आर्यपुत्रः । एवं स्त्रीभिः पतिर्वाच्यः । सर्व-स्त्रीभिः पतिर्वाच्य आर्यपुत्रेति यौवने । इति भरतोक्ते । तातः अत्र श्वशुरः । आर्यया श्वश्र्वा । स्थाविरभावाद्वार्धक्याज्जातः निर्वेदः वैराग्यमिति यावद् यस्य स तथोक्तः । कुटुम्बस्य भारः कुटुम्बभारस्तस्योद्वहने कुटुम्बभरणे इत्यर्थः योग्यः समर्थः । हृदये आरोप्य मनसि कृत्वा । निर्वेदेन स्वविषयकखेदेन सहितं यथा स्यात्तथा । गुर्वोः मातापित्रोः चरणास्तेषां परिचर्या सेवा तस्याः सुखम् । पित्रोरिति । अहमपि क्रमागतं पितामहपितृक्रमायातमैश्वर्यं विभूतिं त्यक्त्वा पित्रोः मातापित्रोः शुश्रूषामुपासनां । वरिवस्या तु शुश्रूषा परिचर्याप्युपासना । इत्यमरः । विधातुं कर्तुं एष जीमूतवाहनो

FIRST ACT

STAGE-MANAGER—Enough of prolixity To-day during this festival of Indra, having been invited with great honour by the host of kings who have come from countries in various quarters and who are dependent on the lotus-like feet of king Sri Harshadeva, I was told thus—"We have learnt by hear-say, that a drama named Nagananda, adorned with an original arrangement of the plot, and dealing with the story of the Vidyadhara-Jataka, is written by our Shri Harshadeva, but we have not seen it enacted on the stage. So, out of respect for that same king, who gladdens the hearts of all people, and with a desire to favour us, it should be enacted by you properly on the stage Now, therefore, I shall first make arrangements about the dress etc, and do as desired (*Moving about and looking*)

I am sure I have won the hearts of the entire audience For, Shri Harsa is a clever poet, this assembly also can appreciate merit, the story of the king of Siddhas (Jimutavahana) is quite attractive to the people, and we are skilled in acting Each one of these things is a source for attaining the desired result How much more, then, when a combination of all merits has come up by the excess of my good luck?

I shall, then, just go home and having called my wife, start the music (*walking about and looking towards the curtain*). Here is our house I shall just enter

(*Entering*) Noble lady, come here

यथा जीमूतवाहनः अस्य नाटकस्य नायकः स इव वने यामि यास्यामि । श्रौती उपमा अलंकारः । अनुष्टुप् छन्दः ॥ ४ ॥

प्रस्तावना । प्रस्तूयते सूच्यते प्रकृतमनया इति । प्रपूर्वात्स्तौतेर्ण्यन्तात् ण्यासश्रन्थो युच् इति युच् । 'नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥ चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि' सा । इत्युक्तलक्षणा । अस्या अन्ते सूत्रधारस्य निर्गमः । यदुक्तं—एषामन्यतमेनार्थं पात्रं वाक्षिप्य सूत्रभृत् । प्रस्तावनान्ते निर्गच्छेत् ततो वस्तु प्रपञ्चयेत् ॥ इति । प्रयोगातिशयाभिधा प्रस्तावनैषा । तदुक्तं दशरूपके एषोऽयमित्युपक्षेपात्सूत्रधारप्रयोगतः । पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः ॥ इति ॥ ततः प्रविशतीति । नयति रसं परिपोषमिति नायकः । णीधातोर्ण्वुल् । एतल्लक्षणं दशरूपके—नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः । रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा । बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः । शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ॥ इति । स च धीरललितः धीरशान्तः धीरोदात्तः धीरोद्धतश्चेति चतुर्धा भिन्नः । तत्राय धीरोदात्तो नायकः । तल्लक्षणं दशरूपके—महासत्त्वोऽतिगम्भीरः

प्रविश्य

२ **नटी** — (सास्रम्) आर्य इयमस्मि मन्दभाग्या । आज्ञापयत्वार्यपुत्रः को नियोगोऽनुष्ठीयतामिति ।

३ **सूत्र०** — (विलोक्य ।) आर्ये नागानन्दे नाटयितव्ये किमिदमकारणमेव रुद्यते ।

४ **नटी** — आर्य कथं न रोदिष्यामि । यतस्तावत्तात आर्यया सह स्थविरभावजातनिर्वेदः कुटुम्बभारोद्वहनयोग्य इदानीं त्वमित्यारोप्य हृदये तपोवनं गतः ।

५ **सूत्र०** — (सनिर्वेदम् ।) अये कथं मां परित्यज्य तपोवनं यातौ पितरौ । तत्किमिदानीं युज्यते कर्तुम् । (विचिन्त्य ।) अथवा कथमहं गुरुचरणपरिचर्यासुखं परित्यज्य गृहे तिष्ठामि ।

पित्रोर्विधातुं शुश्रूषां त्यक्त्वैश्वर्यं क्रमागतम् ।
वनं याम्यहमप्येष यथा जीमूतवाहनः ॥ ४ ॥

इति निष्क्रान्तौ ।

॥ प्रस्तावना ॥

(ततः प्रविशति नायको विदूषकश्च ।)

६ **नाय०** — (सनिर्वेदम् ।) सखे आत्रेय

रागस्यास्पदमित्यवैमि न हि मे ध्वंसीति न प्रत्ययः
कृत्याकृत्यविचारणासु विमुखं को वा न वेत्ति क्षितौ ।
एवं निन्द्यमपीदमिन्द्रियवशं प्रीत्यै भवेद्यौवनं
भक्त्या याति यदीत्थमेव पितरौ शुश्रूषमाणस्य मे ॥ ५ ॥

१ मामपि. २ जीमूतवाहनः. ३ रोगस्य. ४ ईप्सितफलप्राप्त्यै.

क्षमावानविकत्थनः । स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः ॥ इति । अथ चानुकू[illegible] कलहरनिर्विदूषकः स्यात् [illegible] । तत्सम्बुद्धिः । इत्थानि [illegible] तृष्णाया आस्पदं स्थानमि अवैमि जानामि । अपि च इदं ध्वंसि विनश्वरमिति मे प्रत्ययः निश्चयपूर्वं श नेति न । अपि तु अस्त्येव । नञ्द्वयं प्रकृतार्थदार्ढ्यं गमयति । तथा च इदं कृत्यं अकृत्यं च कृत्याकृत्ये तयोः विचारणासु विवेकेषु विमुखं कर्तव्याकर्तव्यविचारपरा मुखमिति क्षितौ को वा न वेत्ति न जानाति । सर्व एव वेत्तीत्यर्थः । इदमिन्द्रियव

FIRST ACT

(*Entering*) NATI—(*with tears*) Sir, here I am, the unfortunate one. Let my lord command what order I should carry out.

S-MANAGER—(*looking*) Noble lady, when we are to *stage the play Nagananda, how is it you are weeping without* any cause?

NATI—My lord, how should I not weep, when the father-in-law disgusted (with the world) due to old age, has gone to the penance grove with the mother-in-law, thinking in his mind that you are now fit to bear the burden of the family?

S-MANAGER—Ah! Have my parents gone to the penance-grove, leaving me? What is proper for me to do now? (*Thinking*) *or* rather, how can I stay at home, forgoing the happiness of serving at the feet of the elders? I too, shall go to the forest, giving up the hereditary wealth, to render service to my parents, like this Jimutavahana here (4).

(*Both go out*)

End of Prologue

(*Then enter the Hero and Vidusaka*)

Hero—(*with dejection*) Friend *Atreya*,

I know that youth is the abode of passion. Not that I have no conviction, that it is perishable, who, indeed, on earth, does not know that it is opposed to the considerations of what should be or should not be done? Although this youth is thus fit to be blamed, because it is the slave of senses, yet it can be pleasing, if it passes in this same manner, while I am serving my parents with devotion (5)

इन्द्रियाधीन यौवन। निन्द्य जुगुप्सार्हमपि। एव मे प्रीत्यै परितोषाय भवेत् यदि इत्थमनेन प्रकारेण पितरौ भक्त्या शुश्रूषमाणस्य सेवमानस्य। श्रुधातो सन्नन्तात् ज्ञाश्रुस्मृदृशा सनः इति आत्मनेपदत्वाच्छानच्। याति यायात्। ईप्सितफलप्राप्त्यै इति पाठे ईप्सितमभीष्टं। आप्लृधातोः सन्नन्तात् क्तप्रत्ययः। आप्ज्ञप्यृधामीत् इति ईत्। लोपोऽभ्यासस्येत्यभ्यासलोपः। यत्फल मोक्षप्राप्तिरूपं तस्य प्राप्त्यै इत्यर्थः। अत्र चतुर्थपादस्य प्रीत्यै भवेदित्यस्य हेतुत्वात्काव्यलिंगमलकारः। अनुज्ञेति केचित्। शार्दूलविक्रीडित वृत्तम्॥ ५॥ निर्विण्णः जातनिर्वेदः। एतावन्त काल—कालाध्वनोरत्यन्तसयोगे द्वितीया। जीवन्तौ मृतौ इव जीवन्मृतौ तयोः। गुरुचरणाना शुश्रूषा उपासना तस्या निर्बन्धः आग्रहस्तस्मात्। इच्छया यथाकाम परिभोगः विषयानुभवस्तेन रमणीयम्। विदूषकवचनं निराकुर्वन् पितृचरणशुश्रूषैव परमसुखायेति प्रतिपादयन्नाह—तिष्ठन्निति। यथा पितु पुरः अग्रे भुवि न तु आसने। विनयनम्रः तिष्ठन् भाति। नर इति शेषः। तथा सिंहासने तिष्ठन् उच्चैरासीन इत्यर्थः। भाति किं नैव भातीत्यर्थः। तातस्य चरणौ सवाहयत मृदु मर्दयतः तस्य यत्सुख भवति तद्राज्यतः राज्यात्।

७ विदू० — (सरोषम् ।) भो वयस्य न निर्विण्ण एव त्वमेतावन्तं कालमेतयोर्जीवन्मृतयोर्वृद्धयोः कृते इदमीदृशं वनवासदुःखमनुभवन् । तत्प्रसीद इदानीमपि तावद्गुरुचरणशुश्रूषानिर्बन्धान्निवृत्येच्छाभोगरमणीयं राज्यसुखमनुभूयताम् ।

८ नाय० — वयस्य न सम्यगभिहितं त्वया । कुतः

तिष्ठन्भाति पितुः पुरो भुवि यथा सिंहासने किं तथा
यत्संवाहयतः सुखं हि चरणौ तातस्य किं राज्यतः ।
किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरो-
रायासः खलु राज्यमुज्झितगुरोस्तत्रास्ति कश्चिद्गुणः ॥ ६ ॥

९ विदू० — (आत्मगतम् ।) अहो एतस्य गुरुचरणशुश्रूषानुरागः । (विचिन्त्य ।) भवतु तदेतदपि तावद्भणिष्यामि । (प्रकाशम्) भो वयस्य न खल्वहं राज्यसुखमेव केवलमुद्दिश्यैवं भणामि । अन्यदपि ते करणीयमस्त्येव ।

१० नाय० — (सस्मितम् ।) वयस्य ननु कृतमेव यत्करणीयम् । पश्य तावत् ।

न्याय्ये वर्त्मनि योजिताः प्रकृतयः सन्तः सुखं स्थापिता,
नीतो बन्धुजनस्तथाऽऽत्मसमतां राज्ये च रक्षा कृता ।
दत्तो दत्तमनोरथाधिकफलः कल्पद्रुमोऽप्यर्थिने,
किं कर्तव्यमतः परं वद सखे यत्ते स्थितं चेतसि ॥ ७ ॥

११ विदू० — भो वयस्य अत्यन्तसाहसिको मतङ्गहतकस्ते प्रतिपक्षः । तस्मिंश्च समासन्नस्थिते प्रधानामात्यसमधिष्ठितमपि त्वया विना राज्यं सुस्थितमिति न मे प्रतिभाति ।

१ किं सवा० सुखानि चरणौ तातस्य किं राजकम्. २ राजके. ३ किं भुक्ते भुवनत्रये तदधिक.भुक्तोज्झित यद्गुरोः । ४ तत्रास्ति. ५ मुर्स०.

राजके इति पाठे राजके नृपतिगणे । राजकमधितिष्ठत इत्यर्थः । अस्ति किम् । नैवेत्यर्थः । भुवनानां त्रयं भुवनत्रयं तस्मिन् भुवनत्रये भुक्ते असौ धृतिः परितुष्टिः । धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु । इति विश्वः । अस्ति किं या गुरोः पितुः भुक्तोज्झिते आदौ भुक्तं पश्चादुज्झितं भुक्तोज्झितं तस्मिन् भक्ष्यादिद्रव्ये भुक्ते धृतिः भवति । नेत्यर्थः । उज्झिता. त्यक्तः गुरुर्येन तस्य उज्झितगुरोः पुरुषस्य राज्ये. राज्ये भारः कर्म वा । राज्योपभोग इत्यर्थः । आयासः क्लेश एव । तत्र गुणविषये

... friend, are you not indeed tired ... of a forest-life all this time, for ... sons, who, though living, are as good as dead? Therefore, be pleased Now at least, giving up the obstinacy of serving your parents, may you enjoy the pleasure of royalty, so charming as it gives enjoyment at one's will

HERO—Friend, you have not spoken well For,

Does one shine so well on a throne as when standing on the ground in front of one's father? Is there the same pleasure from ruling over the kingdom (*Rajyatah*) as one feels when shampooing the feet of the father? Is there that satisfaction in enjoying the three worlds, as is found in partaking of what is left over by the father after enjoyment? A kingdom is really a trouble to one, who has left off his parents Is there any merit in it? (6)

VIDU—*(To himself)* Oh, his fondness for serving the feet of elders! *(Reflecting)* Well, I will just say this! *(Aloud)* O Friend, indeed, I don't say this with reference to the pleasures of kingdom only Something else also has to be done by you

HERO—*(smiling)*—Friend, surely I have done all that is to be done Look here,

The subjects have been put to the right path, the good people have been well-placed, (my) relatives have been made equal to me, and security in the kingdom is effected The Kalpa tree even, which gives more benefits than are sought, has been given to the needy Tell me, friend, what more is yet to be done than this? (Tell me) what is in your mind? (7)

VIDU—Friend, that wretched Matanga, who is very daring, is your enemy When he is near, it seems to me, that the kingdom is not quite safe without you, although entrusted to your chief minister

---

राज्ये कश्चिद्गुणः अस्ति । न कोपीत्यर्थः । अप्रस्तुतप्रशंसालङ्कारः । उपमानभूतेभ्यः सिंहासनाधिष्ठानादिभ्यः पितृसमीपावस्थानादीनामाधिक्यकथनात् व्यतिरेकालंकारः । तदुक्तं—उपमानाद्यदन्यस्य व्यतिरेकः [आधिक्यं] स एव सः । इति । इति केचित् । शार्दूलविक्रीडितं वृत्तम् ॥ ६ ॥

आत्मगतं स्वगतम् । आश्राव्य खलु यद्वस्तु तदिह स्वगतं मतम् । गुरुचरणशुश्रूषायामनुरागः दृढं प्रेम । प्रकाशं—सर्वश्राव्यं प्रकाशं स्यात् इति तल्लक्षणम् । सस्मितमिति स्मितं मन्दहासः । तदुक्तं—ईषद्विकासिनयनं स्मितं स्यात्स्पन्दिताधरम् । इति । न्याय्य इति । प्रकृतयः प्रजाः । न्यायादनपेतं न्याय्यं तस्मिन् ।

१२ **नाय०** — किं मतङ्गो राज्यं हरिष्यतीति शङ्कसे ।

१३ **विदू०** — अथ किम् ।

१४ **नाय०** — यद्येवं ततः किम् । ननु स्वशरीरतः प्रभृति परार्थमेव सर्वं मया रिरक्ष्यते । यत्तु स्वयं न दीयते तत्तातानुरोधात् । तत्किमनेन राज्यवस्तुना चिन्तितेन । वरं ताताज्ञैवानुष्ठिता । आज्ञप्तश्चास्मि तातेन । यथा वत्स जीमूतवाहन बहुदिवसपरिभोगैर्दूरीकृतसमित्कुशकुसुममुपभुक्तमूलफलकन्दनीवारप्रायमिदं स्थानं वर्तते । तदितो मलयपर्वतं गत्वा तस्मिन्निवासयोग्यं किञ्चिदाश्रमपदं निरूपयेति । तदेहि मलयपर्वतमेव गच्छावः ।

१५ **विदू०** — यद्भवानाज्ञापयति ।

(इत्युभौ परिक्रामतः ।)

१६ **विदू०** — (अग्रतोऽवलोक्य ।) भो वयस्य पश्य पश्य एष खलु सरसघनचन्दनवनोत्सङ्गपरिमलनलग्नबहलामोदो [illegible] निरन्तरनिर्झरोच्छलित- [illegible] पवनैः ।

१. शरीरात्. २ पाल्यते. ३ अवस्तुना. ४ परिभोगेण स्वीकृत०;—दूरीकृतं भुक्तमुक्त०

धर्मपथ्यर्थन्यायादनपेते इति यत् । वर्त्मनि योजिताः प्रवर्तिताः । बन्धुजनः बन्धुसमूहः आत्मसमतां स्वतुल्यतां नीतः । रक्षा रक्षणम् । दत्तं मनोरथादिच्छाया अपि अधिकं फलं येन स दत्तमनोरथाधिकफलः । कल्पः संकल्पितोऽर्थः । तस्य द्रुमः । जन्यजनकभावसम्बन्धे षष्ठी । कल्पद्रुमः पूर्वैः सम्पादितोपि अर्थिने अर्थिभ्य इत्यर्थः । जातावेकवचनम् । दत्तः । तदुक्तं कथासरित्सागरे—जीमूतवाहनो गत्वा कल्पद्रुममुवाच तम् ।......भद्रं ते मम दत्तोसि लोकायार्थार्थिने मया । इति । (येनास्मात्तोऽभिमतसिद्धिः सोपि कल्पद्रुमो दत्तोतोऽस्य नादेयं किंचिदिति दानवीरत्वमस्य सूचितम् ।) हे सखे अतः उक्तकृत्येभ्यः परं किं कर्तव्यमवशिष्टं यत्ते चेतसि स्थितं तद्वद । अन्यथा करणीयमस्त्येवेति न ब्रूयाः । शार्दूलविक्रीडितं वृत्तम् ॥ ७ ॥

साहसं करोतीति साहसिकः । ठक् । मतङ्गश्चासौ हतकश्च मतङ्गहतकः । हतकशब्दोयं कुत्सायां प्रयुज्यते नाटकादिषु । कुत्सितानि कुत्सनैरिति समासः । प्रकाण्डाद्याः प्रशंसायामाक्षेपे हतकः स्मृतः । इति हलायुधः । प्रधानाश्च ते अमात्याश्च तैः समधिष्ठितमनेधिष्ठितमपि । सुस्थितं सुरक्षितम् । न दीयते राज्यमिति शेषः । तातानुरोधात्तातचित्तरक्षणेच्छयेत्यर्थः । बहुदिवसेत्यादि । बहून् दिवसान्

HERO—Are you afraid that Matanga would snatch away my kingdom?

VIDU—Certainly

HERO—If so, what does it matter? Everything including my own body is preserved by me for the sake of others only That I do not give it (i e the kingdom etc) away, is out of regard for my father Therefore, what is the use of thinking about this insignificant thing viz, the kingdom? It is better to obey my father's order He has thus ordered me—"My son, Jimutavahana, this place is far removed from sacred fuel, Kusa grass and flowers, because of its being used (by us) for many days, and the fruits, bulbous roots and wild rice are practically used up Therefore, going to the Malaya Mountain, find out an hermitage fit for residence" Hence, come along, we shall go direct to the Malaya Mountain

VIDU—As you command (*Both pace about*)

VIDU—(*Looking in front*) Just see, my friend, this Malaya breeze, full of thick fragrance due to its close contact with the tops of the forests of juicy and dense sandal trees, and which is wafting showers of cool spray, rising up from the streams *shattered by dashing against the rugged banks, thrills my* friend (with horripilation), removing the fatigue of the journey, like an embrace of the beloved, eager for the first union

---

परिभोगः तेन दूरीकृत प्रतिदिनव्ययाद् दुरवापमित्यर्थः । समिधश्च कुशा दर्भाश्च कुसुमानि च तेषा समाहारः समित्कुशकुसुमं यस्मिन् । उपभुक्तानि मूलानि फलानि कन्दाः नीवाराश्च बाहुल्येन यस्मिन् तत्तथोक्तम् । निरूपय अवलोकय । इति आज्ञापितोऽस्मीति सम्बन्ध । एष इति । एष खलु मलयमारुतः प्रियवयस्य रोमाञ्चयतीत्यन्वयः । कीदृश इत्याह—सरसेति । सरसाः स्निग्धा घना सान्द्रा चन्दना. तेषा वन तस्योत्सङ्गस्तस्य परिमलन संघर्षः तेन लग्नः ससक्त बहुलः परिमल विमर्दोत्थगन्धः यस्य स तथोक्त । विमर्दोत्थे परिमलो गन्धे जनमनोहरे । इत्यमरः । अनेनास्य सुगन्धित्व सूचितम् । विषमतटे उपहता. अतएव जर्जरिता विदीर्णा ये निर्झरा. पर्वततटात्पतन्तो वारिप्रवाहा. तेभ्य उच्छलिता उत्पतिता ये शिशिराः शीकरा अम्बुकणास्तेषामासार वहतीति तच्छील. । अनेनास्य शीतलत्व ध्वनितम् । *प्रथमः यः सङ्गमोत्कण्ठितप्रियाया कण्ठग्रहः स इव* । रोमाञ्चयति हर्षरोमाञ्चिन करोति । रमणीयक मनोहरत्वम् । रमणीयस्य भावो रामणीयकम् । योपधाद्गुरूपोत्तमाद् वुञ् इति वुञ् । माद्यदिति. । माद्यन्त. मदोत्कटा. कुञ्जरास्तेषा गण्डाः करटा भित्तय इव तासा कषणे घर्षणे । भग्ना मथितत्वचः अतएव स्रवन्तः क्षरद्रसाः चन्दना यस्मिन् स तथोक्त. । जलानि निधीयन्ते अस्मिन्निति जलनिधि समुद्र. । कर्मण्यधिकरणे च इति धाधातो अधिकरणे किः ।

१७ **नाय०**—(विलोक्य ।) अये प्राप्ता एव वयं मलयपर्वतम् (समन्तादवलोक्य) अहो रामणीयकमस्य । तथा हि

माद्यत्कुञ्जरगण्डभित्तिकषणैर्भग्नस्रवच्चन्दनः
क्रन्दत्कन्दरगह्वरो जलनिधेरास्फालितो वीचिभिः ।
पादालक्तकरक्तमौक्तिकशिलः सिद्धाङ्गनानां गतै-
र्दृष्टोऽयं मलयाचलः किमपि मे चेतः करोत्युत्सुकम् ॥ ८ ॥

१ दिग्गज. २ मौक्तिक. ३ सेव्यः. ४ उत्सुखम्.

तदेहि । अत्रारुह्य निवासयोग्यं किञ्चिदाश्रमपदं निरूपयावः ।

१८ **विदू०**—एवं कुर्वः । (अग्रतः स्थित्वा ।) एतु भवान् ।

(आरोहणं नाट्यतः ।)

१९ **नाय०**—(दक्षिणाक्षिस्पन्दनं सूचयित्वा विमृश्य ।) सखे

दक्षिणं स्पन्दते चक्षुः फलाकाङ्क्षा न मे क्वचित् ।
न च मिथ्या मुनिवचः कथयिष्यति किं न्विदम् ॥ ९ ॥

२० **विदू०**—भो वयस्य आसन्नं ते प्रियं निवेदयति ।

२१ **नाय०**—एवं नाम यथाह भवान् ।

२२ **विदू०**—(विलोक्य ।) भो वयस्य प्रेक्षस्व प्रेक्षस्व । एतत्खलु सविशेषघनस्निग्धपादपविशोभितं सुरभिहविर्गन्धमिश्रोद्दामधूमनिर्गममनुद्विग्नसुखनिषण्णशावकगणं तपोवनमिव लक्ष्यते ।

२३ **नाय०**—सम्यगुपलक्षितम् । तपोवनमेवैतत् । तथा हि

वासोऽर्थं दययैव नातिपृथवः कृत्तास्तरूणां त्वचो
भग्नानेकजरत्कमण्डलुनभःस्वच्छं पयो नैर्झरम् ।
दृश्यन्ते त्रुटितोज्झिताश्च बटुभिर्मौञ्ज्यः क्वचिन्मेखला
नित्याकर्णनया शुकेन च पदं साम्नामिदं पठ्यते ॥ १० ॥

१ निमित्तं सूचयन्. २ फलकाङ्क्षा. ३ दययैव. ४ भग्नालक्ष्य; भग्नालक्ष्य... त्रुटजः, त्रुटितः. ५ गीयते.

तस्य वीचिभिः ऊर्मिभिः आस्फालितः आहतः अतएव क्रन्दन्ति प्रतिशब्दायमानानि कन्दराणि दर्यः गह्वराणि गुहाश्च यस्य स तथा । तथा च सिद्धाङ्गनानां सिद्धा देवयोनिविशेषास्तेषामङ्गनानां स्त्रीणाम् । प्रशस्तान्यङ्गान्यासामिति अङ्गनाः ।

HERO—(*Looking*)—Oh! We have, indeed, reached the Malaya mountain! (*Looking around*) Oh, the beauty of this (mountain)! For,

This Malaya mountain, with sandal trees exuding their juice, being crushed by the rubbings of the broad (wall-like) temples of rutting elephants, with valleys and caves resounding as it is lashed by the waves of the ocean, with pearly rocks reddened with the lac-dye of the feet of the Siddha women moving about, makes my heart somehow very much eager when it is seen (by me) (8)

So come along, having ascended, we shall find out a hermitage, fit for dwelling

VIDU—Let us do so (*Stepping in front*) May you come along (*Both gesticulate climbing*)

HERO—(*Indicating the throbbing of the right eye and thinking*) Friend,

(My) right eye throbs, (Yet) I have no desire to gain anything But the words of the sages cannot be false What, then, does it indicate? (9)

VIDU—It indicates that something good is near at hand

HERO—It may indeed be, as you say

VIDU—(*Looking*) O Friend, see see This appears to be a penance-grove, adorned with very thick and glossy trees, giving out a thick mass of smoke mixed with the sweet smell of oblations, and with herds of young deer sitting fearlessly at ease

HERO—Well observed! This is, indeed, a penance-grove For

The bark of the trees is cut off for garments, in thin strips, as if out of pity, the water of the stream, clear as sky, contains many old and broken water-pots, the *girdles of Munja* grass, snapped and (hence) thrown away by the boys are seen in some places, and here a song of the *Sama*-Veda is recited by parrots due to constant hearing. (10).

अज्ञातकल्याणे इति नः। गतैः गमनैः पादानां पादसम्बन्धी यः अलक्तकः लाक्षारागस्तेन रक्ता लोहितीकृताः मौक्तिकशिलाः धवलशिलाः यत्र स तथोक्तः। मौलिकशिलेतिपाठे मौलिरेव मौलिकः। स्वार्थे कन्। तत्रस्थाः शिलाः मौलिकशिलाः। एतेनास्य पुण्यभूमित्वं ध्वनितम्। एवभूतोऽयं मलयाचलः दृष्टः सन् मे चेतः किमपि अत्यन्तम्। अनिर्वचनीयं यथा तथा इति वा। उत्सुकं सोत्कण्ठं करोति। अत्र स्वरूपवर्णनात्स्वभावोक्तिरलंकारः। शार्दूलविक्रीडितं वृत्तम्॥ ८॥ निरूपयावः अवधानमन्विष्यावः।

तदेहि । प्रविश्यावलोकयावः ।

(प्रवेशं नाटयतः ।)

२४ **नाय०** — (सविस्मयं विलोक्य ।) (अहो नु खलु मुदितमुनिजनप्रविचार्यमाणसन्दिग्धवेदवाक्यविस्तरस्य पठद्वटुजनच्छिद्यमानार्द्रसमिधस्तापसकुमारिकापूर्यमाणबालवृक्षालवालस्य प्रशान्तरमणीयता तपोवनस्य । इह हि)

मधुरमिव वदन्ति स्वागतं भृङ्गशब्दै-
र्नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः ।
मम ददत इवार्घ्यं पुष्पवृष्टिं किरन्तः
कथमतिथिसपर्यां शिक्षिताः शाखिनोऽपि ॥ ११ ।

१ सर्वतो. २ बहुबद्ध, आच्छिद्य. ३ वदन्तः. ४ नादैः. ५ ननु.

दक्षिणं च तदक्षि च तस्य स्पन्दनं स्फुरणम् । अस्य इष्टजनप्राप्तिसूचकत्वादाह **दक्षिणमिति** । मम दक्षिणं चक्षुः स्पन्दते । अस्य फलस्य स्त्रीलाभरूपस्य आकाङ्क्षा अपेक्षा मे कचिन्नास्ति । तदुक्तं वसन्तराजीये—पुंसा सदा दक्षिणदेहभागे स्त्रीणां तु वामावयवे प्रजातः । स्पन्दं फलानि प्रदिशत्यवश्यं निहन्त्यनुक्तांगविपर्ययेण ॥ इति । अस्य समानार्थः श्लोकांशः शाकुन्तले—शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य । इति । मुनिवचः दक्षिणाङ्गस्फुरणं पुंसः शुभफलदमित्येव रूपं च मिथ्या असत्यं न । अतः इदं । किन्नु इति वितर्के । कथयिष्यति । अस्य किं फलं भवेदित्यर्थः । पथ्यावक्त्रं वृत्तम् ॥ ९ ॥ आसन्न समीपवर्ति । **सविशेषेति** । सविशेष समधिकं घनाः सान्द्राः स्निग्धाः सरसाश्च ते पादपाः चन्दनादिवृक्षाश्च तैः विशोभितं विभूषितम् । हविषा गन्धः हविर्गन्धः । सुरभिश्चासौ हविर्गन्धश्च सुरभिहविर्गन्धः । सुरभीणि हवींषि तेषां गन्ध इति वा । तेन मिश्रः मिश्रितः उद्दाम उत्कटः धूमस्य निर्गमो यत्र । अनुद्विग्नः अनुत्पन्नत्रासः अत एव सुखं यथा तथा निषण्णः शावकगणः मृगादिशिशुसमूहः यत्र तत् । तपसे वनं तपोवनम् । **वासोर्थमिति** । वासोर्थे वल्कलार्थं तरूणां त्वचः दयया इव नातिपृथवः अल्पाल्पमित्यर्थः कृत्ताः । तथा च नभः अम्बरमिव स्वच्छं निर्झरस्य इदं नैर्झरं पयः । भग्ना अनेके जरन्तो जीर्णाः कमण्डल्वो यत्र तथा वर्तते इति शेषः । क्वचित् कुत्रचित्प्रदेशे बटुभिः तापसबालकैः त्रुटिताः छिन्ना अतएव पश्चादुज्झितास्त्यक्ताः मौञ्ज्यः मुञ्जनिर्मिता मेखलाः कटिसूत्राणि च दृश्यन्ते । तथा च नित्याकर्णनया नित्यश्रवणहेतुना शुकेन कीरेण इदं श्रूयमाणं साम्ना सामवेदसम्बन्धि पदं स्वरविशेषः पठ्यते गीयते । स्वभावोक्तिरलंकारः । शार्दूलविक्रीडितं

Come then, we shall enter and see

(*Both gesticulate entering*)

HERO (*Looking with joy*) O the serene charm of this penance-grove, where many a Vedic passage of doubtful meaning is discussed by the cheerful sages, where fresh sacrificial sticks are cut by pupils reciting the Vedas, and where the basins of young plants are filled (with water) by the hermit-girls Here indeed,

The trees, as if, speak sweet (words of) welcome by the humming of the bees, they offer salutation, as it were, with heads bent down under the weight of the fruits, scattering a *shower of flowers, they seem to offer an 'arghya'* (i e the customary materials of worship) to me How is it, that even the trees are taught how to honour the guest! (11)

वृत्तम् ॥ १० ॥ अहो नु खलु इति विस्मये । मुदितैः मुनिजनैः प्रकर्षेण विचार्यमाणः पर्यालोच्यमानः सन्दिग्धानामनिश्चितार्थाना वेदवाक्याना विस्तरो यस्मिंस्तस्य । पठन् वेदमित्यर्थः । यः बटुजनः तेन छिद्यमाना आर्द्राः अत्यन्तसरसाः समिधः यत्र तत्तथोक्तं तस्य । तापसकुमारिकाभिः आपूर्यमाणा जलेन आध्रियमाणा बालवृक्षाणां आसमन्ताज्जलल्वानालान्ति गृह्णन्तीत्यालवालाः यस्मिन् तत्तथोक्तं तस्य । प्रशान्तं च तद्रमणीयं च तस्य भावः प्रशान्तरमणीयता । भावे तल् । **मधुरमिवेति** । शाखिनो वृक्षा अपि कथं अतिथीनां सपर्या पूजा अतिथिसपर्या ता शिक्षिताः । अतति गच्छति इति अतिथिः । ऋतन्यञ्जि इति इथिन् । अतिथिर्ना गृहागते इत्यमरः । न विद्यते तिथिः आगमने नियतो दिवसो यस्येति वा । तथा च यमः--तिथिपर्वोत्सवाः सर्वे येन त्यक्ता महात्मना । सोऽतिथिः सर्वभूताना शेषानभ्यागतान्विदुः ॥ तदेव विशदयति--अमी शाखिनः भृङ्गशब्दैः भ्रमरगुञ्जितैः मधुर यथा तथा स्वागत वदन्तीव । फलैः नम्राणि फलनम्राणि तैः शिरोभिः नतिं नमस्कृतिं कुर्वते इव । तथा च पुष्पवृष्टिं किरन्तः मम अर्घाय इदमर्घ्यं । पादार्घाभ्या च इति यत् । ददते इव । उत्प्रेक्षालङ्कारः । सभावनमथोत्प्रेक्षा प्रकृतस्य समेन (उपमानेन) यद् । इति तल्लक्षणम् । "किंच शाखिषु शिक्षितविनयविनम्रपुरुषव्यवहारसमारोपात्समासोक्तिर्ध्वन्यते । इत्यलंकारेण अलङ्कारध्वनिः ।" इति जीवानन्दाः । मालिनी वृत्तम् ॥ ११ ॥ निर्वृतिः समाधानं सुखमिति यावत् । भो वयस्येति । किं निष्कारणमेते हरिणाः किमपि आकर्णयन्त इव लक्ष्यन्ते । कीदृशाः--ईषत् किंचित् वलिता परावर्तिता कन्धरा ग्रीवा यैस्ते तथोक्ताः । निश्चलेभ्यः चर्वणाद्यभावात्स्थिरेभ्यः मुखेभ्यः निःसरन्तः दरदलिताः ईषच्चर्विता दर्भकवला दर्भग्रासा येषा ते तथा । पुनः कीदृशाः । समुन्नमितः दत्तः गीते अवहितः एकः कर्णः येषा ते तथा । तथा च सुखेन समीलिते निमिलिते लोचने येषा ते तथोक्ताः । स्थानेति । एते व्याजिह्मानि विवर्तित-

तन्निवासयोग्यमिदं तपोवनम्। मन्ये भविष्यतीह वसतामस्माकं परा निर्वृतिः।

२५ विदू०—(इतस्ततो विलोक्य।) भो वयस्य किं नु खल्वेते ईषद्वलितकन्धरा निश्चलमुखनिःसरदर्धदलितदर्भकवला. समुन्नमितदत्तैककर्णा. सुखनिमीलितलोचना आकर्णयन्त इव हरिणा लक्ष्यन्ते।

२६ नाय०—(कर्णं दत्त्वा।) सखे सम्यगुपलक्षितम्। तथा हि

स्थानप्राप्त्या दधानं प्रकटितगमकां मन्द्रतारव्यवस्थां
निर्ह्रादिन्यां विपञ्च्या मिलितमलिरुतेनेव तन्त्रीस्वनेन।
एते दन्तान्तरालस्थिततृणकवलच्छेदशब्दं नियम्य
व्याजिह्माङ्गाः कुरङ्गाः स्फुटललितपदं गीतमाकर्णयन्ति॥ १२॥

२७ विदू०—भो वयस्य कः पुनरेष तपोवने गायति।

२८ नाय०—यथा कोमलाङ्गुलितलाभिहन्यमाना नातिस्फुटं क्वणन्ति तन्त्र्यः काकलीप्रधानं च गीयते तथा तर्कयामि (अङ्गुल्यग्रेणाग्रतो निर्दिशन्।) अस्मिन् देवतायतने देवतामाराधयन्ती काचिद्दिव्ययोषिद्वीणयतीति।

२९ विदू०—भो वयस्य एह्यावामप्येतद्देवतायतनं प्रेक्षावहे।

३० नाय०—साधूक्तं भवता। वन्द्याः खलु देवताः। (उपसर्पन्सहसा स्थित्वा) वयस्य कदाचिदद्दर्शनार्होऽयं स्त्रीजनो भविष्यति। तदनेन तावत्तमालगुल्मकेनान्तरितौ देवतादर्शनावसरं प्रतिपालयावः।

१ स्थानप्राप्तावधानं प्रकटितसमनाम°; °गमकं. २ मध्य,. व्यवस्थाः. ३ °दिन्यां विपञ्च्या. ४ स्वरेण. ५ यथैताः. ६ तथा काक°गीयते इति.

मुखत्वाद्वक्राणि अङ्गानि येषां ते व्याजिह्माङ्गाः कुरङ्गाः हरिणाः दन्तानामन्तराले मध्ये स्थिताः ये तृणकवलाः घासग्रासाः तेषां छेदः चर्वणमित्यर्थस्तस्य शब्दं नियम्य निरुध्य। चर्वणव्यापारविरता इत्यर्थः। गीतमाकर्णयन्ति। कीदृशं गीतमित्याह—स्थानानां स्वरोत्पत्तिस्थानानामुरःकण्ठशिरसां प्राप्त्या प्रकटिताः गमकाः स्वरविशेषा यस्या ताम्। मन्द्रो गम्भीरध्वनिः तारः उच्चैःस्वरस्तयोः व्यवस्थां दधानम्। तदुक्तं-मूर्ध्वं हृदयमन्येः कपालफलकादधः। प्रागमवरणस्थानं स्थानमित्यभिधीयते। उरः कण्ठः शिरश्चेति तत्पुनस्त्रिविधं मतम्॥ नृणामुरसि मध्यस्थो द्वाविंशतिविधो ध्वनिः। स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते॥ गमकः स्वश्रुतिस्थानस्थानो श्रुत्यन्तराश्रयात्। स्वरो यो मूर्च्छनामेति गमकः स इहोच्यते॥ स्वश्रुतिस्थानसम्भूतां

Hence this penance-grove is fit for residence I feel that living here, we shall have (great) happiness

VIDU—(*Looking here and there*) Friend, what, indeed, is it that these deer seem to be listening, with their necks slightly turned, with mouthfuls of half-chewed Darbha grass dropping down from their motionless mouths, with one ear raised up and attentive, and with their eyes closed (in joy)?

HERO (*Listening*)—Friend well observed! For,

These deer, bending their bodies and stopping the noise of chewing the morsels of grass lying between their teeth are listening to a song, whose words are distinct and sweet, which consists of the arrangement of the low and high notes, so that the [illegible]
per place [illegible]
of sweet [illegible]

(12)

VIDU—Friend, who, indeed, can be singing in this penance grove?

HERO—*Since the strings, being struck by the tips of delicate fingers do not sound very distinctly and, since the song consists mainly of 'Kakali' notes, I think.* (*Pointing in front* with the tips of the fingers) here, in this temple, some divine woman, worshipping the deity, is singing to the accompaniment of the lute

VIDU—Come, friend, we too shall see the temple

HERO—Well said! Surely Gods must be saluted (*Approaching and stopping suddenly*), Friend, perhaps there is a lady, not fit to be seen (by us) So, concealed behind this thicket of Tamala trees, we shall await the opportunity to see the deity

---

छाया श्रुत्यन्तराश्रयाम्। स्वरो यद्गमयेद्गीते गमकोसौ निरूपितः। इति तद्भिदस्ति॰। कम्पित स्फुरितो लीनो भिन्न स्थविर एव च। आहतान्दोलितौ चेति गमकाः सप्त कीर्तिता॰॥ एतेषा लक्षणानि—द्रुतत्रिगुणवेगेन यत्र स्यात्स्वरकम्पनम्। कम्पन नाम गमकमाहुर्गमककोविदा॰॥ द्रुतद्विगुणवेगेन विद्यात्स्फुरणसंनिभम्। गमक स्फुरिताख्येयमभ्यधाद्गायकोत्तम॥ मसृणो द्रुतमानेन स्वरो यत्र विधीयते। लीनाभिधानो गमको गायकैरुक्त उत्तमः॥ स्थानत्रितयसस्पर्शी त्यक्तखेदघनस्वरः। त्रिभिन्ननामकोसौस्याद्गमको हृदयगम॥ ध्वनिर्डमरुकस्येव लघोरास्फोटने द्रुतम्। यादृक् तदनुकारी स्याद्गमकस्त्रिरूपाभिध.॥ स्वरस्य लघुमानेन यस्मिन्नान्दोलन भवेत्। आन्दोलिताभिधानोसौ गमको लक्षित स्फुटम्॥ आमन्द स्वरमाहत्य स्वरो यत्र निवर्तते। आहताख्यः स गमको गीतज्ञै संप्रकीर्तित॥ कम्पात्कम्पितमीरित स्फुरितमित्युक्त द्रुतावर्तनात्। निस्थाने चलनात्त्रिभिन्नमुदित लीन च मासृण्यत॥

(तथा कुरुतः।)

(ततः प्रविशति भूमावुपविष्टा वीणां वादयन्ती मलयवती चेटी च।)

३१ नायि०—(संस्कृतमाश्रित्य गायति।)

उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि।
अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन॥ १३॥

३२ नायकः—(कर्णं दत्वा।) वयस्य अहो गीतमहो वादितम्। तथा हि।

व्यक्तिर्व्यञ्जनधातुना दशविधेनाप्यत्र लब्धामुना
विस्पष्टो द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधायं लयः।
गोपुच्छप्रमुखाः क्रमेण यतयस्तिस्रोऽपि संपादिता-
स्तत्त्वौघानुगताश्च वाद्यविधयः सम्यक्त्रयो दर्शिताः॥ १४॥

१ सुस्ति°. २ वाद्यम्. ३ गोपुच्छ. ४ सदर्शिताः; सवादिताः. ५ स्वातोद्यानु°. ६ याम.

तोयावर्तवदामनन्ति तिरुपं डोलावदान्दोलितं। तोयाधानवदाहतं च गमकान्स्वर-स्वराणां विदुः॥ इति। निर्ह्रादिन्या मधुरं ध्वनन्त्याः विपञ्च्याः वीणायाः तन्त्रीणां स्वनेन ध्वनिना अलिरुतेन भ्रमरगुञ्जारवेणेव मिलितम्। स्फुटानि ललितानि च पदानि यस्य तत्। उपमानुप्राणिता स्वभावोक्तिरलङ्कारः। स्रग्धरा वृत्तम्॥ १२॥ यथा यस्मात् कोमलैः अङ्गुलितलैः अभिहन्यमानाः तन्त्र्यः नातिपरिस्फुटं नातिस्पष्टं यथा तथा क्वणन्ति ध्वनन्ति। काकली सूक्ष्मः मधुरास्फुटः ध्वनिः। काकली तु कले सूक्ष्मे इत्यमरः। प्रधानं यस्मिंस्तद्यथा तथा गीयते च। उपवीणयति वीणया उप समीपे गायति। सत्यापपाशरूपवीणातूल इत्यादिना (पा. ३।१।२५) वीणाशब्दादुपगानार्थे णिच्प्रत्ययः। सहसा अतर्कितम्। अनर्हः अयोग्यः। न च पश्येत्परस्त्रियमिति शास्त्रादस्याः कदाचिदन्यस्त्रीभावादिति भावः। तमालानां गुल्मः गुच्छः तेन अन्तरितौ तिरस्कृतौ अदृश्यमानौ इत्यर्थः। अवसरमुपसर्पणयोग्यं कालम्। संस्कृतमाश्रित्येति—मलयवत्या देवयोनित्वादत्र संस्कृताश्रयणम्। उत्फुल्लेति। हे उत्फुल्लं विकसितं यत्कमलं तस्य केसरेषु किञ्जल्केषु यः परागः रेणुः तद्वत् गौरा द्युतिः कान्तिर्यस्याः तथोक्ते। भगवति सकलैश्वर्यसम्पन्ने। अनेनाभिवाञ्छितदानसामर्थ्यं ध्वनितम्। गौरि। युष्मत्प्रसादेन भवत्या अनुग्रहेण मे मम हि अभिवाञ्छितमभिलषितं प्रसिध्यतु निश्चयेन सिद्धं भवतु। अत्र हिशब्दः निरर्थकः। उत्फुल्लेति च विशेषणमपुष्टम्। उद्धृतश्चायं श्लोकः उक्तदोषद्वयस्योदाहरणत्वेन काव्यप्रकाशकृता। आर्याछन्दः॥ १३॥ अहो इत्याश्चर्ये।

(Both do so)

(Enter Malayavatı, seated on the ground and playıng on the lute and the Maıd).

HEROINE—*(Sıngs ın Sanskrıt).*

Oh, Goddess Gaurı, havıng a pale whıte lustre lıke the pollen of the filaments of a full-blown lotus' May my desıre be fulfilled by your favour' (13)

HERO—*(Lıstenıng)* Frıend, how wonderful ıs the song' How beautıful ıs the playıng on the lute '

In thıs song, dıstınctness (of the varıous notes) ıs obtaıned by these ten methods of playıng (on the lute), the threefold tımıng, marked by the quıck, ıntermedıate and slow (varıetıes), ıs very clear, the three pauses, such as the '*Gopuchha*' are attended to ın due order, and the three modes of playıng the ınstrument—the '*Tatva*' '*Ogha*' and '*Anugata*' are properly exhıbıted (14).

अनेन गीतस्य तदनुगुणस्य वादनस्य च आश्चर्यसीमावस्थानं द्योतितम् । व्यक्तिरिति । अमुना श्रोत्रपथमवतीर्णेन । दश विधा यस्य स दशविधः तेन दशप्रकारेणापि। व्यज्यन्ते विशेषा अनेन इति व्यञ्जनः सः चासौ धातुः सङ्गीतावयवविशेषः च तेन व्यञ्जनधातुना । अत्र अस्मिन्वादने व्यक्तिः स्पष्टता लब्धा । अय श्रूयमाणः लयः गीतवाद्यादीना कालक्रियासाम्यं द्रुतमध्यलम्बितभेदेन परिच्छिन्नः पृथक्पृथगवभासमानः त्रिधा उत्तरीत्या त्रिविधः विस्पष्टः स्फुटीकृतः । गोपुच्छा पूर्वं लघुः मध्ये दीर्घा पुनः क्रमेण लघुता प्राप्ता एवं गोपुच्छस्वरूपा। तत्प्रमुखः तत्पुरःसराः तिस्रो यतयः समास्रोतोवहागोपुच्छा संज्ञा यतयो विश्रान्तयोपि सम्पादिताः प्रकटिताः । सवादिता इति पाठः साधीयान् । तत्वौघानुगताः एतत्सञ्ज्ञकाः त्रयो वाद्यविधयः सम्यक् यथाशास्त्र दर्शिताः । विलम्बितं द्रुतं मध्यं तत्वमोघोघनं क्रमात् । तालः कालक्रियामानं लयः साम्यमथास्त्रियाम् ॥ इत्यमरः । अत्र शिवरामटीका यथा—धातु. वाद्यवादनविधिः । तदुक्त—विस्तारः करणश्चैव अविद्धो व्यञ्जनस्तथा । चत्वारो धातवो ज्ञेया वादित्रकरणाश्रयाः ॥ इति । तत्र व्यञ्जनधातुर्वीणावादनप्रकारः । तथा चोक्त मुनिना—इति दशविधः प्रयोज्यो वीणाया व्यञ्जनो धातुः । इति । दशविध्य चोक्त—व्यञ्जनधातोर्ज्ञेय कलतलनि ष्कोटित तथोत्कृष्टम् । रेफोवमृष्टपुष्पावनुस्वनो बिन्दुरभरश्च ॥ इति । अङ्गुष्ठाभ्या तु यत्तन्त्रीस्पर्शन स्यात्कल तु तत् । वामाङ्गुष्ठकमूलेन पीडन तु तल स्मृतम् ॥ सर्वाङ्गुष्ठप्रहारश्च निष्कोटितमिहोच्यते । सव्यप्रदेशिन्याघात उत्कृष्टं परिकीर्तितम् ॥ सर्वाङ्गुल्यिमाघातो रेफ इत्युच्यते बुधै. । तन्त्रीषु निभकार वा व्यवमृष्टमिति श्रुतम् ॥

३३ **चेटी** — (सप्रणयम्।) भर्तृदारिके चिरं खलु त्वया वादितम्। न खलु ते परिश्रमोऽग्रहस्तानाम्।

३४ **नायि०** — (साधिक्षेपम्।) हञ्जे, चतुरिके देव्याः पुरतो वीणां वादयन्त्याः कुतो मे परिश्रमोऽग्रहस्तानाम्।

३५ **चेटी** — भर्तृदारिके ननु भणामि किमेतस्या निष्करुणायाः पुरतो वीणावादितेन यैतावन्तं कालं कन्यकाजनदुष्करैर्नियमोपवासैराधयन्त्या, न ते प्रसादं दर्शयति।

३६ **विदू०** — भो वयस्य कन्यका खल्वेषा। तत्किं न प्रेक्षावहे।

३७ **नाय०** — (को दोषः? कन्यका हि निर्दोषदर्शना भवन्ति।) किं तु कदाचिदस्मान् दृष्ट्वा बालभावसुलभलज्जासाध्वसान्नचिरमिह तिष्ठेत्। तदनेनैव तमालान्तरेण पश्यावः।

कनिष्ठाङ्गुष्ठसंयुक्तं पुष्पं तु परिकीर्तितम्। तलस्थानेऽधरन्यासस्तथानुस्वनितं भवेत्॥ गुर्वक्षरमयी तन्त्री बिन्दुरित्यभिधीयते। कनिष्ठाङ्गुष्ठकाभ्यां तु तन्त्रीभ्यामधरो गतम्॥ व्याससमासादेषामनुबन्धः सार्वधातुको ज्ञेयः। * * * नामतोपि लयभेदानुदीर्य पुनस्त्रिधेत्युक्तिस्तत्रैव रागादिभेदानुगतिव्यञ्जिका। पाणीना त्रिविधः संयोगो रागं विद्धं शय्यागतमिति। एषु व्यवस्थितपाणिप्रयोगाणा लयानां यतीना च सश्लेषनियमः। तद्यथा—समायतिर्लयश्चैव द्रुतो यत्र भवेदिह। तथैवोपरिपाणिश्च राग वाद्यं तु तद्भवेत्॥ अवपाणिस्तु यत्र स्यात्प्रयोगो लम्बितो लयः। गोपुच्छा च यतिर्वाद्यं तद्वै शय्यागतं भवेत्॥ स्रोतोगता यतिर्यत्र लयो मध्यस्तथैव च। समपाणिप्रयोगश्च विद्धवाद्यं तु तद्भवेत्॥ एषु पुनस्तत्त्वौघानुगता इति त्रयो भेदाः। एते सर्वे लयादयः प्रयोगे परस्परस्यूताः। अपिशब्देन व्यञ्जनधातोः परिपूर्णत्वमुक्तम्। द्रुतमध्यलम्बितपरिच्छिन्न इति। लम्बित इति विलम्बित उच्यते। यदुक्तं—तालान्तरालवर्ती यः स कालो लय उच्यते। त्रिविधः स च विज्ञेयो द्रुतो मध्यो विलम्बितः। इति। यतिर्विच्छेदः। तदुक्तं—तालच्छन्दोवगतिविषये वाद्यते यो विरामो वाद्येहीनः श्रवणसुभगो नामतः सा यतिः स्यात्। इति। लयगानाद्यतिः सम्यक् कथिता दत्तिलादिभिः। समा स्रोतोवहा चैव गोपुच्छा चेति सा त्रिधा॥ इति च। अतो गोपुच्छाप्रमुखा इति पाठो न तु गोपुच्छ इति अदीर्घान्ततया। तत्त्वौघानुगता इति। अत्रोक्तं—त्रिविध गीते कार्यं वादित्रं वैणमेव वाद्यज्ञैः। तत्त्वं तथाप्यनुगमोघो वा नैकारणं तु। लयतालवर्णपदयतिगीत्यक्षरभावकं भवेत्तत्त्वम्। गीतं तु यदनुगच्छत्यनुगतमिति तद्भवेद्वाद्यम्॥ आविद्धकरणबहुलं सुपर्युपरिपाणिकं द्रुतलयं च। अनपेक्षितगीतार्थं वाद्यमथौघो विधातव्यम्॥

MAID—(*Lovingly*) Princess, you have, indeed, played long I hope your fingers feel no fatigue

HEROINE—(*Scornfully*) Oh Chaturika, how can there be any pain for the fingers while playing on the lute before Gauri?

MAID—Princess, I say, what is the use of playing on the lute before this pitiless Goddess, who does not show (you) any favour, though you have propitiated her for such a long time, with vows and fasts too hard for a maiden to observe?

VIDU—Friend, she is indeed a maiden Why should we not look at her then?

HERO—What harm? Girls unmarried may be looked at without (any) objection But, perhaps, seeing us, she may not stay here long, due to shyness and timidity, natural in young age Therefore, let us observe her from behind this Tamala tree

---

अन्यथाप्येतेया लक्षण पर्णयन्ति। इदमेव मुनिमतमिति तदेव विवृतम् ॥ १४ ॥ भर्तृदारिके एव राजपुत्री अभिधीयते । राजा भट्टारको देवस्तत्सुता भर्तृदारिका । इत्यमरः । हस्तस्याग्राणि अग्रहस्ताः । राजदन्तादिवत्समासः । अग्रहस्तानामङ्गुलीनामित्यर्थः । हञ्जे हण्डे हलाहाने नीचां चेटीं सखीं प्रति । इत्यमरः । देव्याः पुरतः इति । देव्याः प्रभावान्नास्ति मे परिश्रम इति भावः । एतावन्तं कालं एतत्परिमाणमस्यासौ एतावान् तम् । कालाध्वनोरत्यन्तसंयोगे इति द्वितीया । कन्यकाजनस्य दुष्करैः दुःखेन कर्तुं शक्यैः । नियमा जपध्यानपूजादीनि व्रतानि । उपवासः उपोषणम् । तैः निर्दोषं दर्शन यासा ताः । बालभावे सुलभा या लज्जा तया यत्साध्वस भय तस्मात् । यद्वा बालभावे सुलभ यल्लज्जा च साध्वसं च लज्जासाध्वस तस्मात् । वीणाविज्ञानेन वीणावादननैपुण्येन । विज्ञानस्यानुरूपेण सदृशेन । आहो उताहो किमुत विकल्पे किं किमुत च । इत्यमरः । स्वर्गस्त्रीति । इय स्वर्गस्य स्त्री स्वर्गस्त्री दिव्याङ्गना यदि तर्हि हरेः इन्द्रस्य चक्षुपा सहस्र चक्षु.सहस्र कृतार्थं कृत. अर्थः येन तथा अभवत् । द्रष्टव्यस्य दर्शनादिति भावः । इय नागी नागकन्या चेत् यदि । अस्याः मुखे शशितुल्ये स्थिते विद्यमाने रसातल पाताल शशभृता चन्द्रेण शून्यं विरहितं न, युक्तमेव । इय विद्याधरी विद्याधरकुलोत्पन्ना चेद् अस्माकं विद्याधराणा जातिः सकलाश्च ता अन्या जातयः सकलान्यजातयस्ताः जयतीति सकलान्यजातिजयिनी । यदि इयं सिद्धान्वये सिद्ध देवयोनिविशेषाः तेषामन्वये वंशे जायते असौ सिद्धान्वयजा तर्हि त्रिभुवने लोकत्रये अस्य स्त्रीरत्नस्य जन्मना सिद्धा· प्रसिद्धा प्रथिता· भूपिता वा । अनेनास्याः सौन्दर्यातिशयो ध्वनित. । सदेहाल्ङ्कार. । अप्रस्तुतप्रशंसा च । शार्दूलविक्रीडित वृत्तम् ॥ १५ ॥ अत्र किंचित्प्रतीयमान. नायकानुरागो बीजम् । तदुक्तं स्वल्पोदिष्टस्तु तद्धेतुर्बीज

(उभौ तथा पश्यतः ।)

३८ **विदू०** — (विलोक्य सविस्मयम् ।) भो वयस्य प्रेक्षस्व प्रेक्षस्व । आश्चर्यमाश्चर्यम् । न केवल वीणाविज्ञानेनैव कर्णयो सुख करोति । अनेन वीणाविज्ञानानुरूपेण रूपेणाप्यक्ष्णो सुखमुत्पादयति । का पुनरेषा भविष्यति । कि तावद्देवी । अथवा नागकन्यका । आहो विद्याधरदारिका । उत सिद्धकुलसभवेति ।

३९ **नाय०** — (सस्पृहमवलोकयन्) वयस्य केयमिति नावगच्छामि । एतत्पुनरह जानामि —

[१] स्वर्गस्त्री यदि तत्कृतार्थमभवच्चक्षु सहस्र हरे
नागी चेन्न रसातलं शशभृता शून्यं मुखेऽस्याः स्थिते ।
जातिर्नः सकलान्यजातिजयिनी विद्याधरी चेदिय
स्यात्सिद्धान्वयजा यदि त्रिभुवने सिद्धा॰ प्रसिद्धास्तत ॥ १५ ॥

४० **विदू०** — (नायकमवलोक्य सहर्षमात्मगतम् ।) [२] दिष्ट्या चिरस्य तावत्कालस्य पतित खल्वेष गोचरे मन्मथस्य । [३] (आत्मानं निर्दिश्य भोजनमभिनीय ।) अथवा नहि नहि ममैवैकस्य ब्राह्मणस्य ।

४१ **चेटी०** — (सप्रणयम् [४]) भर्तृदारिके ननु भणामि किमिदानीमेतस्या अकृताह्लादाया निष्करुणाया देव्या पुरतो वादितेन । (इति वीणामाक्षिपति ।)

४२ **नायि०** — (सकोपम् [५]) हञ्जे मा भगवतीं गौरीमधिक्षिप । नन्वद्य कृतो मे भगवत्या प्रसाद ।

४३ **चेटी०** — (सहर्षम्) भर्तदारिके कथय तावत्कीदश स ।

१ तन. २ रति. ३ सफला. ४ सरोषम् ५ सप्रणयकोपम्

विस्तार्यनेकधा इति । अनेनैव नयनप्रीतिरूपा प्रथमा कामावस्था सूचिता । दिष्ट्या दैवेन । इत्यानन्दार्थे अव्ययम् । मन्मथस्य गोचरे कामविकारवशगत इत्यर्थः । भोजनमभिनीय अभिनयेन दर्शयित्वा । अथवेति पक्षान्तरे । नाय मन्मथवशग किंतु ममैव वशगः । अस्यानया विवाहसम्पादने मदैकशरणोय तथाचानयो विवाहोत्तर मम भोजनादिक यथेच्छ सम्पत्स्यते इति भाव । अधिक्षिप निन्द । चक्रे भूमण्डले राजमण्डले वा वर्तितु शीलमस्य चक्र राजचक्र वर्तयतीति वा चक्रवर्ती सार्वभौम । विद्याधराणा चक्रवर्ती विद्याधरचक्रवर्ती । वर एव ते भन वरशब्द श्लिष्ट । अभिलषितोथ भर्ता च । साध्वसेन सहित ससाध्वस सभयम् । अपरार्य

(*Both look in accordingly*)

VIDU—(*Looking with surprise*) Behold, my friend, behold What a wonder! She does not merely give pleasure to the ears by her skill on the lute, she also gives delight to the eyes by (her) beauty that matches her skill on the lute Who can she be? Is she the Goddess, or a Naga maiden or a Vidyadhara girl or one born of the Siddha race?

HERO—(*Looking ardently*)—I know not who she is But I know this much—

If she is a damsel of heaven, then the thousand eyes of Indra have got their reward, if she is a Naga maiden, then the neither world is not devoid of the moon (as long) as her face is there If she is a Vidyadhara girl, then our class has triumphed over all other classes If she is born of the Siddha race, then the Siddhas have become famous in the three worlds (15)

VIDU—(*Looking at the Hero, joyfully, aside*)

Fortunately, though after a long time, he has fallen under the power of cupid (*Referring to himself and gesticulating eating*) or rather, (under the power) of me only, a Brahmin.

MAID—(*Affectionately*) Princess, I say, what is the use of playing (on the lute) now before this pitiless Goddess who is not pleased? (*Snatches away the lute*)

HEROINE—(*Angrily*) Maid, don't deprecate the Goddess Gauri. The Goddess, indeed, has bestowed on me (her) favour to-day

MAID—(*Joyfully*) Princess, tell me, of what kind it is

रहस्यकथनार्थे परावृत्य । तदुक्तं—तद्भवेदपवारितम् । रहस्य तु यदन्यस्य परावृत्य प्रकाश्यते । त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ॥ इति । अन्येन सदृशी न भवतीति अनन्यसदृशी तया । तनुरिति । हे तरलायतलोचने तरले चञ्चले आयते दीर्घे च लोचने यस्याः तथोक्ते । श्वसितेन कम्पितौ पीनौ पुष्टौ घनौ निविडौ च स्तनौ यस्याः सा तथोक्त तस्याः सम्बुद्धिः । इयं तव तनुः तपसा व्रताचरणेनैव अलमत्यर्थं श्रम गता क्लिष्टा । पुनः हे संभ्रमधारिणि मद्दर्शनात् जातसाध्वसे । सभ्रमः साध्वसेपि स्यात् । इति मेदिनी । किमिति कस्मात् खिद्यते । क्लिश्यते त्वयेति शेषः । अल मद्दर्शनसभ्रमश्रमेणेति भावः । परिकरालंकारः । द्रुतविलम्बित वृत्तम् ॥ १६ ॥

सलज्जमिति । परावृत्तमुखीत्यनेन शृङ्गारलज्जोक्ता । तदुक्त पराङ्मुखीकृत शीर्षे परावृत्तमुदीरितम् । लत्कार्ये कोपलज्जादि कृते वक्त्रापसारणे ॥ मम पठितविद्यामिव विदूषकस्य विस्मरणशीलता प्रसिद्धेव । अतिथिः अभ्यागतः । वचनमात्रेणापि केवलेन सभाषणेनापि । सत्कारः अभ्युत्थानार्घ्यदानादिना पूजनम् । अनुरज्यत इति । अनेनास्या दृष्टिराग उक्तः । तदुक्त—नयनप्रीति. प्रथम चित्ता-

४४ **नायि०**—हञ्जे अद्य स्वप्ने जानामि एतामेव वीणां वादयन्ती भगवत्या गौर्या भणितास्मि। वत्से मलयवति परितुष्टास्मि ते एतेन वीणाविज्ञानातिशयेनानया च अबलाजनदुष्करया असाधारणया ममोपरि भक्त्या। तस्माद्विद्याधरचक्रवर्ती तेऽचिरेण स्वयमेव पाणिग्रहणं निर्वर्तयिष्यतीति।

४५ **चेटी०**—(सहर्षम्) भर्तृदारिके यद्येवं तत्कस्मात्स्वप्न इति भणसि। ननु हृदयस्थितो वर एव भगवत्या देव्या दत्तः।

४६ **विदू०**—भो वयस्य अवसरः खल्वावयोर्देवीदर्शनस्य। तदेह्युपसर्पाव

४७ **नाय०**—न तावत्प्रविशामि।

४८ **विदू०**—(अनिच्छन्तमपि नायकं बलादाकर्षति।)

(उभौ देवालयं प्रविशतः।)

४९ **विदू०**—(उपसृत्य) स्वस्ति भवत्यै। भवति सत्यमेव चतुरिका भणति। वर एव त एष देव्या दत्तः।

५० **नायि०**—(ससाध्वसमुत्तिष्ठन्ती नायकमुद्दिश्यापवार्य।) हञ्जे को नु खल्वेष।

५१ **चेटी०**—(नायकं निरूप्यापवार्य।) एतयानन्यसदृशयाकृत्या एष स भगवत्या गौर्याः प्रसाद इति तर्कयामि।

५२ **नायिका**—(सलज्जं सस्पृहं च नायकमवलोकयन्ती तिष्ठति।)

५३ **नायकः**—

तनुरियं तरलायतलोचने श्वसितकम्पितपीनघनस्तनि[१][२]।
श्रममलं तपसैव गता पुनः किमिति संभ्रमधारिणि[३] खिद्यते[४] ॥ १६ ॥

५४ **नायिका**—(अपवार्य।) हञ्जे अतिसाध्वसेन न शक्नोम्येतस्य संमुखं स्थातुम्। (नायकं सलज्जं तिर्यक्पश्यन्ती किंचित्परावृत्तमुखी[५] तिष्ठति।)

५५ **चेटी०**—भर्तृदारिके किमेतत्

५६ **नायिका**—हञ्जे न शक्नोम्येतस्यासन्ने स्थातुम्। तदेह्यन्यतो गच्छाव।
(इत्युत्थातुमिच्छति।)

१ यति २ स्तनी. ३ कारिणि. ४ खिद्यसे. ५ पराङ्मुखी.

सगरुतातोथ सकल्प। निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः। उन्मादो मूर्च्छा मृतिरित्येता स्मरदशा दशैव स्युः॥ महाननुभावः पराक्रमः यस्य स महानुभावः महाभाग। प्रतिपत्तिमूढा प्रतिपत्तिरितिकर्तव्यता तत्र मूढा कर्तव्यमजा

HEROINE—Maid, I think, to-day in a dream, while I was playing on this very lute, I was told by the divine Gauri thus —'Child Malayavati, I am pleased with this your great skill in playing on the lute and with this uncommon devotion to me, which is hard to be practised by women Therefore, the King of Vidyadharas will soon accept your hand (in marriage), of his own accord

MAID—(*Joyfully*) If so, Princess, why do you call it a dream? Indeed, the very desire of your heart (also, the husband of your choice) has been granted to you by the Goddess

VIDU—Friend, this is the proper time for us to see the Goddess Come, therefore, we shall enter.

HERO—I won't enter

(*Vidusaka drags the unwilling Hero forcibly*)

(*Both enter the temple*)

VIDU—(*Going near*) Hail to your ladyship Lady, Caturika speaks just the truth This is certainly the boon (also, the husband) granted to you by the Goddess

HEROINE—(*Rising timidly, referring to the hero, aside*) Maid, who, indeed, is he?

MAID—(*Looking at the hero, aside*) From his uncommon form, I think that he is the boon, granted by the divine Gauri

(*Heroine looks at the hero bashfully and longingly*)

HERO—Oh you, with long and restless eyes, with big and firm breasts trembling (i e heaving, with heavy breathing, this body (of yours) is sufficiently wearied by penance Why, O perplexed one, should it be troubled again? (16)

HEROINE—(*Aside*) Maid, I am not able to stand near him due to great nervousness (*Stays bashfully with her face slightly averted, and looking with side-long glances at the Hero*)

MAID—Princess, what is this?

HEROINE—Friend, I am unable to stand near him, so come, we shall go else-where (*wishes to get up*).

नती इत्यर्थः । परिहास शीले अयीति कोमलामन्त्रणे । परिहासः नर्म शील यस्याः सा तत्सम्बुद्धिः ।· अविनीता विनयशून्या । दुश्चारिणीत्यर्थः । कुलपतिना । तल्लक्षणम्—मुनीना दशसाहस्र योऽन्नदानादिपोषणात् । अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृतः ॥ इति । पाद्मे तु—आचार्यो बहुशिष्याणा मुनीनामग्रणीस्तु यः । व्रतयज्ञादिकर्माढ्य. स वै कुलपतिः स्मृतः ॥ इत्युक्तम् । सिद्धाना युवराजः सिद्धयुवराजः स चासौ मित्रावसुश्च । वरहेतोः वरनिमित्त वरत्वेन वरितुमित्यर्थः । मध्य दिनं मध्याह्नः तत्र यत्सवनं स्नान तस्य वेला समयः अतिक्रामेत् व्यतीयात् । लङ्घितो

५७ **विदू०**— भो बिमेति खलु एषा। मम पठितविद्यामिवैनां मुहूर्तं धारयामि

५८ **नायकः** — को दोषः।

५९ **विदूषकः** — भवति किमत्र युष्माकं तपोवन ईदृश आचारो यदागत अतिथिर्वाङ्मात्रेणापि न संभाव्यते।

६० **चेटी** — (नायिकामवलोक्य स्वगतम्) [illegible] तावद्भणिष्यामि। (प्रकाशम्) भर्तृदारि [illegible] तेऽतिथिजनसत्कारः। तत्किमेतस्मिन्महानुभाव एव प्रतिपत्तिमूढा तिष्ठसि अथवा तिष्ठ त्वम्। अहमेव यथानुरूपं करिष्यामि। (नायकमुद्दिश्य) स्वागतं महाभागस्य। आसनपरिग्रहेणालंकरोत्विमं प्रदेशमार्यः।

६१ **विदू०** — भो वयस्य शोभनमेषा भणति। उपविश्यात्रमुहूर्तं विश्राम्याव

६२ **नायकः** — युक्तमाह भवान्।

(इत्युपविशतः।)

६३ **नायिका** — (चेटिकामुद्दिश्य) अयि परिहासशीले मैवं कुरु। यदि कदापि कोपि तापस प्रेक्षते ततो मामविनीतेति संभावयति।

(ततः प्रविशति तापसः।)

६४ **तापसः** — आज्ञापितोस्मि कुलपतिना कौशिकेन यथा वत्स शाण्डिल्य पितुराज्ञया सिद्धयुवराजमित्रावसुर्भविष्यद्विद्याधरचक्रवर्तिनं कुमारजीमूतवाहनमिहैव मलयपर्वते क्वापि वर्तमानं भगिन्या मलयवत्या वरहेतोर्द्रष्टुमद्य गतः। तं च प्रतीक्षमाणाया मलयवत्या कदाचिन्मध्यंदिनसवनवेलातिक्रामेत्। तदेनामाहूयागच्छेति। ततो यावद्गौरीगृहमेव गत्वा मलयवतीमाकार्य गच्छामि। (परिक्रम्य भूमिं निरूप्य सविस्मयम्।) अये कस्य पुनरियं पांसुलेप्रदेशे प्रकाशचक्रचिह्ना पदपङ्क्तिः। (पुरतो जीमूतवाहनं निर्दिश्य।) नूनमस्यैवेयं महानुभावस्य पदवी। तथाहि।

१ मज्जनम्. २ वेलावधिरिति. ३ पांसुले भूप्रदेशे. ४ महापुरुषस्य.

भवेदित्यर्थः। आकार्य आहूय। हूतिराकारणाह्वानम्। इत्यमरः। पांसुः धूलिः अस्त्यस्य असौ पांसुलः प्रदेशः तस्मिन्। प्रकाशं स्फुटं चक्रस्य चिह्नं यस्या सा तथोक्ता। अधुना जीमूतवाहनस्य चक्रवर्तित्व निर्वाहयस्तच्चिह्नानि वर्णयति। उष्णीष इति। मूर्धनि मस्तके एव उष्णीषः उष्णीषबन्धस्थाने ललाटोपरि पट्टबन्धरेखा उष्णीषः।

VIDU—Friend, she is indeed frightened I shall detain her for a moment, as I do (retain) my knowledge acquired by study

HERO—What harm?

VIDU—Madam, is this the custom of the hermitage that a guest, who has come, is not greeted with a word even?

MAID (*Looking at the heroine, to herself*) Her eyes seem to be delighted in (looking at) him Well, I will just say thus (*Aloud*) Princess, the Brahmin speaks rightly.

It is proper that you should honour a guest Why, then, do you stand so helpless in (carrying out) the duty towards this noble person? Or rather, you just stay I shall myself do what is befitting (*Addressing the hero*) Welcome to the noble one May the noble one adorn this place by taking a seat here

VIDU—Friend, she speaks rightly Let us sit here for a while and take rest

HERO—You have spoken well

(*Both take their seats*)

HEROINE—(*To the maid*) O girl, fond of jesting, don't do it If some ascetic would see, he will consider me immodest

(*Then enter a Hermit*)

HERMIT—I have been ordered by Kaushika, the Head of the hermitage, thus—'Dear Shandilya, Mitravasu, the prince of the Siddhas, has gone today, by the order of his father, to see prince Jimutavahana, the future Emperor of the Vidyadharas staying somewhere here on this Malaya mountain, [illegible] e time [illegible] wait- [illegible] shall, [illegible] *ti and* then go (*moving about, looking at the ground with surprise*) Oh, whose is this line of foot-prints with distinct signs of a sovereign, in this dusty region? (*Seeing Jimutavahana in front*) Surely, these are the foot-steps of this very noble person For,

---

स्फुटः विभाति । इयं भ्रुवोः अन्तः मध्ये ऊर्णा रोमराजिः विभाति । तदुक्तं सामुद्रके—भ्रुवोर्मध्ये यस्य रोम भालश्चैव सुविस्तृतः । करे च चरणे चिह्नं चक्रादि स हि राज्यभाक् ॥ इति । चक्षुः तामरस रक्तकमलं तदनुकरोति तच्छीलं तामरसानुकारि । रक्तोत्पलं तामरसम् । इत्यमरः । वक्षःस्थलं हरिणा सिंहेन स्पर्धते । तत्सदृशमित्यर्थः । यथा च इद पदद्वय चक्राङ्क चक्रस्य अङ्कः यस्मिंस्तादृशमस्ति तथा मन्ये सभावयामि कोपि अयमुक्तलक्षणः पुरुषः विद्याधरचक्रवर्तिनः पदवीं पद अप्राप्य अलब्ध्वा

उष्णीषः स्फुट एष मूर्धनि विभात्यूर्णेयमन्तर्भ्रुवो-
श्चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्धते ।
चक्राङ्कं च यथा पदद्वयमिदं मन्ये तथा कोऽप्ययं
नो विद्याधरचक्रवर्तिपदवीमप्राप्य विश्राम्यति ॥ १७ ॥

अथवा कृतं संदेहेन । व्यक्तमनेनैव जीमूतवाहनेन भवितव्यम् । (मलयवतीं निरूप्य।) अये इयमपि राजपुत्री मलयवती । (उभौ विलोक्य) (चिरात्खलु युक्तकारी विधिः स्याद्यदि युगलमेतदन्योन्यानुरूपं घटयेत् ।) (उपसृत्य नायकं निर्दिश्य) स्वस्ति भवते ।

६५ **नायकः** — भगवन् जीमूतवाहनोऽभिवादयते । (उत्थातुमिच्छति ।)

६६ **तापसः** — अलमलमभ्युत्थानेन । ननु सर्वस्याभ्यागतो गुरुरिति भवानेवास्माकं पूज्यः । तद्यथासुखं स्थीयताम् ।

६७ **नायिका** — आर्य प्रणमामि ।

६८ **तापसः** — (नायिकां निर्दिश्य) वत्से अनुरूपभर्तृगामिनी भूयाः । राजपुत्रि त्वामाह कुलपतिः कौशिकः । यथातिक्रामति मध्यंदिनसवनवेला तत्त्वरितमागम्यतामिति ।

६९ **नायिका** — यद्गुरुजन आज्ञापयति (इत्युत्थाय निःश्वस्य च स्वगतम्)

एकतो गुरुवचनमन्यतो दयितदर्शनसुखमिति ।
गमनागमनविमूढमद्यापि दोलायते मे हृदयम् ॥ १८ ॥

(सलज्जं सानुरागं च नायकं तिर्यक्पश्यन्ती तापससहिता निष्क्रान्ता ।)

१ विलोक्य स्वगतम्. २ सवनविधिः.

नो विश्राम्यति विरमेत् । सर्वथा विद्याधराणां चक्रवर्ती भवेदित्यर्थः । उपमा-अनुमानं चालंकारौ । शार्दूलविक्रीडितं वृत्तम् ॥ १७ ॥ युक्तं योग्यं करोतीति युक्तकारी । समानयस्तुल्यगुणं वधूवरं चिरस्य वाच्यं न गतः प्रजापतिः । इति अनुरूपभावः शाकुन्तले । रूपस्य योग्यः अनुरूपः । स चासौ भर्ता च तं गच्छतीति अनुरूपभर्तृगामिनी । एकत इति । एकतः एकत्र गुरोः वचनं स्नानाय गमनाज्ञा । गुरोरिति तस्यालंघनीयत्वं ध्वनितम् । अन्यतः अन्यत्र दयितस्य प्रियजनस्य दर्शनाज्जातं सुखम् । एतदपि दुस्त्यजमिति भावः । अतः गमनागमने विमूढं मे हृदयं दोलायते भ्रमति निश्चयं नावगाहते इत्यर्थः ॥ १८ ॥ उत्कण्ठया

On his head, shines distinctly the mark of the crown, this circle of fine hair shines between his eye-brows his eye resembles a red lotus, his chest vies with (that of) a lion, and as the pair of these feet bear the marks of the disc, I think that this person, whoever he may be, will not rest without attaining the title of the Emperor of Vidyadharas (17).

Or away with doubt It is clear that this person must be Jimutavahana (*Observing Malayavati*) Oh, here is Princess Malayavati too! (*Looking at both*) Destiny would be doing what is proper, though after a long time, if it would unite this pair, suited to each other (*Approaching and addressing the Hero*) Hail to your Honour!

HERO—Revered Sir, Jimutavahana salutes you! (*Wishes to rise up*)

HERMIT—Please, don't get up Surely you yourself should be honoured by us as 'a guest is respectable to everyone' Please, therefore, stay at ease

HEROINE—Honoured Sir, I bow to you

HERMIT—Child, May you obtain a worthy husband *Princess, the Patriarch sage Kausika says to you thus* · 'You should come (home) quickly before the time for the mid-*day oblation passes*'

HEROINE—As the preceptor commands (*Getting up and sighing, to herself*)

On one side, there is the command of the Preceptor and on the other the joys of looking at the beloved person Thus my heart, still uncertain whether to go or not, swings to and fro (18)

(*Exit with the hermit, looking at the Hero side-ways, bashfully and lovingly*)

सहित यथा तथा। सस्पृह स्मरण उत्कण्ठा। चिन्ता तु स्मृतिराध्यान स्मरण सस्पृहे पुनः। उत्कण्ठोत्कलिके तस्मिन्। इति शब्दार्णवः। अनयेति। जघनस्य श्रोणिपुरोभागस्य यः आभोग· विशालत्व तस्य भरेण भारेण मन्थर मन्द यान यस्याः सा तथोक्ता तया। अनया अन्यतो व्रजन्त्या अपि मे हृदये पद निहितम्। प्रीतिर्जनितेत्यर्थ.। छेकानुप्रास। असङ्गतिश्च॥ १९॥ अनेन नायकस्य चिन्तासङ्गो नाम द्वितीयावस्था सूचिता। तथा च शृङ्गारस्थायिभावो रतिरपि अत्रैव सूचिता। तदुक्त—रम्यदेशकलाकालवेषभोगादिसेवनै। प्रमोदात्मा रति सैव यूनोरन्योन्यरक्तयोः। प्रकृष्यमाणः शृङ्गार.। इति। तेन चाग्रिमाङ्कवस्तुबीजसूचनात्

७० **नायकः**—(सोत्कण्ठं निःश्वस्य नायिका पश्यन् ।)

अनया जघनाभोगभरमन्थरयातया[1] ।
अन्यतोऽपि व्रजन्त्या मे हृदये निहितं पदम् ॥ १९ ॥

७१ **विदू०**—भो दृष्टं यत्प्रेक्षितव्यम् । श्रुतं यच्छ्रोतव्यम् । तदिदानीं मध्याह्नसूर्यकिरणसंतापद्विगुणित इव मे जठराग्निर्धमधमायते । तदेहि । निष्क्रामाव । येन ब्राह्मणोऽतिथिर्भूत्वा मुनिजनसकाशाल्लब्धैः कन्दमूलफलैरपि तावत् प्राणधारणं करिष्ये ।

७२ **नाय०**—(ऊर्ध्वमवलोक्य) अये अयं मध्यमध्यास्ते नभस्तलस्य भगवान्सहस्रदीधितिः । तथा हि ।

तापात्तत्क्षणघृष्टचन्दनरसापाण्डू[2] कपोलौ वहन्
संसक्तैर्[3]निजकर्णतालपवनैः संवीज्यमाननः ।
संप्रत्येष विशेषसिक्तहृदयो[4] हस्तोज्झितैः शीकरै-
र्गाढायल्लकदुःसहामिव[5] दशां धत्ते गजानां पतिः ॥ २० ॥

तदेहि आवामपि गच्छावः ।

(इति निष्क्रान्तौ ।)

॥ इति प्रथमोऽङ्कः ॥

१ यातया. २ रसौ. ३ संसिक्तैः. ४ हृदये. ५ ग्लायच्छ०.

अङ्कावतारः नामार्थोपक्षेपकोऽयम् । तदुक्तम्—अङ्कावसाने यत्रैव भाविनोऽङ्कस्य सूच्यते । वस्तुबीजमुपोद्घातैः सोऽङ्कावतार इष्यते ॥ इति । मध्यमह्नः मध्याह्नः । तत्र ये सूर्यस्य किरणास्तेषां सन्तापात् । द्विगुणितः द्विगुणितां प्राप्त इव, धमधमायते उग्रं ज्वलतीत्यर्थः । धमधमेति ज्वलनस्यानुकरणवाचि पदं । ततः अव्यक्तानुकरणाद्व्यजवराधेंरितिं डाचि लोहितादिडाज्भ्यः क्यष् इति क्यष् । सहस्रं दीधितयः किरणा यस्य स सहस्रदीधितिः सूर्यः । तापादिति । तापात् घर्मात् तत्क्षणं घृष्टः यः चन्दनरसस्य रसो निष्यन्दः तेनापाण्डू पाण्डुरवर्णौ कपोलौ वहन् । तथा च संसक्तैः सम्बद्धैः निजकर्णौ एव तालौ तालवृन्तव्यजने तयोः पवनैः संवीज्यमानमाननं यस्य तथाभूतः । पुनश्च हस्तेन शुण्डया उज्झितैः क्षिप्तैः शीकरैः अम्बुकणैः

HERO—(*Sighing longingly and looking at the heroine*)

Though going in another direction, a step is set on my heart by her, whose gait is slow on account of the weight of her expansive hips (19)

VIDU—Sir, you have seen what is fit to be seen and heard what is fit to be heard The fire in my stomach blazes as if doubled by the heat of the mid-day sun Come then, we shall go away, so that I, a Brahmin, may become a guest and support my life with at least the bulbs, roots and fruits obtained from the hermits

HERO (*Looking above*)—O the divine sun (Lit having thousand rays) occupies the middle of the sky For,

This Lord of the elephants, bearing cheeks, white with the juice of the sandal tree rubbed against (by him) at this very moment owing to the heat, with his face fanned by the continuous breeze of his own fan-like ears, and with his chest fully wet with the sprays sent forth from his trunk, now assumes a condition unbearable as if on account of deep longing (20)

Come, then, we too shall go

(*Exeunt Both*)

END OF ACT I

विशेषेण सिक्त हृदय यस्य स तथोक्त । एष पुरो दृश्यमानः गजाना पति गजराजः सम्प्रति गाढेन दृढेन आयल्लकेन उत्कण्ठया । स्यादायल्लकमाध्यानमुत्कण्ठोत्कलिका रति । इत्युक्तेः । दुःसहा कृच्छ्रेण सोढु शक्यामवस्था धत्ते इव । अनङ्गज्वरातुरोपि तत्क्षण घृष्ट यच्चन्दन तस्य रसेन पाण्डू कपोलौ धारयति । सोपि कर्णप्रान्तयोः तालवृन्तप्रवर्तितै पवनैः परिचारकैः सवीज्यमानाननो भवति । हस्तोज्झितै पाणि विसृष्टैः जलकणै हृदये सिच्यते च । ग्लायच्छल्लकदु.सहामिति पाठे ग्लायन् ग्लानिं प्राप्नुवन् य शल्लक तरुविशेष तस्य इव दुःसहा दशा धत्ते । किन्त्वय पाठो न मनोरम इति नादृत । स्वभावोक्तिरलकार । उत्प्रेक्षा च । शार्दूलविक्रीडित वृत्तम् ॥२०॥

निष्क्रान्तौ इति । तदुक्त दशरूपके—एकाहाचरितैकार्थमित्थमासन्ननायकम् । पात्रैस्त्रिचतुरैरङ्क तेषामन्तेस्य निर्गमः ॥ इति । अङ्कलक्षणमादिभरते—अङ्क इति रूढिशब्दो भावैश्च रसैश्च रोहयत्यर्थान् । नानाविधानयुक्तान् यस्मात्तस्माद्भवेदङ्कः ॥ दशरूपके च—यदा तु सरस वस्तु मूलादेव प्रवर्तते । अदावेव तदाङ्कः स्यादामुखाक्षेपसश्रयः । प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः । अङ्को नानाप्रकारार्थ सविधानरसाश्रयः ॥ इति ॥ इति श्रीमन्नागानन्दटीकायामर्थबोधिन्यां प्रथमोऽङ्कः ॥

द्वितीयोऽङ्कः ॥

१ **चेटी** — आज्ञप्तास्मि भर्तृदारिकया मलयवत्या । यथा हञ्जे मनोहारिके अद्य चिरयति मे भ्रातार्यमित्रावसु । तल्लघु गत्वा जानीहि किमागतो न वेति । तद्यथाज्ञप्तमनुतिष्ठामि । (परिक्रामति । नेपथ्याभिमुखमवलोक्य ।) का पुनरेषा त्वरित त्वरितम् एवागच्छति । (निरूप्य ।) कथ चतुरिका ।

(तत प्रविशति द्वितीया चेटी ।)

२ **प्रथमा** — (उपसृत्य ।) हञ्जे चतुरिके किंनिमित्त त्वयैव त्वरितया आगम्यते ।

३ **द्वितीया** — हला मनोहारिके आज्ञप्तास्मि भर्तृदारिकया मलयवत्या । हञ्जे चतुरिके कुसुमावचयपरिश्रमनि सह मे शरीरम् । शरदातपजनितोऽय मे सतापोऽधिकतर बाधते । तद्गच्छ त्व बालकदलीपत्रपरिक्षिप्ते चन्दनलतागृहे चन्द्रमणिशिलातल सज्जीकुर्विति । अनुष्ठित च मया यथाज्ञप्तम् । तद्यावद्गत्वा भर्तृदारिकायै निवेदयामि ।

४ **प्र०** — यद्येव तल्लघु गत्वा निवेदय येनास्यास्तत्र गताया उपशाम्यति सताप ।

५ **द्वि०** — (विहस्यात्मगतम्) नेदृशस्तस्या सतापो य एवमुपशमिष्यति । किचिद्रमणीय चन्दनलतागृह प्रेक्षमाणाया अधिकतर संतापो भविष्यतीति तर्कयामि । (प्रकाशम् ।) तद्गच्छ त्वम् । अहमपि सज्जीकृत मणिशिलातलमिति गत्वा भर्तृदारिकायै निवेदयामि ।

(इत्युभे निष्क्रान्ते ।)

१ विमृश्य

प्रवेशकः ।

अथ द्वितीयाङ्के परस्परदर्शनेन जातप्रेम्णोर्नायकनायिकयो अयोगविप्रलम्भ वर्णयितुकामस्त परिपोषार्थमादौ नायिकाया मदनबाधापनोदार्थमपेक्षित चदनलता गृहसज्जीकरणाद्यर्थं प्रवशकाख्येनार्थोपक्षेपकेण सूचयति — तत प्रविशति चेटीत्यादि ना । आज्ञप्तेति । चिरयति चिर विलम्ब करोति । तत्करोतीति णिच् । लघु त्वरितम् । त्वरितत्वरितमतिशीघ्रम् । अवचय यद्यपि हस्तादाने चेरस्तेये इति घञि कृते अवचाय

ACT II

(Then enter a maid.)

MAID—I am ordered by Princess Malayavatı thus —"Maid Manoharika, my brother, the noble Mitravasu, is delayed So go quickly and find out whether he has come or not." So I shall do as ordered (*Moves about, then looking towards curtain*) But who is she that comes this way in such haste? (*Observing*) How? It is Chaturika.

(Then enter the second maid.)

FIRST—(*Going near*) Friend Chaturika, why are you going in such haste?

SECOND—Friend Manoharika, I am ordered by Princess Malayavatı thus —"Maid Chaturika, my body has been exhausted due to fatigue in collecting flowers This heat, caused by the autumnal sun, troubles me very much Therefore, go and make ready the moonstone-slab in the bower of the sandal-creepers, enveloped by the leaves of the young plantain trees" I have carried out the command I shall, therefore, go and report to the Princess accordingly

FIRST—If so, go quickly and inform her, so that her suffering may subside when she goes there

SECOND—(*Smiling, to herself*) Her suffering is not such as would be relieved by such means I think her anguish will increase when she looks at the wonderful and charming bower of sandal creepers (*Aloud*) Go then I shall go and inform the Princess that the moonstone-slab is made ready

(*Exeunt both*)

END OF THE INTERLUDE

इति मान्य तथापि अत्रादेयस्य प्रत्यासत्त्यभावस्य विलक्षितत्वाद् घजभावःइति बोध्यम् तेन निःसह परिम्लान किंचित्कार्यकरणाक्षममित्यर्थ. । शरदः आतपः उष्णिमा तेन जनितः । बालाश्च ता. कदल्यश्च बालकदल्य तासा पत्राणि तैः परिक्षिप्ते परिगते चन्दनलताभिश्चन्दनतरुभिस्तत्काष्ठैरित्यर्थ· निर्मित· गृह चन्दनलतागृह तस्मिन् चन्द्रमणयश्चन्द्रकान्तास्तेषा शिलातलम् । विहस्येति । प्रथमया सन्तापकारण परमार्थतोऽजानत्या तथोक्तमिति विहस्योक्तिः । ईदृशः निदाघजन्य एवविधोपचा रैरपनेयः । आत्मगतमिति । प्रकाश-श्रूयाच्चेत्स्वामिन्या अकाले एव रहस्य भेदो भवेदिति हेतो. । इति एव सूच्यार्थसूचन कृत्वा निष्क्रमः । प्रवेशक. । एतल्लक्षणम्—यन्नीचैः केवल पात्रैर्भाविभूतार्थसूचनम् । अङ्कयोरुभयोर्मध्ये स विज्ञेयः प्रवेशकः ॥ इति· ॥ अथ प्ररूढप्रेम्णोरुदात्तप्रकृत्योर्नायकनायिकयोर्गुरुपारतन्त्र्या दिनाऽसङ्गमः अयोगः । तदुक्त—तत्रायोगोऽनुरागेऽपि नवयोरेकचित्तयो । पारतन्त्र्येण

(ततः प्रविशति सोत्कण्ठा मलयवती चेटी च।)

६ **नायि०** — (निःश्वस्यात्मगतम्।) अयि हृदय तथा नाम तदा तस्मिञ्जने लज्जया मां पराङ्मुखीकृत्येदानीमात्मना तत्रैव गतमसीत्यहो त आत्मंभरित्वम्। (प्रकाशम्।) हञ्जे आदेशय मे भगवत्या आयतनस्य मार्गम्।

७ **चेटी** — ननु चन्दनलतागृहं भर्तृदारिका प्रस्थिता।

८ **नायि०** — (सलज्जम्।) हञ्जे, सुष्ठु त्वया स्मारितास्मि। तदेहि तत्रैव गच्छावः।

९ **चेटी** — एतु एतु भर्तृदारिका। (अग्रतो गच्छति।)

१० **नायि०** — (अन्यतो गच्छति।)

११ **चेटी** — (पृष्ठतो दृष्ट्वा सोद्वेगमात्मगतम्।) अहो अस्याः शून्यहृदयत्वम्। कथं तदेव देवीभवनं प्रस्थिता। (प्रकाशम्।) भर्तृदारिके नन्वितश्चन्दनलतागृहम्। तदित एहि तावत्।

१२ **नायि०** — (सविलक्षस्मितं तथा करोति।)

१३ **चेटी** — इदं चन्दनलतागृहम्। तत्प्रविश्य चन्द्रमणिशिलातल उपविशतु भर्तृदारिका। (उभे उपविशतः।)

१४ **नायि०** — (निःश्वस्यात्मगतं।) भगवन् कुसुमायुध येन त्वं रूपशोभया निर्जितोऽसि तस्य त्वया न किमपि कृतम्। मां पुनरनपराद्धामप्यबलेति कृत्वा प्रहरन्कथं न लज्जसे। (आत्मानं निर्वर्ण्य मदनावस्थां नाटयन्ती। प्रकाशम्।) हञ्जे कस्मात्पुनर्घनपल्लवनिरुद्धसूर्यकिरणं तदेव चन्दनलतागृहं न मेऽद्य संतापदुःखमपनयति।

१५ **चेटी** — (सस्मितम्।) जानाम्यहमत्र कारणम्। किं त्वसंभावनीयमिति भर्तृदारिका न तत्प्रतिपत्स्यते।

१ ०लक्षं सलज्जं च.

दैवाद्वा विप्रकर्षादसङ्गमः ॥ स च दशावस्थः। तस्य समुचितोद्दीपनविभावानुभावव्यभिचार्यनुबन्धेन जायमानाश्चिन्ताद्यवस्था वर्णयितुमुपक्रमते। तत्र—आदौ वाच्यः स्त्रिया रागः पश्चात्पुंसस्तदिङ्गितैः। इति वचनात् प्रवेशसूचितं नायिकाया अयोगविप्रलम्भादिकं प्रस्तौति ततः प्रविशतीत्यादिना। सोत्कण्ठा उत्कण्ठया सहिता। उत्कण्ठालक्षणं तु—रागे त्वलब्धविषये वेदना महती तु या। संशोषणी तु गात्राणां तामुत्कण्ठां विदुर्बुधाः इति ॥ निःश्वस्येति। अनेन निःश्वासरूपेणानुभावेन

(*Enter Malayavati in a love-sick condition and a maid*)

HEROINE—(*Sighing, to herself*) Oh my heart! Having forced me to turn away then from that person in that manner on account of bashfulness, you now, of your own accord, have gone to that very person, Oh your selfishness! (*Aloud*) Maid, *show me the way to the temple of the Goddess*

MAID—The Princess has, indeed, started for the bower of sandal creepers!

HEROINE—(*Bashfully*) Maid, I am well reminded by you, come then we shall go just there

MAID—May the Princess come along (*Goes ahead*) (*The heroine goes in another direction*)

MAID—(*Looking back, sorrowfully, to herself*) Oh, her absent-mindedness! She has started to the very same temple of the Goddess (*Aloud*) Princess, the sandal-bower is, indeed, in this direction So come this way, please

(*Heroine does so with a smile of embarassment*)

MAID—This is the bower of sandal-creepers May the Princess enter and sit on the moon-stone-slab (*Both sit down*)

HEROINE—(*Sighing, to herself*) O God of Love, (the flower-arrowed one), you have done nothing to him, by whom you are vanquished in the beauty of form, but you are not ashamed to strike at me thinking (me) a woman, though I have not offended (you) (*Looking at herself, gesticulating the love-sick condition, aloud*) Maid, how is it that the same sandal-bower which obstructs the sun's rays by its thick foliage, does not remove my torment of heat?

MAID—(*Smiling*) I know the cause of this But the Princess will not admit it, thinking it to be impossible

---

चिन्ता प्रदर्शिता। तथा तेन प्रकारेण। तस्मिञ्जने जीमूतवाहने। पराङ्मुखीकृत्य अनुरागदर्शनादेरिति भावः। आत्मान बिभर्तीति आत्मभरि तस्य भाव आत्मंभरित्व स्वार्थपरता। आदेशयेति। अत्र चन्दनलतागृहगमनोद्यताया भगवती गृह प्रति गमनादेशात्प्रलापो नाम कामदशा सूचिता। शून्य विमर्शरहित हृदय यस्या सा शून्यहृदया। तस्या भावः शून्यहृदयत्वम्। विलक्षेण विस्मयान्वितेन स्मितेन सहित यथा स्यात्तथा सविलक्षस्मितम्। कुसुमानि आयुधानि यस्य स कुसुमायुधः कामः। रूपस्य शोभा रूपशोभा तया। घनाः सान्द्राश्च ते पल्लवाश्च तैर्निरुद्धा निवारिताः सूर्यस्य किरणा यत्र तत्। सन्तापदुःखं नापनयति अनेन विषयनिवृत्तिः (सज्वर) नाम कामावस्थोक्ता। अत्र सन्तापानपनयनस्य। कारणम्—जीमूतवाहनकृत एवायं सन्तापः उपायान्तरेण नापनीयते इति भावः।

१६ **नायि०** — (आत्मगतम् ।) कथं लक्षितेवाहमेतया । तथापि पृच्छामि तावत् । (प्रकाशम् ।) हञ्जे किं तवैतेन । कथय तावत्किं तत्कारणम् ।

१७ **चेटी** — एष ते हृदयस्थितो वर.

१८ **नायि०** — (सहर्षं ससम्भ्रममुत्थाय द्विनाणि पदानि गत्वा ।) कुत्र कुत्र स ।

१९ **चेटी०** — (उत्थाय सस्मितम् ।) भर्तृदारिके स क ।

२० **नायि०** — (सलज्जमुपविश्याधोमुखी तिष्ठति ।)

२१ **चेटी** — भर्तृदारिके नन्वेतदस्मि वक्तुकामा । एष ते हृदयस्थितो वर एव देव्या दत्त इति स्वप्ने प्रस्तुते यस्तत्क्षणमेव विमुक्तकुसुमबाण इव भगवान् मकरध्वजो भर्तृदारिकया दृष्ट स तेऽस्य संतापस्य कारणम् । येनैतत्स्वभावशीतलमपि चन्दनलतागृहं न ते संतापदुःखमपनयति ।

२२ **नायि**[२]**०** — (चतुरिकाया अलकं स्पृशन्ती ।) हञ्जे चतुरिका खलु त्वम् । किं तेऽपरं प्रच्छाद्यते । तत्कथयिष्यामि ।

२३ **चेटी** — भर्तृदारिके ननु इदानीमेव कथितममुना वरालापमात्रजनितेन सम्भ्रमेण । तदलं सम्भ्रमेण कामसंतापेन च । अथवा चतुरिका तस्योऽपि भर्तृदारिकामप्रेक्षमाणो न मुहूर्तमप्यन्यस्मिन्नभिरंस्यत इत्येतदपि मया लक्षितमेव ।

२४ **नायि०** — (साम्रम् ।) हञ्जे कुतोऽस्माकमीदृशी भागधेयता ।

२५ **चेटी** — भर्तृदारिके मैवं भण । किं मधुसूदनो वक्षःस्थलेन लक्ष्मीमनुद्वहन्निर्वृतो भवति ।

२६ **नायि०** — किं स्वजन प्रियं वर्जयित्वान्यद्गणितुं जानाति । सखि अतोऽपि संतापो मामधिकतरं बाधते । यत्स महानुभावो वाचामात्रेणाप्यकृतप्रतिपत्तिमदक्षिणेति मां संभावयिष्यति ।

१ येष्टः. २ ना (चतुरिकया लक्षितास्मि).

असंभावनीयमनुकूलतर्केणाकल्पनीयम् । प्रतिपत्स्यते अङ्गीकरिष्यति । लक्षितेवाहं मम हृदयरहस्यमनया ज्ञातमिव । एतेन मत्कथितं कारणमनया प्रतिपद्येत नवेति चिन्तया । एष ते हृदयस्थितो वरः हृदयप्रार्थितो देव्या अनुग्रहः । हृदयेन वृतः पुरुषश्लेषार्थद्वयसाधारणः शब्दसंघात. 'द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु' इत्युक्त्यनुसारेण कविनात्र तद्रहस्यस्फोटनार्थं तस्याः वैवश्यस्फुटीकरणेन रसपरिपोषार्थं च प्रयुक्तः । स्वमनोवृत्त्यनुसारेण हृदयस्थपुरुष एवाग्रतः प्राप्त इति मन्वाना नायिका अग्रतो गत्वाह — कुत्र स इति । सलज्जमुपविश्येति स्वरहस्यस्य स्वयमेव प्रकटनाल्लज्जा ।

HEROINE—How! She seems to have detected me I shall, however, ask her (*Aloud*), Maid, what is it that I may not admit? Just tell me what its cause is

MAID—It is the boon (also, the bridegroom) that occupies your heart—

HEROINE—(*Rising up with joy and excitement and advancing two or three steps*) Where, where is he?

MAID—(*Rising, with a smile*) Princess, who is 'he'?

(*Heroine sits down abashed and remains with her face bent down*)

MAID—Princess, I wish to say this—"when the dream was referred to as 'This is just the boon (husband) of your heart granted to you by the Goddess', he, who was seen by the Princess that very moment, as if he was the God of Love (Lit. the fish-bannered one) without the flowery arrows, is the cause of this anguish, so that the sandal-bower though naturally cool, does not remove the pain of your suffering

HEROINE—(*Touching the hair of Chaturika*) Maid, you are indeed Chaturika (i e the clever one) Why should the rest be concealed from you? So I shall tell you (everything)

MAID—Princess, it is already told by the confusion caused by a mere talk about the lover Therefore, enough of this confusion and agitation of love If I am really Chaturika (i e clever), then I have marked this also that he too will not find delight anywhere else without seeing the Princess

HEROINE—(*with tears*) Maid, whence can there be such good luck for us?

MAID—Princess, don't say so Can Vishnu (Lit the killer of Madhu) feel happy without bearing Lakshmi on the chest?

HEROINE—Does a friend know to speak anything except what is pleasant? Friend, the anguish distresses me all the more for this that the noble person would regard me as discourteous since I did not welcome him even with words (*Starts-weeping*)

वक्तुं कामो यस्याः सा वक्तुकामा । अथ मेऽभिप्रेतोर्थ इत्यर्थः । प्रस्तुते आलापविषयीकृते । तत्क्षणमिति देवीप्रेरणयैवेति सूचितम् । विमुक्तः क्षिप्तः कुसुमरूपो बाणो येन । वरालाप एव वरालापमात्र तेन जनितेन । यद्यह चतुरिका परेङ्गितज्ञानसमर्थेत्यर्थः. । अन्यस्मिन्नभिरस्यते अन्यत्र निर्वृतिमेष्यति । तव सङ्गमोत्सुख एक भवेदित्यर्थः । स यथा न निर्वृतो भवति तथा जीमूतवाहनोपि त्वद्विरहे न सुखलेशभाग्भवेदिति भाव. । वाचामात्रेणेति । वाचा एव वाचामात्र तेन । आस्ता तावदर्घ्यपाद्यादिदानादिना सत्कार. । केवलमालापमात्रेणापि न कृता अकृता प्रतिपत्तिः सत्कारो यया ता

२७ **चेटी**—भर्तृदारिके मा रुदिहि। अथवा कथं न रोदिष्यति। अतिशयमस्या हृदयसंतापो बाधते। तत्किमिदानीमत्र करिष्यामि। तद्यावच्चान्दनलतापल्लवरसमस्या हृदये दास्यामि। (उत्थाय चन्दनपल्लवं गृहीत्वा निष्पीड्य रसं हृदये ददाति।) भर्तृदारिके ननु भणामि मा रुदिहि। अयं खलु चन्दनपल्लवरस [illegible] न ते हृदयस्य संतापदुःखमपनयति।

२८ **नायि०**—(हस्तेन तां निवारयति।) सखि मा वीजय। उष्णः खल्वेष कदलीदलमारुतः।

२९ **चेटी**—भर्तृदारिके मास्य दोषं कथय।

करोषि घनतरुणचन्दनपल्लवसंसर्गशीतलमपीमम्।
निःश्वासैस्त्वमेव कदलीदलमारुतमुष्णम् ॥ १ ॥

३० **नायि०**—(सास्रम्।) सखि अस्ति कोऽप्यस्य संतापस्योपशमोपायः।

माम्। अदक्षिणा अनुदारा अविनीतेत्यर्थः। समुचिताचाराकुशलेति यावत्। अविरतं यथा तथा पतद्भिः। **करोषीति**। त्वमेव घना निरन्तरा ये तरुणचन्दनस्य पल्लवास्तेषां संसर्गस्तेन शीतलमपि इमं कदलीदलमारुतं निःश्वासैः। अर्थादुष्णैः। उष्णं करोषि। पाठान्तरे चिता रचिता ये चन्दनपल्लवा इत्यादि। प्रपञ्च्य सवर्ध्य ॥ १ ॥ न एव इत्यनेन नायकप्रवेशः सूचितः। एवं नायिकाया विरहावस्था वर्णयित्वा नायकस्यापि तां प्रदर्शयति **व्यावृत्येति**। हे पुष्पेषो कुसुमबाण। एतेन कोमलैरेव बाणैर्वीरानपि वशीकरोषीत्यहो ते लोकविलक्षणं सामर्थ्यमिति ध्वनिः। सिता श्वेता असिता कृष्णा च या ईक्षणे नेत्रे तयोः रुक् कान्तिः तया आश्रमे मठे देवतायतने इत्यर्थः। वने वा। आश्रमो ब्रह्मचर्यादौ वानप्रस्थे मठे वने। इति मेदिनी। तान् विविधान् शाखिनो वृक्षान् विटपेषु शाखासु। विटपो न स्त्रियां स्तम्बशाखाविस्तारपल्लवे। इति मेदिनी। अवसक्ताः सलग्नाः विलसन्तः स्फुरन्तश्च कृष्णाजिनानां कृष्णमृगचर्मणामोघाः येषां तथाविधानिव कुर्वत्या इत्युत्प्रेक्षा। अत्र वृक्षेषु तन्नयनकान्तिसंक्रान्त्युत्प्रेक्षया स्निग्धाख्या दृष्टिरुक्ता। तदुक्तं—स्निग्धं तद्यस्य विषयस्तत्प्रभामिलितो भवेदिति। तया दयितया व्यावृत्य वदनं परावृत्य एव। अनेन वलिताख्या दृष्टिः प्रकाशिता। तदुक्तं—वलितं तन्निवृत्तस्य भूयरन्यथावलोकनम्। इति। यद्वा व्यावृत्त्या एवेति पदच्छेदः। यदहं मुनेः शाण्डिल्याख्यस्य कौशिकशिष्यस्य पुरोऽग्रतः दृष्टोऽस्मि। अस्मि इत्यहमर्थे वा अव्ययं यथा—दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि नास्मि दूये-।

MAID—Princess, do not weep (*To herself*) Or how should she not weep? The affliction of the heart troubles her very much What shall I do here now? I shall just apply the juice of sandal leaves to her bosom. (*Rising up, takes the sandal leaves, and squeezing them, applies the juice to her bosom*) Princess, I say, please, do not weep This sandal juice will not remove the anguish of your heart, being heated by these tear-drops falling constantly. (*Takes up a plantain-leaf and fans her*)

HEROINE—(*Prevents her with the hand*) Friend, do not fan me The breeze of the plaintain-leaf is indeed hot

MAID—Princess, do not mention (it), as its fault

With your sighs, you yourself make this breeze of the *plantain-leaf hot though it is cool by its contact with dense* and tender sandal leaves (1)

HEROINE—(*With tears*) Friend, is there any remedy to allay this torment?

इत्यत्र। तेन तादृशेनावलोकनेनैव आहते मयि। तत्कटाक्षविशिखैस्ताडिते मयीति यावत्। भवता किमिति मुधैव एते शराः क्षिप्यन्ते पात्यन्ते। पूर्वमेव हते पुनः प्रहारो न वीरधर्मो नाप्युचित इति भावः। अत्र वाक्यगतस्य नयनबाणपतनस्य पुष्पेषुशरपतनवृथात्वे हेतुत्वेनोपन्यासात्काव्यलिङ्गमलङ्कारः। स च उत्प्रेक्षया संमिश्रः। केचिदनुमानालङ्कारमिच्छन्ति। शार्दूलविक्रीडित वृत्तम् ॥ २ ॥ धीरत्वमेव प्रतिपादयति **नीता** इति। मयेति पदं सर्वैर्निष्ठान्तपदैः सम्बध्यते। शशाङ्केन लक्षणया चन्द्रिकया धवला उज्ज्वलाः। शशाङ्करुचय इति पाठे शशाङ्कस्य रुचिः कान्तिर्यासु ताः। 'शशाङ्केन रुचिर्यासु इति व्यधिकरणबहुव्रीहिः। चन्द्रिकासम्बन्धेन दुष्प्रेक्षा इत्यर्थः' इति शिवरामः। निशाः मया न नीता नातिवाहिताः किम्। अपि तु नीता एवेति काकुः। इन्दीवर नीलोत्पल कामबाणभूतमपि नाघ्रातं किम्। अपि तु आघ्रातमेव। उन्मीलिता या मालत्यः मालतीकुसुमानि। हरीतक्यादित्वात्फले लुक् इति तद्धितलुकि स्त्रीत्वम्। द्विहीनं प्रसवे सर्वे हरीतक्यादयः स्त्रियाम्। इत्यमरः। ताभिः सुरभयः सुगन्धाः प्रदोषस्य अनिलाः सन्ध्याकालसम्बन्धिनो वायवः न सोढाः किम्। अपि तु सोढा एव। कमलाकरे मधुलिहां भ्रमराणां झङ्कारः मिश्रमधुरध्वनिः ', मन्मथधनुष्टङ्कारसदृशः इति ध्वनिः। न श्रुतः किम्। अपि तु श्रुत एव। एवं चरणत्रयेण धैर्यरूपः सत्त्वजो गुण उक्तः। व्यवसायादचलनं धैर्यं विघ्ने महत्यपि। इति तल्लक्षणं दर्पणे। येन हेतुना भवान् मां विधुरेषु विरहविह्वलेषु अधीरः कातरतम इति। निर्धारणे सप्तमी। अथवा विधुरेषु चित्तवैकल्येषु सत्सु। विधुर चित्तवैकल्य दुःखार्तोऽशरणस्त्रिषु। इति कोषः।

३१ **चेटी** — भर्तृदारिके अस्ति यदि स एवेहागच्छति ।

(ततः प्रविशति नायको विदूषकश्च ।)

नाय० —

व्यावृत्त्यैव सितासितेक्षणरुचा तानाश्रमे शाखिनः
कुर्वत्या विटपावसक्तविलसत्कृष्णाजिनौघानिव ।
यद् दृष्टोऽस्मि तया मुनेरपि पुरस्तेनैव मय्याहते
पुष्पेषो भवता मुधैव किमिति क्षिप्यन्त एते शराः ॥ २ ॥

३२ **विदू०** — भो वयस्य कुत्र खलु गत ते धीरत्वम् ।

३३ **नाय०** — वयस्य ननु धीर एवास्मि । कुत

नीताः किं न निशाः शशाङ्कधवला नाघ्रातमिन्दीवरं
किं नोन्मीलितमालतीसुरभयः सोढाः प्रदोषानिलाः ।
झङ्काराः कमलाकरे मधुलिहां किं वा मया न श्रुताः
निर्व्याजं विधुरेष्वधीर इति मां येनाभिधत्ते भवान् ॥ ३ ॥

अथवा सम्यगभिहितं वयस्येन ।

स्त्रीहृदयेन न सोढाः क्षिप्ताः कुसुमेषवोऽप्यनङ्गेन ।
येनाद्यैव पुरस्तव वदामि धीर इति स कथमहम् ॥ ४ ॥

३४ **विदू०** — (आत्मगतम् ।) (एवमधीरत्वं प्रतिपद्यमानेनाख्यातोऽनेन महान् स्यावेग ।) तद्यावत्कथमेनेनमाक्षिपामि । (प्रकाशम् ।) (भो वयस्य कस्मा नद्य त्वं लब्ध्वेव गुरुजन शुश्रूषित्वेहागत ।)

१ आवृ २ विकस्त. ३ तेनैवमभ्याहते. ४ रुचयः. ५ टुङ्काराः. ६ येन.

र्व्याज निष्कपट स्पष्टमित्यर्थः । अभिधत्ते वदति । एतदधीरत्वाभिधानमनुचितमिति वः । अत्र शशाङ्केन्दीवरसुरभिवाताद्युद्दीपनाना सत्त्वेपि उद्दीपनकार्याभावाद्विशेषो-क्त्यलंकारः । परिकरश्च । शार्दूलविक्रीडित वृत्तम् ॥ ३ ॥ अथवेति पक्षान्तरे । दुक्तमवास्तवमित्यर्थः । त्वदुक्तमेव समीचीनम् । तदेव प्रतिपादयति स्त्रीहृदयेनेति । स्त्रिया इव हृदय यस्य तेन स्त्रीवत्कातरेण । यद्वा स्त्रया कान्ताया हृदय यस्य तेन स्त्रीगतमनसा । स्त्रिया सक्त हृदय यस्य इति केचित् । केचिदेतदनङ्गविशेषणत्वेनापि योजयन्ति । येन मया अनङ्गेन कामेन ।

MAID—Princess, there is (a remedy), if he comes this way

(*Then enter the Hero and Vidushaka*)

HERO—O God of *flowery arrows*, *why do you discharge* these arrows at me in vain, when I have been already struck by her (glances), as I was seen by her, even in the presence of the sage, by just turning back and causing, by the lustre of her bright and dark glances, the trees in the hermitage to appear as if possessing many shining hides of black antelopes suspended from their branches (2)

VIDU—O *friend, where, indeed, has your* firmness gone?

HERO—Friend, I am indeed firm, for

Have I not passed the nights, bright with the moon? Have I not smelt the blue lotus? Have I not endured the evening breezes fragrant due to the full-blown *Malati flowers*? And have I not heard the humming of bees in a lotus-pond? Why then do you say bluntly that I am without courage among the love-lorn (persons)? (3)

Or rather my friend has spoken rightly

When I, with a woman's heart, have not endured even the flowery arrows shot by the Bodiless one (i e Madana), how can I now call myself brave before you? (4)

VIDU—(*To himself*) The great agitation of his heart has been revealed by him in thus confessing his lack of firmness How shall I then divert him now? (*Aloud*) Friend, how is it that you have come here so quickly after serving your parents?

अङ्गवैकल्ययुक्तेनापीति ध्वनिः । क्षिप्ताः कुसुमेषवः । मृदुला अपीति ध्वनिः । न सोढाः । सोहं अद्य एव तव मित्रस्य । मम रहस्यं जानतः इत्यर्थः । पुरः धीरोस्मीति कथं वदामि । तव पुरो मम धीरत्वप्रकटनं न युक्तमिति भावः । आर्याच्छन्दः ॥ ४ ॥ प्रतिपद्यमानेनाङ्गीकुर्वता । आवेगः उत्कण्ठाव्याकुलत्वम् । एनमाक्षिपामि अन्यत्रासक्तचित्तं कुर्याम् । शुश्रूषित्वा सेवित्वा । स्थाने युक्तः । उचितावसर इति वा । प्रणयेन कुपिता प्रणयकुपिता । प्रेमातिशयादकारणमेव कुपितेत्यर्थः । उपालभमाना अधिक्षिपन्तीव मयि दोषमारोपयन्तीवेति वा । स्वप्ने अनुभूतः यः प्रियासमागमः तेन रम्ये मनोहरे । अतिवाहयितुं यापयितुम् । ईदृशं चित्तचाञ्चल्यसूचकम् । तुल्यं तु जानीयादित्यर्थः । अन्तरिते अपवारिते । **चन्दनलतेति** । इदं चन्दनलतागृहं चन्द्रमणिशिलया सहितं सचन्द्रमणिशिलमपि तया चन्द्र इव आननं यस्याः सा चन्द्रानना तया रहितं सत् चन्द्रिकया कौमुद्या रहितं निशाया मुखं आरम्भः

३५ **नाय०**—वयस्य स्थाने खलु भवतः प्रश्नः। कस्य वान्यस्यैतत्कथनीयम्। अद्य खलु स्वप्ने जानामि सैव प्रियतमा (अङ्गुल्या निर्दिशन्) अत्र चन्दनलतागृहे चन्द्रमणिशिलायामुपविष्टा प्रणयकुपिता किमपि मामुपालभमानेव रुदती मया दृष्टा। तदिच्छामि स्वप्नानुभूतदयितासमागमरम्येऽस्मिन्नेव प्रदेशे दिवसशेषमतिवाहयितुम्। तदेहि गच्छाव।

३६ **विदू०**—एतु एतु भवान्। (परिक्रामतः।)

३७ **चेटी**—(कर्णं दत्वा ससंभ्रमम्।) भर्तृदारिके पदशब्द इव श्रूयते।

३८ **नायि०**—(ससभ्रममात्मानं पश्यन्ती।) हञ्जे मेदृशमाकारं प्रेक्ष्य कोऽपि मे हृदयं तुलयतु। तदुत्तिष्ठ। अनेन रक्ताशोकपादपेनान्तरिते प्रेक्षावहे क एष इति। (तथा कुरुतः।)

३९ **विदू०**—भो वयस्य एतत्तच्चन्दनलतागृहम्। तदेहि प्रविशाव।

(नाट्येन प्रविशतः।)

नाय०—(विलोक्य।)

चन्दनलतागृहमिदं सचन्द्रमणिशिलमपि प्रियं न मम।
चन्द्राननया रहितं चन्द्रिकया मुखमिव निशायाः॥ ५॥

४० **चेटी**—(नायकं दृष्ट्वा।) भर्तृदारिके दिष्ट्या वर्धसे। स एव त एष हृदयवल्लभो जन।

४१ **नायिका**—(दृष्ट्वा सहर्षं ससाध्वसं च।) हञ्जे एनं प्रेक्ष्यातिसाध्वसेन न शक्नोमीहैवासन्ने स्थातुम्। कदाप्येष मा प्रेक्षते। तदेह्यन्यतो गच्छाव। (सोत्कम्पं पदं दत्वा।) हञ्जे वेपते मे वामोरु।

निशामुखमिव मम प्रिय मनोज्ञ न भवति। मम प्रीतिं नावहतीत्यर्थः। अत्र नायकस्य अरतिर्नाम पञ्चमी कामदशा दर्शिता। अत्र विरोधालङ्कारः। स च मुखमिवेत्युपमया सङ्कीर्णः। आर्या वृत्तम्॥ ५॥ वेपते मे ऊरुः इत्यनेन कम्पो नाम सात्त्विकभाव उक्तः। शशिमणिशिलेति। सा पूर्वानुभूता। प्रियतमोपवेशनेन सौभाग्यातिशययुक्तेत्यभिसन्धिः। इयं शशिमणिशिला यस्या मयि चिरयति विलम्बयति वामे। स्त्रिणां वाम भागस्य प्रशस्तत्वात्। करः किसलयमिव तस्मिन्करकिसलये हस्तपल्लवे विपाण्डुर।

HERO—Friend, your question is indeed proper To whom else can it be told? To-day, indeed, I think that same beloved was seen by me (*pointing with the finger*) seated on the moon-stone-slab in this sandal-bower, being angry with me through love, and weeping while rebuking me as it were, for something Hence I wish to spend the rest of the day in this very place, charming on account of the union with my beloved experienced in the dream Come then, we shall go

VIDU—Come, come, your honour (*Both move on*)

MAID—(Listening, with excitement) Princess, the sound of foot-steps, I imagine, is heard

HEROINE—(*Observing herself with excitement*) Maid, looking to this state of mine, let not any one suspect my heart So get up concealed behind this red Asoka tree, we shall see who it is (*Both do so*)

VIDU—Friend, this is that sandal-bower Come let us enter

(They represent entering)

HERO—(*Looking*)

This Sandal bower without the moon-faced one, though possessed of the moon-stone-slab, is not pleasing to me, like the face of the night (i e evening) without moon light (5)

MAID—Princess, Good fortune attends you! This is the very same person, dear to your heart!

HEROINE—(*Looking with joy and nervousness*) Maid, having seen him, I am not able to stay here near (him) owing to great nervousness Perhaps he will see me So, *come, let us go somewhere else* (*Going a step with tremor*) Maid, my left thigh trembles

---

विरहादिति भावः। आनन कृत्वा निधाय। तदुक्त मुनिना—अप्राप्ते च प्रियतमे कार्यो गण्डाश्रित. करः। इति। घन॰ निरन्तरःश्वसितानां निःश्वासानामुद्गमो यस्याः सा घनश्वसितोद्गमा। व्यक्त स्फुट दृश्यमानमावृत हृदयाभिप्रायो यस्या सा तथोक्ता। मनागीषत्स्फुरितः अधरो यस्यास्तादृशी। निगूढकोपादिति भाव.। नियमित. निगृहीतः मनस. मन्यु कोपो दैन्य वा यया तादृशी प्रिया रुदती दृष्टा। अनुप्रासालकार। हरिणी वृत्तम् ॥ ६ ॥ क पुनरिति। त्वदुक्त मद्दर्शन सभवेत्। प्रणयकुपितप्रियजनवृत्तान्तस्तु कथमुपपद्येतेति भाव।

निष्यन्दत इति। ते बाष्पाम्बुना नेत्रवारिणा सिक्तमेतत् चन्द्रकान्तशिला-तल्मनेन संमुख स्थितेन ते मुखमेव चन्द्रः मुखचन्द्रस्तस्योदयेन निष्यन्दते स्रवति इव। अप्राणिकर्तृकत्वान्निष्यन्दते इत्यत्र पत्वम्। चन्द्रोदये चन्द्रकान्तस्रवणप्रसिद्धे-रितिभावः। रूपकानुप्राणित उत्प्रेक्षालकार। अनेन विरमाश्रुपातात्प्रसाद परिगृह्य

४२ **चेटी**—(विहस्य) अतिक्रान्ते इह स्थितामपि त्वां कः प्रेक्षते। ननु विस्मृत एव त एषोऽग्रतो रक्ताशोकपादपः। तदिहैव तिष्ठावः।

४३ **विदू०**—(निरूप्य।) भो वयस्य एषा सा चन्द्रमणिशिला।

४४ **नायकः**—(सबाष्पं निःश्वसिति।)

४५ **चेटी**—भर्तृदारिके आलापोऽपि श्रूयते। तदवहिते तावच्छृणुवः। (उभे आकर्णयतः।)

४६ **विदू०**—(हस्तेन चालयन्) भो वयस्य ननु भणाम्येषा सा चन्द्रमणिशिलेति।

४७ **नायकः**—वयस्य सम्यगुपलक्षितं भवता। (हस्तेन निर्दिश्य।)

शशिमणिशिला सेयं यस्यां विपाण्डुरमाननं
करकिसलये कृत्वा वामे घनश्वसितोद्गमा।
चिरयति मयि व्यक्ताकूतं मनाक्स्फुरिताधरा
नियमितमनोमन्युर्दृष्टा मया रुदती प्रिया॥ ६॥

तदस्यामेव चन्द्रमणिशिलायामुपविशावः।

(उभावुपविशतः।)

४८ **नायि०**—(विचिन्त्य।) हञ्जे का पुनरेषा भविष्यति।

४९ **चेटी**—भर्तृदारिके यथावामपवारिते एतं प्रेक्षावहे तथा त्वमप्येतेन दृष्टा भवेः।

५० **नायि०**—युज्यत एतत्। कं पुनः प्रणयकुपितं प्रियजनं हृदये कृत्वा मन्त्रयते।

५१ **चेटी**—भर्तृदारिके मेदृशीमाशङ्कां कुरु। पुनरपि तावच्छृणुवः।

५२ **विदू०**—(आत्मगतम्।) अभिरमत एष एतया कथया। तद्भवतु। एतामेव वर्धयिष्यामि। (प्रकाशम्।) भो वयस्य ततः सा रुदती त्वया किं भणिता।

१ स्फुरितैर्भ्रुवोः. २ विरमित. ३ वर्त-धर्ष-धिष्यामि.

णेति प्रार्थना व्यज्यते॥ ७॥ नायकस्यान्यामुद्दिश्येयमुक्तिरिति मन्यमाना चतुरिकामाह अस्ति किमपीति। पञ्चजातीयाः श्वेतनीलपीतरक्ताः संकीर्णश्च पञ्चमः। प्रियाया मुखरेखामाविर्भूतां दृष्ट्वा जातहर्षरोमाञ्च आह—अक्लिष्टेति। अक्लिष्टमजातपीड

MAID—(*Laughing*) O timid one, who will see you standing here? You have certainly forgotten this red Asoka tree in front of you Let us, therefore, sit here.

VIDU—(*Observing*) Friend, this is that moonstone-slab
(The Hero sighs tearfully)

MAID—Princess, some conversation also is to be heard So let us hear attentively (*Both hear*)

VIDU—(*Shaking the hero with his hand*) Friend, I say, this is that moon-stone-slab

HERO—Friend, you have observed well
(*Pointing with the hand*);

This is the very moon-stone-slab where I saw my beloved weeping, resting her pale face on her tender left hand, heaving deep sighs and who, when I delayed long, supressed the anger in her heart, showing clearly her inward feelings as the lower lip throbbed slightly (6)

Therefore, let us sit on that same moon-stone-slab
(*Both sit down*)

HEROINE—(*thinking*) Maid, who can this be?

MAID—Princess, as we see him unobserved, so it may be that you too might have been seen by him

HEROINE—This may be so But who is that dear person, angry in love, of whom he talks, thinking of her in his heart?

MAID—Princess, do not entertain such doubts We shall just hear further

VIDU—(*To himself*) He delights in this talk, be it so, I shall make him talk about the same (*Aloud*) Friend, then what did you say to the weeping lady?

यद्विम्ब पक्वबिम्बफल तद्वच्छोभा यस्य स अक्लिष्टबिम्बशोभः । तादृशः अधरः यत्र तदक्लिष्टबिम्बशोभाधर तस्य । नयनयोरुत्सवो यस्मात्तस्य नेत्रानन्दकरस्य । दयितामुखस्य । अक्लिष्ट गेघोपरोधरहितं स्पष्टमित्यर्थः । यद्विम्ब तस्य शोभा तस्याः धरतीति धरस्तस्य शशिनः । द्वितीयाशशिन इत्यर्थः । च । प्रथमदृष्टा इय रेखा अपि सुखयति आह्लादयति । श्लेषानुप्राणितोपमालंकारः । आर्यावृत्तम् ॥ ८ ॥ निर्वर्ण्य सावधानेन दृष्ट्वा । प्रियेति । संकल्पेन मनःकल्पनया पुरः स्थापिता इय प्रिया सन्निहिता समीपस्था एव । अस्तीति शेषः । एना दृष्ट्वा दृष्ट्वा पुनः पुनरवलोक्य लिखामि चित्रे निवेशयामि । तदेवं स्थिते अत्र को विस्मय. । न कोपीत्यर्थः ॥ ९ ॥ अस्या आलापः सभाषण जीवितनिरपेक्ष. जीवितान्निर्गता अपेक्षा यस्मात्तादृशः जीवितधारणनिराकाङ्क्षः । प्रियाप्राप्तौ न जीवित धारयिष्यतीति सभाव्यते इत्यर्थः ।

नाय० — वयस्य इदमुक्ता ।

निष्यन्दत[1] इयानेन मुखचन्द्रोदयेन ते ।
एतद्बाष्पाम्बुना सिक्तं चन्द्रकान्तशिलातलम् ॥ ७ ॥

१ निस्पन्दते.

५३ नायि० — (सरोषम् ।) चतुरिके अस्ति किमप्यतः परं श्रोतव्यम् । तदेहि गच्छावः ।

५४ चेटी — (हस्ते गृहीत्वा ।) भर्तृदारिके मैवं भण । येन त्वं दृष्टा सोन्यां भणिष्यतीति न हि मे हृदयं प्रत्येति । तत्कथावसानं तावत्प्रतिपालयावः ।

५५ नाय० — वयस्य तामेवास्यां शिलायामालिख्य तथा चित्रगतयात्मानं विनोदयामि । तदित एव गिरितटान्मनःशिलाशकलान्यादायागच्छ ।

५६ विदू० — यद्भवानाज्ञापयति । (परिक्रम्य गृहीत्वोपसृत्य ।) भो त्वयैको वर्णक आज्ञापितः । मया पुनरिह पर्वते सुलभाः पञ्चजातीया वर्णका आनीता । तदालिखतु भवान् । (इत्युपनयति ।)

५७ नायकः — वयस्य साधु कृतम् । (गृहीत्वा शिलायां तामालिखन् सरोमाञ्चम् ।) पश्य पश्य,

अक्लिष्टबिम्बशोभाधरस्य नयनोत्सवस्य शशिन इव ।
दयितामुखस्य सुखयति रेखापि प्रथमदृष्टेयम्[1] ॥ ८ ॥

५८ विदू० — (सकौतुकं निर्वर्ण्य ।) भो वयस्य अप्रत्यक्षेऽप्येवं नाम रूपं लेख्यत इत्यहो आश्चर्यम् ।

५९ नाय० — (सस्मितम् ।) वयस्य ।

प्रिया संनिहितैवेयं संकल्पैः[2] स्थापिता पुरः ।
दृष्ट्वा दृष्ट्वा लिखाम्येनां यदि तत्कोऽत्र[3] विस्मयः ॥ ९ ॥

६० नायि० — (निःश्वस्य सास्रम् ।) चतुरिके ज्ञातं खलु कथावसानम् । तदेहि मित्रावसुं प्रेक्षावहे ।

. १ रेखा सुखयति नः. २ सकल्पस्था०. ३ यथावत्को.

तातेन विश्वावसुना । सुपरीक्षितः वर परीक्ष्य दातव्या कन्या इत्युक्तत्वात् । प्रतिपाद्यतां प्रदीयताम् । स्नेहस्य पराधीनतया प्रेमपरत्वात् । अन्या अवस्था अवस्थान्तरम् । यदिति । तत्रादौ वरस्य सम्पूर्णगुणवत्ता दर्शयति । विद्याधराणां राज्ञा वंशस्तस्य तिलकः अलंकारः । न तु यः कश्चन वरः । प्राज्ञः प्रकृष्टज्ञानवान् ।

HERO—Friend, thus she was addressed—

"The surface of the moon-stone-slab, sprinkled with the water of tears appears to ooze, as if at the rise of this moon of your face" (7)

HEROINE—(*Angrily*) Chaturika, is there anything more to be heard? Come let us go

MAID—(*Taking her by the hand*) Princess, do not say so My heart does not believe that he, by whom you were seen, will talk of another We shall, therefore, await the end of the talk

HERO—Friend, having drawn her on this very slab, I shall entertain myself by (looking at) her painting So go and bring some pieces of red arsenic from the mountain side

VIDU—As you command (*Going about, gathers the pieces and approaching*) Sir, you ordered me to bring one colour But I have brought five kinds of colour, easily obtainable on this mountain So you may draw (the painting) (*Hands over the colours*)

HERO—Well done, my friend (*Taking them, paints her on the slab, with a thrill*) See my friend, see

Even this outline of my beloved's face, the festival to my eyes, with its lower lip beautiful like the ripened Bimba fruit, delights me when seen for the first time, like the digit of the moon, which is the joy of the eyes, and which possesses beauty with her unclouded disc, giving delight when seen for the first time (8)

(*Draws the picture*)

VIDU—(*Observing with curiosity*) Friend, what a wonder that the form is thus (exactly), portrayed even in the absence (of the model)

HERO—(*smiling*) Friend,

My beloved, presented before me by my imagination is indeed near me When I draw, looking at her again and again, is there any wonder in it? (9)

HEROINE—(*Sighing, with tears*) O Chaturika, we have indeed known the end of the story Come then, we shall see Mitravasu

---

सता साधूना विदुषा वा सम्मत. मान्यः। रूपेण अप्रतिमः अतुल॰। अलौकिकरूपसम्पन्न। पराक्रम एव धन यस्य तादृश.। विद्वान् विनीत विनयसम्पन्न। युवा चेति यत्। तदुक्त—कुल च शील च मनोज्ञता च विद्या च वित्त च वपुर्यशश्च। एतान्गुणानसक्त निरीक्ष्य कन्या वराय देया पितुरप्यशोच्या॥ तथा च करुणया जातानुकम्प इत्यर्थः। सत्वार्थे जीवरक्षार्थमभ्युद्यत. असून् प्राणानपि सत्यजेत्। तेन हेतुना अस्मै स्वसार ददतो मे अतुला तुष्टिः अतुलो विषादश्च जायते इति शेष।

६१ **चेटी** —(सविषादमात्मगतम् ।) कथं जीवितनिरपेक्ष इवास्या आलापः ।) (प्रकाशम् ।) भर्तृदारिके ननु गतैव तत्र मनोहारिका । तत्कदाचिद्भर्ता मित्रावसुरिहैवागच्छेत् ।

(ततः प्रविशति मित्रावसुः ।)

६२ **मित्रा०** — आज्ञापितोऽस्मि तातेन यथा वत्स मित्रावसो कुमारजीमूतवाहनोऽस्माभिरिहाश्रमवासात्सुपरीक्षितः कृतो योग्यो वरः । तदस्मै वत्सा मलयवती प्रतिपाद्यतामिति । (अहं तु स्नेहपराधीनतया अन्यदेव किमप्यवस्थान्तरमनुभवामि । कुतः

यद्विद्याधरराजवंशतिलकः प्राज्ञः सतां संमतो
रूपेणाप्रतिमः पराक्रमधनो विद्वान्विनीतो युवा ।
यच्चासूनपि संत्यजेत्करुणया सत्त्वार्थमभ्युद्यत-
स्तेनास्मै ददतः स्वसारमतुलां तुष्टिर्विषादश्च मे ॥ १० ॥

श्रुतं च मया यथासौ जीमूतवाहनोऽत्रैव गौर्याश्रमसंबद्धे चन्दनलतागृहे वर्तत इति । तदेतच्चन्दनलतागृहम् । यावत्प्रविशामि । (इति प्रविशति ।)

६३ **विदू०** — (ससंभ्रममवलोक्य ।) भो वयस्य प्रच्छादयानेन कदलीपत्रेणेमां चित्रगतां कन्यकाम् । एष खलु सिद्धयुवराजो मित्रावसुरिहागतः कदापि प्रेक्षिष्यते ।

६४ **नाय०** — (कदलीपत्रेण चित्रमाच्छादयति ।)

६५ **मित्रा०** — (प्रविश्य ।) कुमार मित्रावसुः प्रणमति ।

६६ **नाय०** — (दृष्ट्वा ।) मित्रावसो स्वागतम् । इहोपविश्यताम् ।

६७ **चेटी** ० — भर्तृदारिके आगतो भर्ता मित्रावसुः ।

६८ **नायि०** — हञ्जे प्रियं मे ।

६९ **नाय०** — मित्रावसो अपि कुशली सिद्धराजो विश्वावसुः ।

७० **मित्रा०** — कुशली तात । तदादेशेनास्मि त्वत्सकाशमिहागतः ।

१ कुतोऽस्माद्योग्यो वरः । २ अतुला.

अत्र नायकस्य लोकातिशयसम्पद्वर्णनादुदात्तालंकारः । स च यच्छब्दद्वयस्य तुष्टिविषादयोर्हेतुत्वावयथाक्रमं सम्पादनाच्च काव्यलिङ्गेन यथासंख्येन च संसृष्टः । शार्दूलविक्रीडितं वृत्तम् ॥ १० ॥ गौर्याश्रमसम्बद्धे गौर्याश्रमो गौर्यायतनं तत्प्रान्तवर्तिनीत्यर्थः । सिद्धराजस्तस्यान्वयो वंशः तस्य । अन्यस्यां हृदयं यस्य सः अन्यहृदयः तस्य

MAID—(*With sorrow, to herself*) Alas! Her talk (bespeaks) an indifference to life! (*Aloud*) Princess, Manoharika has gone there already Perhaps, Prince Mitravasu may come just here

(*Enter Mitravasu*)

MITRAVASU—I have been ordered by my father thus "My son Mitravasu, Prince Jimutavahana is well observed by us as he lives near us, and is considered to be a worthy bridegroom Let the princess Malayavati, therefore, be offered to him in marriage ' Overcome with affection, however, I experience somehow a different kind of feeling For,

He is the ornament of the royal race of Vidyadharas, a

And I have heard that this Jimutavahana is just here in the sandal-bower near the temple of Gauri Here is the sandal-bower I shall just enter (*Enters*)

VIDU—(*Looking in confusion*) Friend, cover this maiden in the picture with this plantain leaf This Siddha Prince, Mitravasu, is coming here and may happen to see it

(*The Hero covers the picture with the plantain leaf*)

MITRA—(*Entering*) Prince, Mitravasu bows to you

HERO—(*Looking*) Welcome, Mitravasu (Please) be seated here

MAID—Princess, Prince Mitravasu has come

HEROINE—Maid, I am glad

HERO—Mitravasu, is the Siddha-king, Vishvavasu well?

MITRA—Father is well I have come to you at his command

भावोऽन्यहृदयत्वम् । परस्मिन्नधि पराधीनः । सप्तमी शौण्डैरिति समासः । अषडक्ष—अल्पुरुषाध्युत्तरपदात्खः । इति खः । निवेदितः आत्मा अभिप्राय. मलयवतीप्रतिपादनरूपो यैस्तान् । प्रत्याचक्षाण. प्रत्यादिशन् । अस्मत्प्रार्थना निराकुर्वन्नित्यर्थ. । प्रत्याख्यानेन प्रत्यादेशेन लघुः अनादृत इत्यथ । दौर्भाग्य दुर्भगत्व । प्रियकृतानादरादिति भावः । एव कलङ्कस्तेन मलिनम् । अन्तमतिक्रान्तमत्यन्त दु ख भजते तदत्यन्तदु.खभागि । सपृचा इति घिनुण् । तेन । अन्यदिव पश्यति ज्ञान विषयीभवतीति अन्यादृश । समानान्ययोश्चेति वाच्यम् इति कुञ् । जातजीवितवैराग्यमित्यथः । इहास्मिञ्जन्मनि । जन्मनीत्यत्र जन्मान्तरे इति पाठो न युक्त । मनोरथभूमिर्मनोरथालम्बनभूता । **न खल्विति** । हे मुग्धे सुन्दरि । अपि चात्म

७१ **नाय०** — किमाह तत्रभवान्।

७२ **नायि०** — श्रोष्यामि तावत्किं तातेन संदिष्टम्।

७३ **मित्रा०** — इदमाह तातः। अस्ति मे दुहिता मलयवती नाम जीवितमिवास्य सर्वस्यैव सिद्धराजान्वयस्य। सा मया तुभ्यं प्रदत्ता। तदियं प्रतिगृह्यतामिति।

७४ **चेटी** — (विहस्य सहर्षम्।) भर्तृदारिके किं न कुप्यसीदानीम्।

७५ **नायि०** — (सस्मितं सलज्जं चाधोमुखी स्थित्वा।) हञ्जे मा हस। किं विस्मृतं त एतस्यान्यहृदयत्वम्।

७६ **नाय०** (अपवार्य।) वयस्य संकटे पतिताः स्मः।

७७ **विदू०** — (अपवार्य।) भो जानामि न तां वर्जयित्वान्यस्मिंश्चित्तं तेऽभिरमते। तद्यथा तथा यत्किंचिदपि भणित्वा विसृज्यतामेषः।

७८ **नायि०** — (सरोषमात्मगतम्) हताश को वैतन्न जानाति।

७९ **नाय०** — मित्रावसो क इव नेच्छेत् भवद्भिः सह श्लाघ्यमीदृशं संबन्धम्। किन्तु न शक्यते चित्तमन्यतः प्रवृत्तमन्यतः प्रवर्तयितुम्। अतो नाहमेनां प्रतिग्रहीतुमुत्सहे।

८० **नायि०** — (मूर्च्छां नाटयति)

८१ **चेटी** — समाश्वसितु समाश्वसितु भर्तृदारिका।

८२ **विदू०** — भो पराधीनः खल्वेषः। किमेतेनानुनीतेन। गुरुजनमस्य गत्वाभ्यर्थय।

८३ **मित्रा०** — (स्वगतम्।) साधूक्तमनेन। नायं गुरुजनवचनमतिक्रामति। अस्य गुरुरप्यस्मिन्नेव गौर्याश्रमे प्रतिवसति। तद्यावद्गत्वास्य पित्रोर्मलयवतीं प्रतिग्राहयामि।

८४ **नायि०** — (समाश्वसिति।)

८५ **मित्रा०** — (प्रकाशम्।) (एवं निवेदितात्मनोऽस्मात्प्रत्याचक्षाण कुमार एव बहुतरं जानाति।)

१ प्रतिपादिता, प्रतिपाद्यते, प्रतिगृह्यतामिति. २ निवर्त०. ३ गुरुजनः. ४ पित्रोः—प्रतिपादयामि.

हितानभिज्ञे। एतत्साहसं स्वप्राणपरित्यागरूपं न खलु न खलु कार्यम्। सर्वथा न कर्तव्यमित्यर्थः। अत्यन्तानौचित्यप्रदर्शनार्थं वीप्सा। पल्लवस्य किसलयस्येवाभा यस्य तं किसलयकोमलं कर लताया व्यपनय दूरं नय। कुसुममपि विचेतुं लताया

HERO—What does His Majesty say?

HEROINE—Let me just hear my father's message

MITRA—My father says— "I have a daughter by name Malayavati who is, as if, the very life of this race of Siddha Kings She is offered to you (in marriage) by me So, (please) accept her"

MAID—(*Laughing, joyfully*) Princess, why are you not angry now?

HEROINE—(*Hanging down her face bashfully, with a smile*) Maid, do not laugh Have you forgotten that his heart is set on another?

HERO—(*Aside*) Friend, we are in a fix

VIDU—Sir, I know that your heart delights in none else except her Therefore, send him away by saying something or the other

HEROINE—(*Angrily, to herself*) Wretched man, who does not know this?

HERO—Mitravasu, who will not desire such an honourable connection with you? But it is not possible to turn the heart towards another when it is set on some one (else) Hence I cannot bring myself to accept her

(*The heroine gesticulates fainting*)

MAID—Take heart, Princess, take heart.

VIDU—Sir, he is indeed dependent on others What is the good of requesting him? Go to his elders and request (them)

MITRA—(*to himself*) He has spoken well He will not transgress the words of his elders His father also stays in this very hermitage of Gauri So, going there, I shall persuade his father to accept Malayavati.

(*Heroine recovers*)

MITRA—(*Aloud*) The Prince surely knows much more, in thus repudiating us who have expressed our hearts

---

आदातु यः न समर्थः इति मन्ये स उद्बन्धनाय पाश कठिनस्पर्शो कथं कलयति । गृह्णाति । मुच्यतामेष इति भावः । अत्र सुकुमारकरस्य पाशग्रहणरूपविरुद्धक्रियाभिधानात् विषमालङ्कारः । स च मन्य इत्युत्प्रेक्षया संसृष्टः । मालिनी वृत्तम् ॥ ११ ॥ भ्रातृप्रार्थनाया नायककृतं प्रत्याख्यान मनसि निश्चित्य सामर्षमाह अये मुञ्चेति । अभ्यर्थनीयः प्रार्थनीय. । मम भ्रातुः प्रार्थना तावत्त्वया नाङ्गीकृता । आस्ता तद् । अधुना मरणे कृतनिश्चयाया मम कथ तन्नानुमन्यस इति भावः । कण्ठ इति । येन करणेन हारलताया. योग्यः हारलतायोग्यस्तस्मिन् तव कण्ठे पाशः अर्पितः दत्तः ।

८६ **नायि०** — (सरोषं ।) कथं प्रत्याख्यानलघुर्मित्रावसुः पुनरपि मन्त्रयते

(मित्रावसुर्निष्क्रान्तः)

८७ **नायि०** — (आत्मगतम् । सास्रमात्मानं पश्यन्ती ।) किं ममैतेन दौर्भाग्यकलङ्कमलिनेनात्यन्तदुःखभागिनाद्यापि शरीरेण धारितेन । तदिहैवाशोकपादपेऽनया तिमुक्तलतयोद्बध्यात्मानं व्यापादयिष्यामि । तदेवं तावत् (प्रकाशं विलक्षस्मितेन ।) हञ्जे प्रेक्षस्व तावन्मित्रावसुर्दूरं गतो न वेति । येनाहमपीतो गमिष्यामि ।

८८ **चेटी** — यद्भर्तृदारिका आज्ञापयति । (कतिचित्पदानि गत्वा स्वगतम् ।) अन्यादृशमस्या हृदयं प्रेक्षे । न तावद्गमिष्यामि । इहैवापवारिता प्रेक्षे किमेषा प्रतिपद्यत इति ।

८९ **नायि०** — (दिशो विलोक्य पाशं पाणौ गृहीत्वा सास्रम् ।) भगवति गौरि यदि त्वयेह जन्मनि मे न कृतः प्रसादस्तदन्यस्मिन्नपि जन्मनि यथा नेदृशी दुःखभागिनी भवामि तथा कुरु । (कण्ठे पाशमर्पयति ।)

९० **चेटी** — (दृष्ट्वा ससंभ्रमम् ।) परित्रायध्वं परित्रायध्वं । एषा भर्तृदारिको-द्बध्यात्मानं व्यापादयति ।

९१ **नाय ०** — (ससंभ्रममुपसृत्य) कासौ कासौ ।

९२ **चेटी** — इयमशोकपादपे ।

९३ **नाय०** — (अवलोक्य सहर्षम् ।) कथं सैवेयमस्मन्मनोरथभूमिः (नायिकां पाणौ गृहीत्वा लतापाशमाक्षिपति ।)

न खलु न खलु मुग्धे साहसं कार्यमेतं-
व्यपनय करमेतं पल्लवाभं लतायाः ।
कुसुममपि विचेतुं यो न मन्ये समर्थः
कलयति स कथं ते पाशमुद्बन्धनाय ॥ ११ ॥

१ ०ममुपसृत्यः २ मेवं.

ऋ गतौ इति धातोः ण्यन्तात्कर्मणि क्तः । अर्तिह्रीत्यादिना पुक् । तादृशः सापराधः गृहीतः अयं ते करः कथं मुच्यते । विना दण्डमपराधी न मोक्तव्य इति भावः । अत्र कराविमोचने सापराधत्वस्य हेतुत्वेन कथनात्काव्यलिङ्गमलंकारः ॥ १२ ॥ मरणव्यवसायः मरणोद्योगः । साकूतं साभिप्रायम् । प्रतिपादयतः ददतः प्रवीष्टेति पाठे स एवार्थः । जातनिर्वेदया उत्पन्नवैराग्यया । सहर्षमिति । अन्यया-

HEROINE—(*Angrily*) How, Mitravasu, still talks something (with him), though disgraced by refusal

(*Exit Mitravasu*)

HEROINE—(*To herself, looking at herself with tears*) What is the use of still preserving this body, soiled by the stain of misfortune and suffering extreme misery? I shall, *therefore, kill myself by hanging (myself) from this Ashoka* tree just here with this Atimukta creeper (I shall say) this, then (*Aloud, with a forced smile*) Maid, just see whether Mitravasu has gone far or not, so that I may also go away from here

MAID—As the Princess commands (*Going a few steps,* to herself) I notice a change in her heart I shall not go away *Concealed in this very place, I shall see what she does*

HEROINE—(*Looking on all sides, taking a noose in the hand, with tears*) Goddess Gauri, if you have not shown me any favour in this life, then do so, in another life at least, that I may not suffer such misery (*Places the noose round the neck*)

MAID—(*Seeing, with excitement*) Help! Help! This princess is killing herself by hanging!

HERO—(*Approaching hastily*) Where is she, where is she?

MAID—Here at this Ashoka tree

HERO—(*Looking, with joy*) How now, it is indeed she, the object of my desire! (*Taking the heroine by the hand, he throws off the creeper-noose*)

Not indeed, o charming one, (or simple one) not indeed should this rash act be done Take off this hand, resembling a tender-leaf, from the creeper How can your hand, which, I imagine, is not able even to pluck a blossom, grasp the noose for hanging yourself? (11)

ज्ञानापगमेन हर्षः। **रत्नाकरादृत इति**। तथोदात्तवंशाद्विश्वावसोरन्यस्मात्कथमीदृशः कन्यारत्नस्य प्रसूतिरिति भाव। मम न प्रत्येषि मद्वचने न विश्वासः। चित्रावलोकनेनात्मनः सादृश्य निश्चित्यापि चेटीं सवादयितुमाह अहमिवालिखितेति। उत त्वमालिखिता तव प्रतिकृतिरियमित्यर्थः। दुर्जनीकृतास्मि मय्येव बद्धभावस्यास्य विपर्ययेण संभावनादिति भावः। **गान्धर्वो विवाह इति**। तदुक्त मनुना ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुर। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टम स्मृतः॥ तत्र गान्धर्वः—इच्छयान्योन्यसयोगः कन्यायाश्च वरस्य च। गान्धर्व. स तु विज्ञेयो मैथुन्यः काम सभव॥ इत्युक्तलक्षणः। निर्वृत्त अनुरागवतो. परस्परकरस्पर्शादिति भावः।

९४ **नायि०** — (ससाध्वसम् ।) हञ्जे कः पुनरेषः । (सम्यङ्निरूप्य सरोषं हस्तमाक्षिपति ।) अये मुञ्च मुञ्च मे अग्रहस्तम् । कस्त्वं निवारयितुम् । कथं मरणेऽपि त्वमभ्यर्थनीयः ।

नाय० —

कण्ठे हारलतायोग्ये येन पाशस्त्वयार्पितः ।
गृहीतः सापराधोऽयं स कथं मुच्यते करः ॥ १२ ॥

९५ **विदू०** — (चेटीमुपसृत्य ।) भवति किं पुनरस्या अस्य मरणव्यवसायस्य कारणम् ।

९६ **चेटी** — नन्वेष एव ते प्रियवयस्यः ।

९७ **नाय०** — कथमहमेवास्या मरणव्यवसायकारणम् । न खलु अवगच्छामि ।

९८ **विदू०** — भवति कथमिव ।

९९ **चेटी** — (साकूतम् ।) या सा ते प्रियवयस्येन कापि हृदयवल्लभा शिलातल आलिखिता तस्यां पक्षपातिनैतेन प्रतिपादयतोऽपि मित्रावसोर्नाहं प्रतिगृहीतेति जातनिर्वेदयानयैतद्व्यवसितम् ।

१०० **नाय०** — (सहर्षमात्मगतम् ।) कथमियमेवासौ विश्वावसोर्दुहिता मलयवती । (अथवा रत्नाकरादृते कुतश्चन्द्रलेखायाः प्रसूतिः ।) कष्टं मूनाग्वञ्चितोऽस्मि ।

१०१ **विदू०** — भवति यद्येवं तदनपराद्ध इदानीं प्रियवयस्यः । एषा खल्वालिखिता । अथवा यदि मम न प्रत्येषि ततः स्वयमेव गत्वा शिलातले प्रेक्षतां भवती ।

१०२ **नायि०** — (सहर्षं सलज्जं च नायकं पश्यन्ती हस्तमाकर्षति ।)

१०३ **नाय०** — (सस्मितम् ।) न तावन्मुञ्चामि यावन्मम हृदयवल्लभां शिलायामालिखितां न पश्यसि ।

(सर्वे चन्दनलताग्रहं प्रविशन्ति ।)

१ त्वया. २ (सानुशयं) कथं. ३ हा कथं वञ्चितोऽस्म्यनया.

प्रतीष्टा स्वीकृता । हीहीति आनन्दसूचकम् । अथवेति पक्षान्तरे । मिष्टालापपरं मम किंचिदियं तदाधुना विवाहोत्सवे ययेष्टं सिद्ध्येदिति हास्यार्थमुक्तिः । दास्याः पुत्रीति परिहासार्थम् । स्नपनकं स्नानार्थमभ्यङ्गादि द्रव्यम् । विविधेन तालेन

HEROINE—(*Timidly*) Maid, who again is he? (*Observing well, draws back her hand in anger*) O leave, let go my fingers Who are you to prevent me? Are you to be requested even for death?

HERO—

This guilty hand, by which a noose was placed on your neck worthy of a necklace, has been seized by me How can it be released? (12)

VIDU—(*Approaching the maid*) Madam, what may be the cause of her resolve to die thus?

MAID—Surely, this same dear friend of yours!

HERO—How am I the cause of her resolve to die? I don't understand

VIDU—Madam, how is it?

MAID—(*significantly*) This was attempted by her filled with despair because she was not accepted, though offered by Mitravasu, by this dear Friend of yours due to his partiality for some (other) beloved of his heart who was drawn by him on the stone-slab

HERO—(*With joy, to himself*) How? Is this very same (lady) Malayavati, the daughter of Visvavasu? Or why, whnece can the digit of the moon appear except from the ocean? Alas, I was misled a little!

VIDU—Lady, if it is so, my dear Friend is not at fault It is this very lady who has been drawn If you don't believe me, you may yourself go and have a look at the slab

(*The Heroine, looking at the hero joyfully and bashfully, draws back her hand*)

HERO—(*smiling*) I don't leave it until you see my beloved drawn on the slab

(*All enter the sandal bower*)

चरति विताल प्रयोजनमस्य इति वा वैतालिकः । चरति । प्रयोजनम् । इति वा ठक् । वृष्ट्या इति । इह मलये पिष्टात एव पिष्टातकः । पटवासकसज्ञ. सुगन्धि चूर्णविशेषः । तस्य वृष्ट्या मेरुतुल्या सुमेरुसदृशीं द्युतिं शोभा । तस्य पिञ्जरत्वात् दधानः सम्पादयन् । तथा च सद्यः तदानीमेव सिन्दूरस्य धूल्या चूर्णेन कृता विरचिता दिवसस्य समारम्भे प्रारम्भे सन्ध्यातपस्य सायकालिकसूर्यप्रकाशस्य श्री· शोभा येन तादृशः । दूरीकृतेति पाठे दूरीकृता न्यक्कृता दिवससमारम्भस्य सन्ध्यातपस्य च श्रीः येन स· । सिद्धलोकः विश्वावसुसम्बन्धिलोकः । अङ्गनाना कल्याणाङ्गीना 'युवतीना चला ये चरणा तेषु रणन्त शब्दायमाना ये नूपुरा·

१०४ **विदू०** — (कदलीपत्रमपनीय ।) भवति प्रेक्षस्व प्रेक्षस्व एतमस्य हृदयवल्लभ जनम् ।

१०५ **नायि०** — (निरूप्यापवार्य सस्मितम् ।) चतुरिके अहमित्रालिखिता ।

१०६ **चेटी** — (चित्राकृतिं नायिका च निर्वर्ण्य ।) भर्तृदारिके किं भणस्य हमित्रालिखितेति । ईदृशमस्या सादृश्य येन न ज्ञायते किं तावन्मणिशिलाया भर्तृदारिकाया प्रतिबिम्ब सक्रान्तमुत त्वमालिखितेति ।

१०७ **नायि०** — (विहस्य ।) (हञ्जे दुर्जनीकृतास्म्यनेन मा चित्रगता दर्शयता ।)

१०८ **विदू०** — भो भो निर्वृत्त इदानी ते गान्धर्वो विवाह । तन्मुञ्च तावदस्या अग्रहस्तम् । एषा खलु कापि त्वरितत्वरितेत एवागच्छति ।

१०९ **नाय०** — (ईषत्स्मित कृत्वा नायिका मुञ्चति ।)

(तत प्रविशति चेटी ।)

११० **चेटी** — (सहर्षं सहसोपसृत्य ।)—भर्तृदारिके दिष्ट्या वर्धसे । प्रतीष्टा त्व भर्तुर्जीमूतवाहनस्य गुरुभि ।

१११ **विदू०** — (नृत्यन् ।) ही ही भो सपूर्णा मनोरथा प्रियवय स्यस्य । अथवा नहि नहि भवत्या मलयवत्या । अथवा नैतयो । (भोजनमभिनयन् ।) गर्भैकस्य ब्राह्मणस्य ।

११२ **चेटी** — (नायिकामुद्दिश्य ।) आज्ञप्तास्मि युवराजमित्रावसुना यथा अद्यैव मलयवत्या विवाहोत्सवस्य मङ्गल सवृत्त भविष्यति । तल्लघु ता गृहीत्वागच्छेति । तदेहि गच्छाव ।

११३ **विदू०** — आ गता खलु त्व दास्या पुत्रि एना गृहीत्वा । वयस्येन किमिहैवावस्यातव्यम् ।

११४ **चेटी** — (विहस्य ।) हताश मा त्वरस्व । युष्माकमपि स्नपन वसागतमेव ।

१ आत्मान दर्शयन्

मञ्जीरसशा पादालङ्कारविशेषास्तेषामारावेण शिञ्जितेन हृद्यै मनोहरै उद्गीतै भवत जीमूतवाहनस्य सिद्धये अभीष्टसिद्ध्यर्थं भवाख्यानाय सिद्ध स्यादिति वा । उद्वाह स्नानवेला विवाहमङ्गलस्नानसमय सूचयति । अत्र मेरुस्यातपयोर्वृत्तेरुद्वहनस्यान्ये

VIDU—(*Removing the plantain leaf.*) Madam, behold, behold this person, the beloved of his heart!

HEROINE—(*Observing, aside with a smile*) Chaturika, it seems that I am painted

MAID—(*Looking carefully at the picture and the heroine*) Princess, why do you say "It seems that I am painted"? Such is the resemblance that it cannot be known whether it is your reflection on the jewelled slab or whether you are drawn (in a picture).

HEROINE—(*Smiling*) Maid, I am demeaned by him showing me in a picture (he has drawn)

VIDU—O sir, your Gandharva marriage (by mutual choice) is now completed So let go her hand Here is some one coming this way in great haste

(The Hero releases her hand with a gentle smile)

(*Enter a maid*)

MAID—(*Approaching hastily, with joy*) Princess, I congratulate you! You have been accepted by the parents of Jimutavahana

VIDU—(*Dancing*) Hurrah! the desires of my dear friend are fulfilled, or no, no, (the desires) of your ladyship Malayavati, or rather not of these two, (*Jimutavahana* and Malayavati, (*gesticulating eating*) of me alone, a Brahmin!

MAID—(*To the heroine*) I have been ordered by Prince Mitravasu thus— "This very day the auspicious function of the marriage of Malayavati will take place Go, therefore, and bring her quickly" So come, we shall go

VIDU—Oh, you are gone, o wretched girl, (lit daughter of a whore) taking her with you Should my friend stay here alone?

MAID—(*Laughing*) O wretched man, do not be impatient Your bathing time has also approached

---

नासभवत्वात्तत्सदृशीमिति उपमापर्यवसानान्निदर्शनालङ्कारः । स्रग्धरावृत्तम् ॥ १३ ॥

अन्योन्येति । समानानि तुल्यानि रूप च अनुरागश्चकुल च वयश्च रूपानुरागकुलवयासि येषा तेषा पुण्यवतामत एव केषाचिदेव । नतु सर्वेषाम् । अन्योन्यस्मिन्वा प्रीतिस्तया कृतः समागमो विवाहः भवतीति मन्ये । अत्र वात्स्यायनः–। यस्या मनश्चक्षुषोः प्रवृत्तिस्तस्यामृद्धिः । सवर्णायामनन्यपूर्वाया शास्त्रतोधिगताया धर्मोर्थ·...पक्षवृद्धिरनुपस्कृता रतिश्च । इति । आर्या छन्दः ॥ १४ ॥ इति श्री नागानन्दटीकायामर्थबोधिन्या द्वितीयोऽङ्कः ॥

११५ नायि० — (सानुरागं सलज्जं च नायकं पश्यन्ती सपरिवारा निष्क्रान्ता।)

(नेपथ्ये वैतालिकः पठति ।)

चूर्णैर्थो पिष्टातकस्य द्युतिमिह मलये मेरुतुल्यां दधानः
[illegible]
[illegible]
रुद्धाहस्नानवेलां कथयति भवतः सिद्धये सिद्धलोकः ॥ १३ ॥

११६ विदू० — (समाकर्ण्य ।) भो वयस्य दिष्ट्यागतं स्नपनकम् ।

११७ नाय० — (सहर्षं ।) सखे यद्येवं तत्किमिदानीमिह स्थितेन । तदागच्छ । आवामपि तात नमस्कृत्य स्नानभूमिमेव गच्छाव ।

अन्योन्यप्रीतिकृतः समानरूपानुरागकुलवयसाम् ।
केषाञ्चिदेव मन्ये समागमो भवति पुण्यवताम् ॥ १४ ॥

इति निष्क्रान्ताः सर्वे ।

॥ इति द्वितीयोऽङ्कः ॥

१ चूर्णैः. २ दूरीकृत. ३ मुक्ता. ४ गीतैः सिद्धा. ५ सममनुरणयन्; अरुणमणिरणन्. ६ पुरह्लाद, रम्यैः.

(Exit the Heroine, lovingly and bashfully looking at the hero, and the retinue)

(Behind the curtain the bard recites)

Imparting to the Malaya mountain here the splendour of the Mountain Meru, by a shower of perfumed yellow powder and all at once giving to the morning the beauty of the evening twilight by means of the Sindura powder, the Siddha people proclaim the hour of your marriage — bath for the accomplishment of your desires, by the loud songs of women, delightful on account of the sound of the jingling anklets on their moving feet (13)

VIDU—(*Listening*) Friend, luckily the time for your bath has come

HERO—(*With joy*) Friend, if so, why should we stay here? Come then We shall also go to the bathing place after saluting the father

I think that the union brought about by mutual love of two persons, who are alike in beauty, affection, birth and age, takes place only in the case of the fortunate few (14).

(*Exeunt all*)

END OF ACT II

तृतीयोऽङ्कः ।

(ततः प्रविशति मत्तो विचित्रविह्वलवेषश्चषकहस्तो विटः स्कन्धारोपितसुराभाण्डश्चेटश्च ।)

१ विटः — (सहर्षम् ।)

नित्यं यः पिबति सुरां जनस्य प्रियसंगमं च यः कुरुते ।
मन्ये द्वाविव देवौ बलदेवः कामदेवश्च ॥ १ ॥

(घूर्णमानः ।) सफलं खलु मम शेखरकस्य जीवितम् ।

वक्षःस्थले दयिता नीलोत्पलवासिता मुखे मदिरा ।
शीर्षे च शेखरको नित्यमेव संस्थितो यस्य ॥ २ ॥

(प्रस्खलन् ।) अरे को मां चालयति । (सहर्षम् ।) अवश्यं नवमालिका मां परिहसति ।

२ चेटः — भट्टक न तावदागता नवमालिका ।

३ विटः — (सरोषम् ।) (प्रथमप्रहर एव मलयवत्या विवाहमङ्गलं निर्वृत्तम् । तत्कस्मात्सेदानीं प्रभातेऽपि नागच्छति । (विचिन्त्य सहर्षम् ।) (अथ वाद्यास्मिन्मलयवतीविवाहमङ्गलमहोत्सवे सर्व एव निजप्रणयिनीजनसनाथं सिद्धविद्याधरलोकः कुसुमाकरोद्यान आपानकसुखमनुभवतीति तर्कयामि ।) तत्रैव नवमालिका मामवेक्षमाणा तिष्ठति । तदहमपि तत्रैव गमिष्यामि । कीदृशो नवमालिकया विना शेखरकः । (प्रस्खलन् परिक्रामति ।)

अथ तृतीयाङ्के गताङ्कावसानप्रस्तुते विवाहे निर्वृत्ते अवसरप्राप्तसंभोगोपक्रमे शृङ्गारहास्यकरुणानां कैशिकीवृत्त्याश्रितत्वात्कैशिक्याश्च नेतृव्यापाररूपायाः— नर्म च नर्मस्फूर्जो नर्मस्फोटोऽथ नर्मगर्भश्च । इत्युक्तेषु चतुर्ष्वङ्गेषु नर्मणः—वैदग्ध्यक्रीडितं नर्म प्रियोपच्छन्दनात्मकम्—इति लक्षितस्य हास्याङ्गत्वेन रसान्तराङ्गत्वात्तन्निर्वाहार्थं विकृतवेषभाषाणां विटविदूषकचेटादीनां प्रवेशं प्रस्तौति । तदुक्तं—विकृताचारैर्वाक्यैरङ्गविकारैश्च विकृतवेषकृतैः । हासयति जनं यस्मात्तस्माज्ज्ञेयो रसो हास्यः ॥ स्त्रीनीचप्रकृतिष्वेव भूयिष्ठं दृश्यते रसः । इति । तत्रादौ हास्यरसस्य शृङ्गारजन्यत्वाद्विटचेटयोः शृङ्गारसहाययोः प्रवेशः । तदुक्तं दर्पणे—शृङ्गारेऽस्य सहाया विटचेटविदूषकाद्याः स्युः । भक्ता नर्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः ॥ इति । विटलक्षणं च तत्रैव—सम्भोगहीनसम्पद् विटस्तु धूर्तः कलैकदेशज्ञः । वेशोपचार-

ACT III

(Then enters the intoxicated Vita in a strange and disordered dress, with a drinking cup in the hand, and a Cheta, with a liquor pot placed on his shoulders)

VITA—I think that these two alone are Gods, Baladeva (i e Balarama), who always drinks wine and Kamadeva (the God of love), who brings about the union of a person with his beloved (1)

(*Reeling about*) Successful, indeed, is the life of me, Shekharaka

On whose bosom is the beloved, in whose mouth is the wine scented with a blue lotus, and on whose head the wreath of flowers is always resting (2)

(*Stumbling*) Ah, who is pushing me? (*With joy*) Surely Navamalika is playing a joke on me

CHETA—Master, Navamalika has not yet come

VITA—(*Angrily*) The auspicious marriage-ceremony of Malayavati was finished just in the first watch of the night Why then does she not come even now at dawn? (*Reflecting with joy*) Or I think that all the Siddha and Vidyadhara people, accompanied by their beloveds are enjoying the pleasure of drink in the Kusumakara garden on this festive occasion of Malayavati's marriage, today, and Navamalika is waiting for me just there So I too will go just there What is Shekharaka (also, a wreath of flowers) without Navamalika (Jasmine)? (*Moves about stumbling*)

कुशलो वाग्मी मधुरोय बहुमतो गोष्ठयाम् ॥ इति । मत्त· पानक्षीबः । विचित्रः विह्वलः विकृत इतस्ततश्चलितो वा वेषो यस्य । चपकः पानपात्र हस्ते यस्य स तथोक्त· । नित्यमिति । यः नित्य सुरा पिबति यश्च जनस्य प्रियेण सङ्गम करोति तौ यथाक्रम बल्देवो बलभद्र कामदेवश्च देवौ इव मन्ये । मम तौ द्वावेव देवते इति पाठे मममते तावेव द्वौ देवौ इत्यर्थः । नित्य सुरापान प्रियासङ्गमश्चेति द्वयमिष्टतममतस्तन्मतानुसारेणेयमुक्ति ॥ १ ॥ घूर्णमान मदात्स्खलन् । वक्षस्थल इति । यस्य मम वक्षस्थले दयिता प्रिया मुखे नीलोत्पलेन वासिता सुरभीकृता मदिरा च नित्य एव स्थिता शीर्षे च शेखर नित्य स्थित । तस्य मम जीवित सफलमिति पूर्वेण सम्बन्ध. । शेखरकोह बलदेवकामदेवाभ्यामपि गुणैर्गरीयानित्यपि ध्वनि. ॥ २ ॥

४ चेटः—एतु एतु भट्टकः । इदं कुसुमाकरोद्यानम् । तत्प्रविशतु भट्टकः ।

(उभौ प्रवेशं नाट्यतः ।)

(ततः प्रविशति स्कन्धन्यस्तवस्त्रयुगलो विदूषकः ।)

५ विदू०—श्रुतं खलु मयाद्य प्रियवयस्यः कुसुमाकरोद्यानं गमिष्यतीति । तद्यावत्तत्रैव गमिष्यामि । (परिक्रम्यावलोक्य च ।) इदं कुसुमाकरोद्यानम् । तत्प्रविशामि । (प्रविश्य भ्रमरबाधां नाटयन् ।) अरे कस्मात्पुनरेते दुष्टमधुकरा मामेवाभिभवन्ति । (आत्मानमाघ्राय ।) भवतु ज्ञातम् । यन्मलयवत्या बन्धुजनेन जामातुः प्रियवयस्य इति कृत्वा सबहुमानं सुगन्धवर्णकैर्विलिप्तोऽस्मि संतानकशेखरश्च मम शीर्षे पिनद्धः स खल्वेषोऽत्यादरोऽनर्थीभूतः । तत्किमिदानीमत्र करिष्यामि । अथ वा एतेनैव मलयवत्याः सकाशाल्लब्धेन रक्तांशुकयुगलेन स्त्रीवेषं विधायोत्तरीयकृतावगुण्ठनो गमिष्यामि । प्रेक्षे तावत्किं दास्याः पुत्रा दुष्टमधुकरा करिष्यन्तीति । (तथा करोति ।)

६ विटः—(निरूप्य सहर्षम् ।) अरे चेट । (अङ्गुल्या निर्दिशन् सहासम् ।) एषा खलु नवमालिका मां प्रेक्ष्याहं चिरस्यागत इति कुपिता अवगुण्ठनं कृत्वान्यतो गच्छति । तत्कण्ठे गृहीत्वा प्रसादयाम्येनाम् ।

(सहसोपसृत्य विदूषकं कण्ठे गृहीत्वा मुखे ताम्बूलं दातुमिच्छति ।)

७ विदू०—(मदगन्धं सूचयन् ।) दूरं रे दूरम् (इति नासिकां पिधाय परावृत्य स्थित्वा ।) कथमेकेषां दुष्टमधुकराणां सकाशात्परिभ्रष्ट इदानीमन्यस्य दुष्टमधुकरस्य मुखे पतितोऽस्मि ।

८ विटः—कथं कोपेन पराङ्मुखीभूता । भवतु । पादयोः पतित्वा प्रसादयामि । (प्रणामं कुर्वन्विदूषकस्य चरणावात्मनः शिरसि कृत्वा ।) प्रसीद नवमालिके प्रसीद ।

परिहरति मां त्याजयित्वा परिहारं करोतीत्यर्थः । निजः यः प्रणयिनीजनः प्रियाजनहस्तेन युतः । आपानकसुखं मद्यपानजन्यसुखम् । कीदृश इति । नवमालिका नाम चेटी । तया विना तया असहृतः शेखरकः कीदृशः । तस्य का शोभा इत्यर्थः । पक्षे नवमालिका पुष्पविशेषस्तया विना शेखरकः शिरोभूषणमाल्यम् । स्कन्धे न्यस्तं वस्त्रयुगलं येन । अभिभवन्ति अनुबध्नन्ति । सुगन्धवर्णकैः सुगन्धिद्रव्यैः । सन्तानकानां देवतरुपुष्पाणां शेखरः आपीडः । पिनद्धः बद्धः ।

CHETA—Come along, Master Here is the Kusumakara garden My master enter

(*Both gesticulate entering*)

(*Then enter the Vidushaaka with a pair of clothes on his shoulders*)

VIDU—I have heard that my dear friend would go to the Kusumakara garden today So I shall just go there only
This is the Kusumakara Garden
esticulating molestation by the
bees attack me alone? (*Smelling himself*) Ah, I know! I am besmeared with scented pastes and a wreath of Santanaka flowers is fastened on my head by Malayavati's relatives out of great respect knowing that I am the dear friend of the son-in-law This great honour has become a cause of this misfortune! So, what shall I do now in this matter? or rather, dressing (myself) like a woman with this pair of red garments obtained from Malayavati and veil

VITA—(*Observing, with joy*) Oh Cheta! (*pointing with the finger, laughing*) Here indeed is Navamalika, who, having seen me has become angry thinking that I am late and is walking another way, veiling her face I shall, therefore, embrace her (lit take her by the neck) and pacify her (*Advancing hastily and embracing Vidushaka, wishes to offer the betel-roll in his mouth*)

VIDU—(*Indicating the smell of wine*) Go away Fellow, go away How now, escaping from one kind of wicked Madhukaras (bees), I have fallen into the jaws of another wicked Madhukara (drunkard)

VITA—How, she has turned away her face in anger Well, I shall pacify her by falling at her feet (*Bowing and placing Vidushaka's feet on his head.*) Be pleased, Navamalika, be pleased

---

अनर्थीभूतः भ्रमरबाधाकारणमित्यर्थः। उत्तरायेण उपरिवस्त्रेण कृतमवगुण्ठन शरीरावरण येन सः। मधु करे यस्य स मधुकरः नित्यमद्यसेवी दुष्टश्वासो मधुकरश्च तस्य। पराङ् मुख यस्याः सा पराङ्मुखी। रजन्या यो विरहस्तेन जनिता उत्कण्ठा यस्य।

हरिहरेति। हे नवमालिके। गर्व. अस्य सजातः असौ गर्वितः सन् हरिहरपितामहान। विष्णुशिवब्रह्मणामपि यः न नमस्करोति स शेखरकस्ते चरणयो पतति। हरिहरपितामहेभ्योपि त्वा श्रेष्ठतरा गणयामीति प्रसीदेति भाव॰ ॥ २ ॥ परस्य

(ततः प्रविशति चेटी ।)

९ चेटी — *आज्ञप्तास्मि भर्तृदारिकया मलयवत्या जनन्या । हञ्जे नवमालिके कुसुमाकरोद्यानं गत्वोद्यानपालिकां पल्लविकां भण । अद्य सविशेषं तमालवीथिकां सज्जीकुरु । मलयवत्या सहितेन जामात्रा तत्र गन्तव्यमिति । आज्ञप्ता च मया पल्लविका । तद्यावद्रजनीविरहजनितोत्कण्ठं प्रियवयस्यं शेखरकमन्विष्यामि ।* (दृष्ट्वा ।) *एष शेखरकः ।* (सरोषम् ।) *कथमन्यां कामपि स्त्रियं प्रसादयति । तदिह स्थितैव जानामि का एषेति ।*

विटः—

हरिहरपितामहानामपि गर्वितो यो न जानाति नन्तुम् ।
स शेखरकश्चरणयोस्तव नवमालिके पतति ॥ ३ ॥

१० विदू० — *दास्याः पुत्र मत्तबालक कुतोऽत्र नवमालिका ।*

११ चेटी — (निरूप्य सस्मितम् ।) *कथमहमिति कृत्वा मदपरवशेन शेखरकेणार्यात्रेयः प्रसाद्यते । तद्यावदलीककोपं कृत्वा द्वावप्येतौ परिहसिष्यामि ।*

१२ चेटः — (नवमालिकां दृष्ट्वा शेखरकं हस्तेन गृहीत्वा चालयन् ।) *भट्टक मुञ्च मुञ्चैतम् । न भवत्येषा नवमालिका । एषा पुना रोषारक्ताभ्यां लोचनाभ्यां प्रेक्षमाणेत एवागच्छति ।*

१३ चेटी — (उपसृत्य ।) *शेखरक का खल्वेषा प्रसाद्यते ।*

१४ विदू० — (अवगुण्ठनमपनीय ।) *अहं मन्दभागधेयायाः पुत्रः ।*

१५ विटः — (विदूषकं निरूप्य सरोषमुत्थाय च ।) *अरे कपिलमर्कटक त्वमपि मां शेखरकं परिहससि । अरे चेट गृहाणैनं यावन्नवमालिकां प्रसादयामि ।*

१६ चेटः — *यद् भट्टक आज्ञापयति ।*

१७ विटः — (विदूषकं विमुच्य चेट्याः पादयोः पतति ।) *प्रसीद नवमालिके प्रसीद ।*

१८ विदू० — (स्वगतम् ।) *एष खल्वपक्रमितुमवसरः ।* (पलायितुमिच्छति ।)

वशः परवशः मदेन परवशः मदपरवशः । अलीकं कोपं कृत्वा मिथ्याकोपं प्रदर्श्येत्यर्थः । कपिलमर्कटकवर्णरञ्जितगात्रत्वात्कपिलवर्णत्वं । मर्कटसादृश्यं तु विदूषकस्य प्रसिद्धमेव । तथा च विक्रमोर्वशीये—एष खलु आलिखित वानर इव आर्यमाणवकस्तिष्ठति । इति । यज्ञार्थे धृतमुपवीतं यज्ञोपवीतम् । शाकपार्थिवादिः ।

(Then enters a Maid)

MAID—I am ordered by the mother of Princess Malayavati thus— *"Maid Navamalika, go to the Kusumakara garden* and say to Pallavika the garden-keeper, 'Decorate the Tamala avenue with special care The son-in-law, together with Malayavati, would be going there'" I have conveyed the order to Pallavika So I shall just find out my dear friend Sekharaka whose longings (must) [illegible] night *(Looking)* Here [illegible] coaxing some other wo[illegible] who she is

VITA—O Navamalika, that Shekharaka, the proud one, who does not know to bow down even to Vishnu, Shiva or Brahma, falls at your feet

VIDU—O whore's son! drunken fellow! where is Navamalika here?

MAID—*(Observing with a smile)* Why, the venerable Atreya is solicited by the drunken Sekhareka under the influence of wine, thinking that it is I Now feigning anger I shall make fun of them both

CHETA—*(Seeing Navamalika serving Shekharaka by the hand and shaking him)* Master, leave her, leave her This is not Navamalika She is coming here, looking with eyes red with anger

MAID—*(Approaching) Sekharaka, who is this that is* coaxed by you?

VIDU—*(Removing the veil)* I, the son of an unfortunate woman

VITA—*(Observing Vidushaka and rising up angrily)* You brown monkey, you too are playing a joke upon me, Sekharaka? Servant, hold him while I appease Navamalika

CHETA—As my master commands

VITA—*(Leaving Vidushaka, falls at the feet of the maid)* Be pleased, Navamalika, be pleased

VIDU—*(To himself)* This is the time for me to escape (Wishes to run away)

खलीकृतः न खलः अखलः अखलः खलः सम्पद्यमानः कृतः खलत्वसदर्शितः । तर्जनादिनावमानित इत्यर्थः । सम्बन्धीति असत्स्वामिना मित्रावसुना सह जातसम्बन्धस्य जीमूतवाहनस्य मित्रमित्यसत्सम्बन्ध्यपि मयानिति ।

१९ **चेटः** — (विदूषकं यज्ञोपवीते गृह्णाति तच्च त्रुट्यति ।) क क कपिल-मर्कटक पलायसे । (तदुत्तरीयेण कण्ठे बध्वाकर्षति ।)

२० **विदू॰** — भवति नवमालिके प्रसीद मोचय माम् ।

२१ **चेटी** — (विहस्य ।) यदि भूमौ शीर्षं निवेश्य पादयोर्मे पतसि तन्मोचयिष्यामि ।

२२ **विदू॰** — (सरोषं सकम्पं च ।) भो गन्धर्वराजमित्रं ब्राह्मणो भूत्वा दास्याः पुत्र्याः पादयोः पतिष्यामि ।

२३ **चेटी** — (अङ्गुल्या तर्जयन्ती सस्मितम् ।) इदानीमेव पातयिष्यामि । शेखरक उत्तिष्ठ । प्रसन्ना खलु तेऽहम् । एष पुनर्जामातुः प्रियवयस्यो ब्राह्मणस्त्वया खलीकृतः । एतच्छ्रुत्वा कदापि भर्ता मित्रावसुः कोपं करोति । तदादरेण संमानयैनम् ।

२४ **विटः** — यन्नवमालिकाज्ञापयति । (विदूषकं कण्ठे गृहीत्वा ।) आर्य त्वं प्रियसंबन्धिक इति कृत्वा मया परिहसितः । (मस्तकं घूर्णयन् ।) किं सत्यमेव शेखरको मत्तवालकः ।

२५ **विदू॰** — न हि न हि ।

२६ **विटः** — (सदर्पम् ।) तत्कृतः परिहासः । (उत्तरीयं वर्तुलीकृत्य विदूषकासनं ददाति ।) इहोपविशतु संबन्धिकः ।

२७ **विदू॰** — (स्वगतम् ।) दिष्ट्यापगत इवास्य मदावेगः । (उपविशति ।)

२८ **विटः** — नवमालिके उपविश त्वमप्येतस्य समीपे येन द्वावपि युवां सममेव संमानयिष्यामि ।

२९ **चेटी॰** — (विहस्योपविशति ।)

३० **विटः** — रे चेट सुभरितं खल्वेतच्चषकं कुर्वच्छसुरया ।

३१ **चेटः** — (नाट्येन चषकभरणं करोति ।)

३२ **विटः** — (स्वशिरःशेखरात्पुष्पाणि गृहीत्वा चषके विन्यस्य जानुभ्यां स्थित्वा नवमालिकाया उपनयति ।) नवमालिके आस्वाद्य देह्येतदेतस्य ।

३३ **चेटी** — (सस्मितम् ।) यच्छेखरको भणति । (तथा करोति ।)

नवमालिकाया मुखसंसर्गेण मुखसङ्गमेन वर्धितः रसो यस्य । पाठान्तरे मुख-संसर्गवासेन सविशेषं वर्धितः रसो यस्य । ब्रह्मार्थं धृतं सूत्रं ब्रह्मसूत्रं यज्ञोपवीतम् ।

CHETA—(*Catches Vidushaka by the sacred thread, it snaps*) Where, indeed are you running, O brown monkey? (*drags him by fastening his upper garment round his neck*)

VIDU—Madam Navamalika, be pleased, release me

MAID—(*Laughing*) If you will place your head on the ground and fall at my feet, then I shall have you released

VIDU—(*Trembling, with anger*), What, being a Brahmin and a friend of the Gandharva king, shall I fall at the feet of a [illegible] orn woman)?

[illegible] *with her fingers and smiling*) [illegible] down Sekharaka, get up I am pleased with you But this Brahmin, a dear friend of the son-in-law, is ill-treated by you On hearing this, Mitravasu might perhaps get angry So honour him with due respect

VITA—As Navamalika commands (*Clasping Vidushaka by the neck*) Sir, this joke was played by me, because you are a relative (*Reeling his head,*) Is it true that Sekharaka is a drunken fellow?

VIDU—No, No

VITA—(*Joyfully*) Then, enough of joking (*Folding his upper garment into a coil, offers — as a seat to Vidushaka*) May the relative sit here

VIDU—(*To himself*) Luckily, his intoxication seems to have gone away (*Sits*).

VITA—Navamalika, you too sit near him, so that I shall honour both of you together

(*Maid laughs and sits down*)

VITA—Servant, fill this cup to the brim with good wine (*Cheta gesticulates filling the cup Vita takes some flowers from the crest on his head, puts them in the cup and kneeling, offers it to Navamalika*) Navamalika, taste it and offer it to him

MAID—(*Smiling*) As Sekharaka says (*does accordingly*)

श्यावपार्थिवत्तमागः । नवसूत्रेति पाठे नव सूत्राणि यस्य तत् । सीधुगन्धेन मद्यगन्धेन । आपानकं पानगोष्ठिकाम् । अयोग्यः कालः अकालः अकाले मृत्युः अकालमृत्युः । रूपिणीं मूर्तिमतीम् । अथ अनुरूपगृहिणीलाभसमेधितस्य नायकस्य सम्भोगशृङ्गारं वर्णयितुमुपक्रमते । तत्रादौ नवोढानुवर्तने निसर्गत एव प्रवीणस्तस्या वयोवस्थानुरूपेण रतिवैलोम्येन प्रीयमाणः तस्या वामतामनुमोदमानश्चात्मनः प्रीतिपरिपोषं दर्शयति—दृष्टेत्यादिना । नवोढा नवपरिणीता प्रिया अद्य वामतयैव मे सुतरामधिकं प्रीत्यै जाता । वामता अनुवृत्तेरनङ्गीकरणं प्रतिकूलाचरणं च । तदेव

२४ **विटः**—(विदूषकस्य चषकमुपनयन्।) एतन्नवमालिकामुखसंसर्गवर्धितरसं शेखरकादन्येन केनाप्यनास्वादितपूर्वम्। तत्पिबैतत्। किं तेऽत परं संमानं करिष्यामि।

२५ **विदू०**—(सविलक्षस्मितम्।) शेखरक ब्राह्मणः खल्वहम्।

२६ **विटः**—यदि त्वं ब्राह्मणस्तत् क्व ते ब्रह्मसूत्रम्।

२७ **विदू०**—(यज्ञोपवीतं स्वशरीरेऽदृष्ट्वा।) तत्खल्वनेन चेटेनाकृष्यमाणं छिन्नम्।

२८ **चेटी**—(विहस्य।) यद्येवं तद्वेदाक्षराण्यपि तावत्कतिचिदुदाहर।

२९ **विदू०**— भवति सीधुगन्धेन पिनद्धानि मे वेदाक्षराणि। अथ वा किं मम भवत्या सह विवादेन। एष ब्राह्मणः ते पादयोः पतति। (इति पादयोः पतितुमिच्छति।)

४० **चेटी**—(हस्ताभ्यां निवार्य।) मा खलु मा खल्वेवं करोत्वार्यः। (शेखरकं प्रति।) शेखरक सत्यं खलु ब्राह्मण एषः। (विदूषकस्य पादयोः पतित्वा।) आर्य न त्वया कुपितव्यम्। संबन्धिकानुरूपः खल्वेष मया परिहासः कृतः।

४१ **विटः**—अहमप्येनं प्रसादयामि। (पादयोर्निपत्य।) मर्षयतु मर्षयत्वार्यो यदपरवशेन यन्मयापराद्धम्। येनाहं नवमालिकया सहापानकं गमिष्यामि।

४२ **विदू०**—मर्षितं मया सर्वम्। गच्छतं युवाम्। यावदहमपि प्रियवयस्यं प्रेक्षे।

४३ **विटः**—आर्य तथा।

(निष्क्रान्तो नवमालिकया सह विटश्चेटश्च।)

४४ **विदू०**—दिष्ट्याऽतिक्रान्तो ब्राह्मणस्याकालमृत्युः। तदहमपि मत्तवालकसङ्गदूषित इह दीर्घिकायां स्नात्वा प्रेक्षे प्रियवयस्यम्। (तथा करोति। नेपथ्याभिमुखमवलोक्य।) एष खलु प्रियवयस्यो रूपिणीमित्रै स्वयंवरलक्ष्मीं मलयवतीं हस्तेऽवलम्ब्य इत एवागच्छति। तद्यावदस्य पार्श्वपरिवर्ती भवामि।

१ मे वेद० णद्धाणि (नद्धानि). २ रुक्किणीं विअ हरी (रुक्मिणीं इव हरिः)

प्रतिपादयति—मया दृष्टा सकौतुकानुरागमिति शेषः। अपि साम्मुख्यं न याति किंतु दृष्टिमिषः ददाति। न वस्त्वन्तरे ददाति। अनेन लज्जैवात्र हेतुरिति ध्वनि-

VITA—(*Offering the cup to Vidusaka*) This (is the wine), whose flavour is enhanced by its contact with Navamalika's mouth and never before tasted by any one other than Shekharaka So drink this What greater honour can I show you?

VIDU—(*With an embarrassed smile,*) Shekharaka, I am a Brahmin!

VITA—If you are a Brahmin, then where is your sacred thread?

VIDU—(*Not finding the sacred thread on his person,*) It was snapped when I was dragged by this servant

MAID—(*Laughing*) If so, recite at least a few words from the Veda

VIDU—The Vedic words are held back for me by the smell of wine But then, what is the use of arguing with you? Here does a Brahmin fall at your feet (*Wishes to fall at her feet*)

MAID—(*Preventing him with her hands*) No, No, don't do so, Sir (*To Sekharaka*) Sekharaka, he is truly a Brahmin (*Falling at the feet of Vidusaka*) Sir, you should not get angry This joke was played by me (on you) as befitting a relative by marriage

VITA—I too shall propitiate him (*Falling at his feet*) May your honour pardon me for the offence I gave you under the influence of wine Then I shall go to the drinking booth with Navamalika

VIDU—Everything is forgiven by me Go away, both of you, while I too shall visit my friend

VITA—Sir, we shall do so

(*Exeunt Vita and Cheta with Navamalika*)

VIDU—Luckily, the untimely death of a Brahmin has been averted I, too, polluted by contact with the drunken fellow, shall bathe in this tank and see my friend (*Does accordingly, looking towards the curtain*) My dear friend too [illegible] e hand Malayavati who is like [illegible] choice), in a human form I [illegible] s side

---

तम् । एव सर्वत्र । आभाषिता आभिमुख्येन आलापिता आलाप प्रतिभाषण न कुरुते । शय्यायां कथञ्चित्सखीभि प्रवर्तिता परिवृत्य । न तु मदभिमुख । तिष्ठति । बलादालिङ्गिताश्लिष्टा सती वेपते । सखीषु वयस्यासु येनापि मिषेण निर्यान्तीषु वासभवनाद्गर्भागारात् । गर्भागारो वासगृहम् इत्यमर । निर्गन्तुमेव ईहते वाञ्छति चेष्टते वा । स्वभावोक्तिरलङ्कार । कारकदीपक च । शार्दूलविक्रीडितं वृत्तम् ॥ ४ ॥

(ततः प्रविशति विवाहवेषालङ्कृतो नायको मलयवती विभवतश्च परिवारः ।)

४५ **नाय०** — (मलयवतीं निरूप्य ।)

दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति बलादालिङ्गिता वेपते ।
निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
जाता वामतयैव मेऽद्य सुतरां प्रीत्यै नवोढा प्रिया ॥ ४ ॥

(मलयवतीं पश्यन् ।) प्रिये मलयवति ।

हुङ्कारं ददता मया प्रतिवचो यन्मौनमासेवितं
यद्वा वानलदीप्तिभिस्तनुरियं चन्द्रातपैस्तापिता ।
ध्यातं यच्च वहन्त्यनन्यमनसा नक्तंदिनानि प्रिये
तस्यैतत्तपसः फलं मुखमिदं पश्यामि यत्तेऽधुना ॥ ५ ॥

४६ **नायि०** — (अपवार्य ।) हञ्जे चतुरिके न केवलं दर्शनीयः प्रियमपि भणितुं जानाति ।

४७ **चेटी** — (विहस्य ।) अयि प्रतिपक्षपाति (वादि)-नि सत्यमेवैतत् । किमत्र प्रियवचनम् ।

४८ **नाय०** — चतुरिके आदेशय मार्गं कुसुमाकरोद्यानस्य ।

४९ **चेटी** — एतु एतु भर्ता ।

५० **नाय०** — (परिक्रामन्नायिका निर्दिश्य ।) स्वैरं स्वैरमागच्छतु भवति । यतः ।

१ दधाति. २ याता. ३ हुंकारः. ४ स्नापिता. ५ यत्सुव. ६ परिक्रम्य.

तव मुखदर्शनं मदतपसः फलमिति प्रतिपादयन् विरहज्वरस्य तपोरूपतामारोप्याह—हुंकारमिति । हे प्रिये दयिते मया वचसि वचसि प्रतिवचः प्रतिवचनं हुंकारं ददता । हुमित्यङ्गीकारद्योतकः शब्दो नादमात्रः । हुंकारेण प्रतिवचनं ददतेत्यर्थः । यद्वा हुंकारमेव प्रतिवचः प्रत्युत्तरं ददता इति योज्यम् । अनुरूपभावो नैषधे — मौनिन्यामेव सा तस्या तदुक्तीरिव शृण्वती । वादं वादं मुहुश्चक्रे हुं हुमित्यन्तरान्तरा ॥ यन्मौनमासेवितं वाङ्नियमनरूपं व्रतमाचरितम् । यन्मया इयं तनुः । दावाग्नेर्वनवह्नेः इव दीप्तिः ताप इत्यर्थः येषां तथोक्तैः चन्द्रातपैः विरहित्वाद्दुष्णैरिव भासमानैः चन्द्रकिरणैस्तापिता प्रोषिता ।

(Enter the Hero, decked in Wedding-dress, Malayavati and retinue according to rank)

HERO—*(Observing Malayavati)*

When looked at, she casts down her eyes, when addressed, she gives no reply, on the bed, she remains turning away (her face), when embraced forcibly, she trembles, when her friends go out of the bed-chamber, she too desires just to go away By her very perversity, my newly-wedded beloved has become all the more dear to me to-day (4)

(Looking at Malayavati) Beloved Malayavati,

That I now behold this face of yours, O Beloved, is the fruit of that very penance, wherein I observed the vow of silence giving a reply with (mere) *hums*, wherein this body was heated up by the rays of the moon blazing like a forest fire and wherein I meditated with a concentrated mind, (Lit a mind, not devoted to anything else), for many days and nights (5)

HEROINE—*(Aside)* Maid Chaturika, not only is he charming to look at, but he knows also how to speak agreeably

MAID—*(Smiling)* Oh you, who speak the opposite view! *It is just the truth Is there any flattery in this?*

HERO—Chaturika, show the way to the Kusumakara Garden

MAID—May the Prince come along

HERO—*(Pacing about and addressing the heroine)* Your ladyship may walk slowly, at ease

For,

अनेन अभिसाधन नाम तप उत्तम् । यच्च नास्त्यन्यस्या म-।। यस्य तादृशेन त्वदेकचित्तेन मया बहूनि नक्तदिनानि अहोरात्रान् ध्यात चिन्तन कृतम् । तस्य त्रिविधस्य तपस' एतत्फलं यत्तदधुना ते इदं मुख पश्यामि । श्लेषानुप्राणित रूपकमन्त्कारः । हेतूत्प्रेक्षा च । शार्दूलविक्रीडित वृत्तम् ॥ ५ ॥ प्रतिपक्षपातिनि उक्तस्य प्रतिकूलार्थग्राहिणि । प्रियतमोक्तस्य यथार्थमेव गृहाणेत्यर्थः । प्रियवचन चाटूक्तिः । स्वैर स्वैर मन्द मन्द स्वच्छन्दानुवृत्त्या च । मन्दस्वच्छन्दयोः स्वैरः । इत्यमरः । अधुना—शृङ्गार सूचयेत्तत्र सौभाग्यगुणसत्तरैः । इत्युक्त्वा नायिकाया' शरीरसौकुमार्यं भङ्ग्या वर्णयति—खेदायेति । हे प्रिये स्तनभारः गुरू कुचौ एव ते तव मध्यस्य कट्याः खेदाय आयासाय भवतीति शेषः । एकस्य गुरुत्वाद्-न्यस्यातिकृशत्वादिति भावः । अत्र उच्चकुचयाः कृशमध्यस्य चातिशोभास्त्व त्वद्वयम् । अपरस्तदुपरिस्थित हारः मुक्ताहारः किमु । तथाधिकतरखेदाय भवेदिति किमु वक्तव्यमित्यर्थः । ऊर्वोः युग ऊरुयुग नितम्बस्य कटिपश्चाद्भागस्य भरतः

खेदाय स्तनभार एव किमु ते मध्यस्य हारोऽपर-
स्ताम्यत्यूरुयुगं नितम्बभरतः काञ्च्यानया किं पुनः ।
शक्तिः पादयुगस्य नोरुयुगलं वोढुं कुतो नूपुरौ
स्वाङ्गैरेव विभूषितासि वहसि क्लेशाय किं मण्डनम् ॥ ६ ॥

५१ चेटी० — एतत्खलु तत्कुसुमाकरोद्यानम् । तत् प्रविशतु भर्ता ।

(सर्वे प्रविशन्ति ।)

५२ नाय० — (समन्तादवलोक्य ।) अहो रमणीयता कुसुमाकरोद्यानस्य तथा हि ।

निष्यन्दश्चन्दनानां शिशिरयति लतामण्डपे कुट्टिमान्तान्
श्रुत्वा धारागृहाणां ध्वनिमनुतनुते ताण्डवं नीलकण्ठः ।
यन्त्रोन्मुक्तश्च वेगाच्चलति विटपिनां पूरयन्नालवाला-
नापातोत्पीडहेलाहृतकुसुमरजःपिञ्जरोऽयं जलौघः ॥ ७ ॥

अपि च ।

अमी गीतारम्भैर्मुखरितलतामण्डपभुवः
परागैः पुष्पाणां प्रकटपटवासव्यतिकराः ।
पिबन्तः पर्याप्तं सह सहचरीभिर्मधुरसं
समन्तादापानोत्सवमनुभवन्तीव मधुपाः ॥ ८ ॥

१ एष. २ श्राम्यति. ३ मण्डपं कुट्टिमाना. ४ तार; कुरुते. ५ हृत.
६ मधुकरीभिः. ७ ०न्तीह.

मारेण एव ताम्यति क्लान्तं भवति । अनया काञ्च्या मेखलया पुनः किम् । समधिकं ताम्यत्येवेत्यर्थः । पादयुगलस्य चरणद्वन्द्वस्य ऊरुयुगलं वोढुं । तद्भारं सोढुमित्यर्थः । न शक्तिः । नूपुरौ कनकप्रचुरत्वाज्जडौ मञ्जीरौ तद्भारातिरिक्तौ वोढुं कुतः । स्वाङ्गैः स्वावयवैरेव विभूषितासि अलङ्कृतासि । मण्डनमलङ्कारान् किं किमर्थं वहसि धारयसि । सुन्दराकृतीनां बाह्यमण्डनं केवलमायासकरमेव इति भावः । अतिशयोक्त्यलङ्कारः । मण्डनानामधारणे स्वाङ्गविभूषितत्वस्य हेतुत्वकथनात्काव्यलिङ्गं च । शार्दूलविक्रीडितं वृत्तम् ॥ ६ ॥ *निष्यन्द इति ।* चन्दनानामर्थाच्चन्दनानां वृक्षाणां यो निष्यन्दः क्षरद्रसः लतामण्डपे कुट्टिमान्तान् पाषाणस्फटिकादिनिबद्धभूभागान् शिशिरयति शीतलयति । धारागृहाणां धाराप्रधानानि गृहाणि धारागृहाणि । रचनाविशेषेणान्तःसञ्चरज्जलधारासूक्ष्मबिन्दुवर्षयुतानि गृहाणि इत्यर्थः । तेषां ध्वनिं जलपतनशब्दं श्रुत्वा । मेघध्वनिभ्रान्त्या इत्यर्थः । नीलकण्ठः क्रीडामयूरः ताण्डवं लास्यमनुतनुते शब्द-

The weight of your breasts alone is enough to afflict the waist, why then (do you wear) a necklace on it? The pair of thighs is oppressed by the weight of your hips, why then this girdle? The pair of feet has no strength to bear the pair of thighs, how (can it bear) the two anklets? You are adorned by your very limbs Why do yo wear the ornaments to (cause additional) trouble? (6)

MAID—This is the Kusumakara Garden May my Lord enter

(*All enter*)

HERO—(*Looking around*) Oh, the beauty of the Kusumakara Garden! For here,

The juice of the sandal trees cools the edges of the paved ground (*Kuttimantan*) in the creeper-bower, the peacock dances to the accompaniment on hearing the sound of the fountains nearby and this stream of water poured out of the water *machines and rendered yellow by the pollen of the flowers gently shaken by the force of the gushing flood* (*apata-utpid*), flows swiftly, filling the basins of trees (7)

Moreover,

These bees, making the regions of the creeper-bower resound with their singing activities, displaying their contact (*Vyatikara*) with the perfumed powder by means of the pollen of flowers, and drinking honey to their heart's content along with their *female companions, seem to be enjoying the drinking* festival all around (8)

श्रवणानुगुण करोति । पाठान्तरे आरात्समीपे ध्वनिं अनु शब्दं लक्षणीकृत्य । इति कर्मप्रवचनीयसञ्ज्ञाया कर्मप्रवचनीययुक्ते द्वितीया इति द्वितीया । तनुते करोति । यन्त्रोन्मुक्तः यन्त्राद्वारियन्त्रादुन्मुक्तः उद्गीर्णः । आपातेन समन्तात्पतनेन यः उत्पीडः प्रबलप्रवाहस्तेन हेलया अनायासेन आहतानि यानि कुसुमानि तेषा रजसा रेणुना पिञ्जरः पीतरक्तः । अय जलौघः वारिपूरः । विटपा एषा विद्यन्ते इति विटपिनः वृक्षास्तेषा आलवालान् आवापान् । वृक्षमूलकृतजलाधारवर्तुलस्थानानि । पूरयन् वारिपूर्णान्कुर्वन् वेगात् जवाच्चलति । स्वभावोक्तिरलकारः । मयूराणा मेघध्वनिभ्रान्त्या ताण्डववर्णनाद् भ्रान्तिमद्ध्वनिरपि । स्रग्धरा वृत्तम् ॥ ७ ॥ अमी इति । *अमी मधुपा भ्रमराः गीतारम्भै. गानोपक्रमै मुखरिताः शब्दिताः* लतामण्डपा निकुञ्जा एव भुवः आपानभूमयः यैस्तादृशाः । [विटत्वारोपाय मधुपशब्दः पिबन्त इत्यनेन पानस्य गतार्थत्वात् । मधुपा भृङ्गरूपा विटाः । * ~ स्वयं गायन्तः सौहार्देन मण्टपभुवमपि गापयन्तीवेति मुखरितभूशब्दाभ्यामुत्प्रेक्षा व्यज्यते इति वि० टी०] पुष्पाणा परागैः निरन्तरवासाच्चरणपक्षादिषु लिप्तैः

५३ **विदू०** — (उपसृत्य।) जयतु भवान्। स्वस्ति भवत्यै।

५४ **नाय०** — वयस्य चिरादायातोऽसि।

५५ **विदू०** — भो वयस्य लघ्वेवागतोऽस्मि। (किं तु विवाहमङ्गलमहोत्सव-मिलितसिद्धविद्याधरापानकदर्शनकौतूहलेन परिभ्रमन्नेतावतीं वेलां विलम्बितोऽस्मि।) तत्प्रियवयस्योऽपि तावदेतत्प्रेक्षताम्।

५६ **नाय०** — एवं यथाह भवान्। (समन्तादवलोक्य।) वयस्य पश्य पश्य।

दिग्धाङ्गा हरिचन्दनेन दधतः संतानकानां स्रजो
माणिक्याभरणप्रभाव्यतिकरैश्चित्रीकृताच्छांशुकाः।
सार्धं सिद्धजनैर्मधूनि दयितापीतावशिष्टान्यमी
मिश्रीभूय पिबन्ति चन्दनतरुच्छायासु विद्याधराः॥ ९॥

तदेहि। वयमपि तमालवीथिकां गच्छामः।

(सर्वे परिक्रामन्ति)

५७ **विदू०** — एषा खलु तमालवीथिका। एतच्च शरत्संतापखेदितमत्रभवत्या दनं लक्ष्यते। तदिह स्फटिकशिलातल उपविशतु।

५८ **नाय०** — वयस्य सम्यगुपलक्षितम्।

एतन्मुखं प्रियायाः शशिनं जित्वा कपोलयोः कान्त्या।
तापानुरक्तमधुना कमलं ध्रुवमीहते जेतुम्॥ १०॥

मलयवतीं हस्ते गृहीत्वा।) प्रिये इहोपविशामः।

(सर्वे उपविशन्ति।)

१ स्निग्धा. २ गणैः. ३ क्षिप्त्वा. ४ तापाभितास्रं.

कुसुमरजोभिः प्रकटः स्फुटः पटवासस्य पिष्टातकस्य व्यतिकरः संपर्कः येषां ते तथा हचरीभिः सहसङ्गिनीभिः भ्रमरीभिः सह पर्याप्तं यथेच्छं मधुरस मकरन्द बन्तः सन्तः समन्तात्सर्वत्र आपानोत्सवं मद्यपानोत्सवमनुभवन्तीव इत्युत्प्रेक्षा तस्मिन् विवाहमहोत्सवे न केवल सिद्धविद्याधरादयः किंतु भ्रमरा अपि आपानो त्सवमनुभवन्तीति भावः। शिखरिणी वृत्तम् ॥ ८ ॥ लघु शीघ्रम्। विवाहमङ्गले यः महोत्सवः तत्र मिलिताः संगताः ये सिद्धाश्च विद्याधराश्च तेषामापानकस्य दर्शने कौतूहलं तेन। कौतूहलाकृष्टहृदय इत्यर्थः। **दिग्धाङ्गा** इति। हरिचन्दनेन हरेः इन्द्रस्य विष्णोर्वा चन्दनं छेदे रक्तं कषे पीतं हरिचन्दनमुच्यते। इत्युक्तलक्षणं तेन। यद्वा कुङ्कुमेन। हरिचन्दनमस्त्री स्यात् त्रिदशानां महीरुहे। नपुंसकं तु गोशीर्षे ज्योत्स्नाकुङ्कुमयोरपि॥ इति मेदिनी। दिग्धानि लिप्तानि अङ्गानि येषां ते तथा।

VIDU—(*Approaching*) Victory to you, Sir! Blessing to your ladyship!

HERO—Friend, you have come after a long time!

VIDU—Friend, I was, indeed, to come quickly, but I was delayed all this time, wandering about in curiosity to see the drinking bouts of Siddhas and Vidyadharas assembled for the auspicious marriage festival Therefore, my dear friend also may have a look at it

HERO—Just as you say (*Looking around*) Friend, Look, look

With their bodies smeared with the yellow sandal paste, wearing the garlands of Santanaka flowers, with their bright garments variegated by contact with the lustre of (their) ornaments of rubies, these Vidyadharas, mingling with the Siddhas, are drinking wine, that remains after it is tasted by their beloveds, in the shades of the sandal trees (9)

Come, then, we shall also go to the Tamala-avenue

(*All move about*)

VIDU—This is the Tamala avenue The face of our ladyship appears to be afflicted by the heat of autumn So your ladyship should sit down here on this crystal-slab

HERO—Friend, you have observed well

Having surpassed the moon by the lustre of the cheeks, this face of my beloved, now reddened by the sun's heat, certainly wishes to conquer the lotus (10)

(*Taking Malayavati by the hand*) My dear, let us sit here

(*All sit down*)

सतानकाना सतानाख्यदेवतरुकुसुमाना स्रजः माला: दधानाः। माणिक्यखचितानि माणिक्यमयानि वा आभरणानि तेषा प्रभाया व्यतिकरैः सयोगैः चित्रीकृतानि शबलीकृतानि अच्छानि निमलानि अशुकानि वासासि येषा ते तथोक्ता। अमी विद्याधराः चन्दनतरुच्छायासु सिद्धजनैः सार्धं सह मिश्रीभूय मिलिता भूत्वा दयिताभिः पूर्वं पीतानि ततः अवशिष्टानि। तन्मुखससर्गरसवन्तीत्यर्थः। मधूनि पिबन्ति। स्वभावोक्तिरलकारः। शार्दूलविक्रीडित वृत्तम् ॥ ९ ॥ शरदः सन्तापः आतपजनित ऊष्मा तेन खेदित परिश्रान्तम्। एतदिति। प्रियाया वल्लभाया एतद्वदन कपोलयोः गण्डयोः कान्त्या शोभया शशिनं जित्वा। क्षिप्त्वेति पाठे अभिभूय इत्यर्थः। अधुना सम्प्रति तापेन सूर्यातपेन रक्त सत् ध्रुव निश्चित कमलं रक्तकमल जेतुमीहते व्यवस्यति। प्रतिस्पर्धिनोर्द्वयोर्जितयोरात्मनः सौन्दर्यमतुल स्यादिति हेतोरिति भावः। उत्प्रेक्षालंकारः। तदुक्त दण्डिना – मन्ये शङ्के ध्रुव प्रायो नूनमित्येवमादिभि.। उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोपि तादृशः॥ इति। सा च शशिनो मुखस्याधिक्यवर्णनाद् व्यतिरेकेण सराष्टा। अतिशयोक्तिध्वनिरपि। आर्या छन्दः ॥ १० ॥

५९ **नाय०** — (नायिकाया मुखमुन्नमय्य पश्यन् ।) प्रिये वृथैव त्वमस्माभिः कुसुमाकरोद्यानदर्शनकुतूहलिभिः परिखेदिता । कुतः ।

पतत्ते भ्रूलतोल्लासि पाटलाधरपल्लवम् ।
मुखं नन्दनमुद्यानमतोऽन्यत्केवलं वनम् ॥ ११ ॥

६० **चेटी** — (सस्मितं विदूषकं निर्दिश्य ।) श्रुतं त्वया भर्तृदारिका कथं वर्ण्यते ।

६१ **विदू०** — चतुरिके मैवं गर्वमुद्वह । अस्माकमपि मध्ये दर्शनीयो जनोऽस्त्येव । केवलं मत्सरेण कोऽपि न वर्णयति ।

६२ **चेटी** — (सस्मितम् ।) आर्य अहं त्वां वर्णयामि ।

६३ **विदू०** — (सहर्षम् ।) जीवापितोऽस्मि । तत्करोतु भवती प्रसादम् । येनैष मां पुनरपि न भणति यथा त्वमीदृशस्तादृशः कपिलमर्कटाकार इति ।

६४ **चेटी** — आर्य त्वं मया विवाहजागरणेन निद्रायमाणो निमीलिताक्षः शोभनो दृष्टः । तत्तथैव तिष्ठ येन वर्णयामि ।

६५ **विदू०** — (तथा करोति ।)

६६ **चेटी** — (स्वगतम् ।) यावदेषो निमीलिताक्षस्तिष्ठति तावन्नीलीरसानुकारिणा तमालपल्लवरसेन मुखमस्य कालीकरिष्यामि । (उत्थाय तमालपल्लवग्रहणं तन्निपीडनं च नाटयति ।)

(नायको नायिका च विदूषकं पश्यतः ।)

६७ **नाय०** — वयस्य धन्यः खल्वसि योऽस्मासु तिष्ठत्सु त्वमेवं वर्ण्यसे ।

६८ **चेटी** — (तमालरसेन विदूषकस्य मुखं कालीकरोति ।)

६९ **नायि०** — (नायकस्य मुखं दृष्ट्वा स्मितं करोति ।)

७० **नाय०** — (नायिकामुखं दृष्ट्वा ।)

१ ल्लासि. २ यदस्मासु. ३ एवं. ४ तमालपल्लवस्य...नाट्येन काली०. ५ सस्मितं विदूषकं दृष्ट्वा नायकं पश्यति.

पतदिति । भ्रुवौ एव लते भ्रूलते ताभ्यामुल्लासत इति तच्छीलम् । पाटलः रक्तवर्णः अधर एव पल्लवः किसलयः यत्र तत्तथा । एतत्ते तव मुखं सर्वाह्लादकं नन्दनं इन्द्रस्य दिव्यमुद्यानम् । अतः अस्मादन्यत्केवलं वनं कान्तारतुल्यम् । यद्वा अतः अस्मात्कारणादन्यत् कुसुमाकरोद्यानं केवलं वनम् । तव मुखात्पुरतः तुच्छमिति भावः । दर्पणमतेन अधिकारूढवैशिष्ट्यरूपकालङ्कारः । वैशिष्ट्येन मुखे नन्दनत्वारोपात् । काव्यप्रकाशमतेन परम्परितरूपकमिदम् । अपह्नुतिरिति केचित् ॥ ११ ॥

HERO—(*Raising the face of the Heroine and observing*) My dear, you have been troubled in vain by us, curious as we were, to see the Kusumakara Garden

For,

This face of yours, bright with the creepers in the form of (your) eye-brows and with the tender sprouts in the form of (your) red lips, is the Nandana Garden itself, any other (garden) is but a (mere) forest (11)

MAID—(*Addressing the Vidushaka, with a smile*) Have you heard how the Princess is described?

VIDU—Chaturika, don't be so proud Even among us, there is certainly a handsome person Only because of jealousy, nobody describes him

MAID—(*Smiling*) Sir, I shall describe you, (punningly—'I shall paint you')

VIDU—(*Joyfully*) I am brought back to life! May your ladyship do me the favour, so that this man will not say again to me—"You are like this or like that, shaped like a brown monkey"

MAID—I saw you looking handsome when dozing with closed eyes, due to keeping awake during the marriage function So, please, remain just like that, that I may describe (paint) you

(*Vidushaka does accordingly*)

MAID—(*To herself*) while he remains with his eyes closed, I shall blacken his face with the juice of the Tamala leaves resembling the Indigo colour (*Rising, gesticulates plucking and squeezing Tamala leaves*)

(*The hero and heroine observe Vidusaka*)

HERO—Friend, you are indeed fortunate, for, you alone amongst us are described (painted)

(*The maid blackens the face of Vidushaka with the Tamala juice*

(*The heroine, after looking at Vidusaka, smiles at the Hero*)

HERO—(*Looking at the face of the heroine*)

वर्णयामि दर्शनीयत्वेनेति शेषः। पक्षे वर्णवन्त करोमि कृष्णवर्णेन रञ्जयामीति गूढाभिसन्धिः। तत्करोति इति णिचि मतुपो लुक्। जीवापितः उत्साहं प्रापित इत्यर्थः। एषः विटः। निमीलिते अक्षिणी यस्य स निमीलिताक्षः। नीलीरसानुकारिणा नीलीरससदृशेन। हास्यनर्मणा रञ्जालंघनेन विकसितस्मितं कान्तामुख

स्मितपुष्पोद्गमोऽयं ते दृश्यतेऽधरपल्लवे।
फलं त्वन्यत्र मुग्धाक्षि चक्षुषोर्मम पश्यतः॥ १२॥

७१ **विदू०** — चेटि किं त्वया कृतम्।

७२ **चेटी** — ननु वर्णितोऽसि।

७३ **विदू०** — (हस्तेन मुखं प्रमृज्य हस्तं दृष्ट्वा सरोषं दण्डकाष्ठमुद्यम्य।) आः दास्याः पुत्रि राजकुलं खल्वेतत्। किं ते करिष्यामि। (नायकं निर्दिश्य।) भो युवयोः पुरत एवाहं दास्याः पुत्र्या खलीकृतः। तत्किं ममेह स्थितेन। अन्यतो गमिष्यामि तावत्। (निष्क्रामति।)

७४ **चेटी** — सत्यं खलु कुपितो आर्यात्रेयः। यावदनुगम्य प्रसादयिष्यामि। (गन्तुमिच्छति।)

७५ **नायि०** — हञ्जे चतुरिके कथं मामेकाकिनीमुज्झित्वा गच्छसि।

७६ **चेटी** — (नायकमुद्दिश्य सस्मितम्।) एवमेकाकिनी चिरं भव। (इति निष्क्रान्ता।)

७७ **नाय०** — (नायिकाया मुखं पश्यन्।)

दिनकरकरामृष्टं विभ्रद्द्युतिं परिपाटलां
दशनकिरणैः संसर्पद्भिः स्फुटीकृतकेसरम्।
अयि मुखमिदं मुग्धे सत्यं समं कमलेन ते
मधु मधुकरः किं त्वेतस्मिन्पिबन्न विभाव्यते॥ १३॥

१ स्मितं. २ तु जातं; सुजातं. ३ पश्यतश्चक्षुषोर्मम. ४ करैः. ५ सत्सर्पद्भिः.

दृष्ट्वा संतुष्टो नायकस्तद्वर्णयति। स्मितेति। हे मुग्धाक्षि मुग्धे सुन्दरे अक्षिणी यस्यास्तत्सम्बोधनम्। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्। इति अक्षिशब्दात् षच्। ततो ङीष्। ते अधर एव पल्लवः, अधरपल्लवस्तस्मिन्। अयं स्मितं मन्दहास एव पुष्पं तस्य उद्गम उत्पत्तिः दृश्यते। फलं तद्दर्शनरूपं तु अन्यत्र अधरपल्लवादन्यस्मिन् स्थाने दृश्यते। इत्याह। पश्यतः मम नेत्रयोः। अत्र स्मिते पुष्पस्य अधरे च पल्लवस्यारोपाद्रूपकम्। चक्षुषि न रूपकध्वनिः। पुष्परूपकारणस्य नयनगतफलरूपफलस्य च भिन्नदेशत्वादसङ्गतिरलंकारः। कार्यकारणयोर्भिन्नदेशतायामसङ्गतिः। इति लक्षणात्। सा च रूपकानुगृहीता॥ १२॥

O you with lovely eyes, the blossoming of the flowers of smile, is seen on the leaf of your lower lip But the fruit is (seen) elsewhere, in my eyes with which I see it (i e the smile) (12)

VIDU—Madam, what have you done?

MAID—Indeed, you have been described (coloured)!

VIDU—(*Wiping the face with his hand, looking at the hand and raising up his stick in anger,*) Oh! you low-born girl, this is indeed a royal family So what shall I do to you? (*Addressing the hero*) Sir, in the presence of you both, I am badly treated by this wretch So, what is the use of my staying here? I shall go away elsewhere (*Goes away.*)

MAID—The venerable Atreya is angry with me! I shall just follow and appease him. (*Wishes to go*)

HEROINE—Maid Caturika, how do you go, leaving me alone?

MAID (*Referring to the hero and smiling*) May you be thus alone for long!

(*Goes away.*)

HERO—(*Looking at the face of the heroine*)

O innocent one, bearing a red glow, this face of yours is really like a lotus, having been touched by the rays of the sun and displaying the pollen in the form of the shooting rays of the teeth But why is the bee not seen drinking the honey from it? (13)

खलीकृतः चित्रितः। नाऽङ्कपालौ शनौ चित्रे...। खलम् इति मेदिनी। अथ गते कोपव्याजेन विदूषके चेट्या च तदनुवर्तनव्यपदेशेन निष्क्रान्ताया विविक्ते गूढोक्त्या चुम्बन प्रार्थयते—दिनकरेति। अयि मुग्धे सुन्दरि दिनकरकरैः सूर्यकिरणैः आमृष्ट सर्वतः स्पृष्ट अत एव परिपाटल सौकुमार्यातिशयेन अरुणवर्णो द्युतिं कान्ति बिभ्रद् धारयत्। तथा च ससर्पद्भिः परितः प्रसरद्भिः दशनाकिरणैः दन्तमयूखैः स्फुटीकृताः केसराः किञ्जल्का यस्य तादृशं इदं ते मुखं सत्य परमार्थतः कमलेन समं तुल्यमस्ति। किंतु एवं सत्यपि एतस्मिन् तव मुखकमले मधु पुष्परस पिबन् मधुकरः न विभाव्यते। मधुलिह इति पाठे मधुलिहः भ्रमरः। इगुपधत्वात्कः। मधुकरस्य अनाहूतस्यापि कमले मधुपान युक्तमेव। अतोऽहमपि तव मुखचुम्बनं करोमीति गूढाशयः। उपमालङ्कारः। मुखे कमलत्वारोपाद् रूपकमपि। हरिणी वृत्तम्॥ १३॥ एव चुम्बनोपक्रमे चुम्बनादेः प्रत्यक्षदर्शनस्य निषेधात् तत्परिहाराय सहसा चेटीप्रवेशः। पटाक्षेपेण पटस्य जवनिकाया आक्षेपेण झटित्यपसारणेन। केनापि कार्येण किंचित्कार्यमुद्दिश्य। अनिरूप्येति। अङ्ग जीमूतवाहनस्य तं प्रसन्न मतङ्गास्यं

७८ **नायि०** — (विहस्य मुखमन्यतो नयति)

७९ **नाय०** — (पुनस्तदेव पठति ।)

(प्रविश्य पटाक्षेपेण ।)

८० **चेटी** — (सहसोपसृत्य ।) एष खलु आर्यमित्रावसु¹ केनापि कार्येण कुमारं प्रेक्षितुमागतः ।

८१ **नाय०** — प्रिये गच्छ त्वमात्मनो गृहम् । अहमपि मित्रावसुं दृष्ट्वा त्वरितमागत एव ।

८२ **नायि०** — (चेट्या सह निष्क्रान्ता ।)

(ततः प्रविशति मित्रावसुः ।)

८३ **मित्रा०** —

अनिहत्य तं सपत्नं कथमिव जीमूतवाहनस्याहम् ।
कथयिष्यामि हृतं तव राज्यं रिपुणेति निर्लज्जः ॥ १४ ॥

अनिवेद्य च न युक्तं गन्तुमिति निवेद्य गच्छामि । (इत्युपसर्पति ।)

८४ **नाय०** — (मित्रावसुं दृष्ट्वा ।) मित्रावसो इत आस्यताम् ।

८५ **मित्रा०** — (उपविशति ।)

८६ **नाय०** — (निरूप्य ।) मित्रावसो संरब्ध इव लक्ष्यसे ।

८७ **मित्रा०** — (कः खलु मतङ्गहतके संरम्भः ।)

८८ **नाय०** — किं कृतं मतङ्गेन ।

८९ **मित्रा०** — खनाशाय किल युष्मदीयं राज्यमाक्रान्तम् ।

९० **नाय०** — (सहर्षमात्मगतम् ।) अपि नाम सत्यमेतत्स्यात् ।

९१ **मित्रा०** — अतस्तदुच्छित्तय आज्ञां दातुमर्हति कुमारः । किं बहुना ।

१ समर्थः.

शत्रुं । सपत्नीव सपत्नः । व्यन् सपत्ने इति निर्देशादकारः । अनिहत्य निर्लज्जः सन् रिपुणा तव राज्यं हृतं इति कथं कथयिष्यामि । समर्थ इति पाठः साधीयान्भाति । एतत्कथनमत्यन्तलज्जाकरम् । इतस्तव शत्रुरित्येव वक्तुं युक्तमिति भावः ॥ १४ ॥ संरब्धः जातसंभ्रमः । संरम्भः क्रोधादिना जात आवेगः । उच्छित्तये समूलनाशाय । माध्यं सिद्धवत्कृत्वा आह—संसर्पद्भिरिति । एते सिद्धाः तव वचनमार्गं प्राप्य समन्तात्सर्वतः संसर्पद्भिः सञ्चरद्भिः । कृतं शरव्येषु नियन्मार्गेषु

(*Heroine smiles and turns her face away*)
(*Hero repeats the same*)
(*Then enters a maid, tossing the curtain*)

MAID—(*Approaching*) Here is the noble Mitravasu, come to see the Prince on some business

HERO—My dear, go to your residence Having seen Mitravasu, I too shall come quickly.

(*Exit Heroine with the Maid*)

(*Enter Mitravasu*)

MITRAVASU—Without having slain the enemy, how can I, the shameless one, tell Jimutavahana that his kingdom is snatched by the enemy? (14)

As it is not proper to go without informing him, I shall tell him and then go (*Approaches*)

HERO—Mitravasu, please sit here

(*Mitravasu sits down*).

HERO—(Observing) Mitravasu, you seem to be perturbed

MITRAVASU—What excitement can there be about that wretched Matanga?

HERO—What has Matanga done?

MITRAVASU—He has seized your kingdom, indeed for his own destruction!

HERO—(*With joy, to himself*) Can this indeed be true?

MITRAVASU—So the prince should give orders for his *destruction Why say more?*

आकाशमार्गेषु यानं यैस्तादृशैः विमानैः व्योमयानैः करणैः । स्थगिताः तिरस्कृताः रवेः दिवाकरस्य रुचः कान्तयः किरणा इत्यर्थः । यैस्तादृशाः प्रावृषि वर्षाकाले इव दिवसस्य श्यामता कलुषता कुर्वाणाः सन्तः । स्थगितेति वासरस्य विशेषणं वा । सद्यः सपदि इतः अस्मात्स्थानात् युद्धाय याताः च । उद्वृत्त उच्छृङ्खलः यः शत्रुः मतङ्गस्तस्य क्षयात् नाशादुत्पन्न यद्भयं तेन विनमत् नम्रीभवत् राजकं राजसमूहः यत्र तथाभूतं ते तव स्वराज्य सिद्धं पुनः प्राप्तं च । उत्प्रेक्षातिशयोक्तिश्चालङ्कारौ । यानकार्यसिद्ध्योर्युगपत्कथनात् समुच्चयालंकारश्च । स्रग्धरा वृत्तम् ॥ १५ ॥ बलौघयाने कदाचिद्विलम्बः स्यादिति मनसि कृत्वा निजसामर्थ्यविश्वासाच्च पक्षान्तरमाह—अथ वेति । एकेनैव साध्ये किं बलौघेन सेनासमूहेन । नास्ति किंचित्प्रयोजनमित्यर्थः । एकाकिनेति । मया एकाकिना असहायेनापि रभसेन वेगेन आवेशेन वा अपकृष्टः आकृष्टः यः निस्त्रिंशः खड्गः । निर्गतः त्रिंशतः अङ्गुलिभ्यः निस्त्रिंशः । निरादयः क्रान्ताद्यर्थे पञ्चम्या इति समासः । सख्याया-

संसर्पद्भिः समन्तात्कृतसकलवियन्मार्गयानैर्विमानैः
कुर्वाणाः प्रावृषीव स्थगितरविरुचः श्यामतां वासरस्य ।
एते याताश्च सद्यस्तव वचनमितः प्राप्य युद्धाय सिद्धाः
सिद्धं चोद्धृतशत्रुक्षयभयविनमद्राजकं ते स्वराज्यम् ॥ १५ ॥

अथ वा किं बलौघैः ।

एकाकिनापि हि मया रभसावकृष्ट-
निस्त्रिंशदीधितिसटाभरभासुरेण ।
आराद्विपत्य हरिणेव मतङ्गजेन्द्र-
माजौ मतङ्गहतकं हतमेव विद्धि ॥ १६ ॥

नायः — (कर्णौ पिधाय । आत्मगतम् ।) अहह दारुणमभिहितम् । अथ वा एवं तावत् । (प्रकाशम् ।) मित्रावसो कियदेतत् । बहुतरमतोपि बाहुशालिनि त्वयि संभाव्यते । किं तु

स्वशरीरमपि परार्थे यः खलु दद्यादयाचितः कृपया ।
राज्यस्य कृते स कथं प्राणिवधक्रौर्यमनुमनुते ॥ १७ ॥

अपि च क्लेशान्विहाय मम नान्यत्र शत्रुबुद्धिरेव । तद्यदि तेऽस्मत्प्रियं कर्तुमीप्सितं तदनुकम्प्यतामसौ राज्यस्य कृते क्लेशदासीकृतस्तपस्वी ।

१ वियन्मध्यमानैः. २ क्षण. ३ अद्रेः. ४ त्वमस्मत्प्रियं कर्तुमीहसे.

सत्पुरुषस्य इति ढन् । तस्य दीधितिसटाः प्रभापुञ्जास्तासां भरेण आधिक्येन भासुरः समुज्ज्वलः तेन तथोक्तेन । ०निस्त्रिंशदीधितयः सटाभरः केसरसमूहस्तेन भासुरेण हरिणा सिंहेन मत्तगजेन्द्रमिव आराद् समीपादिपत्य आक्रम्य मतङ्गहतकं हतं विनाशितमेव विद्धि जानीहि । उपमालंकारः । वसन्ततिलकं वृत्तम् ॥ १६ ॥ कियत् किंप्रमाणमेतत् । तव सामर्थ्यं विचिन्त्य अल्पमेतदिति भावः । बाहुभ्यां भुजसारेणेत्यर्थः शालते इति बाहुशाली तस्मिन् । एवं चेत् माशादाने विलम्ब्यते इत्याशङ्का दूरीकर्तुमाह—किं त्विति । परोपकारैकनिष्ठस्य दयापरस्य ममाभ्रातुमतिः दुर्घटेत्याह—स्वशरीरमपीति । यः जीमूतवाहनः अयाचितः अप्रार्थितः अपि परार्थे कृपया स्वशरीरमपि दद्यात् । प्रार्थितः किं पुनरित्यर्थः । अनेन अयाचितदानस्येष्टत्वं मुख्यत्वं च ध्वनितम् । स राज्यस्य शरीरापेक्षयातितुच्छस्य कृते गन्यमार्गे

After getting your orders, the Siddhas will immediately start for the battle, darkening the day and shutting the sun's rays, as in the rainy season, by their aerial cars moving on all sides and going through the entire path of the sky, and your kingdom will be regained, with the host of princes bowing down through fear caused by the destruction of your wanton enemy (15).

Or rather where is the need for troops?

Know that the wretched Matanga is killed in battle even by me alone, shining with the mass of mane-like rays of the sword drawn out in anger (*rabhasa*) and attacking at close range, (*arat*) as the lord of elephants is killed by a lion (shining with a mass of mane resembling the rays of a sword drawn out in anger) though alone and leaping from near. (16).

HERO—(*To himself, closing his ears*) Alas! A cruel speech! Or let it be thus (*Aloud*) Mitravasu, how much is this to you (i e it is insignificant)? Even much more is possible for you, resplendent with (victorious) arms. But,

How will he, who would indeed give away unasked, even his own body for another, out of pity, give his consent to the cruelty of the slaughter of a living being for the sake of a kingdom? (17).

Moreover, excepting the '*Kleshas*' (sins), I regard nothing as inimical to me, so if you desire to do me a favour, then have pity on this unfortunate person, who is, a slave to the '*Kleshas*' (sins) for the sake of the kingdom

---

प्राणिना जीवाना वध' एव क्रौर्ये कथमनुमनुते अनुजानीयादित्यर्थ । न कदाप्यनुमन्येतेत्यर्थः । अर्थापत्तिरलंकारः । आर्याच्छंद. ॥ १७ ॥ उक्तमेव विशदयति—अपि चेति । क्लेशान् कष्टान् । क्लेशा एव मम शत्रव इत्यर्थः । कस्यापि क्लेशो मा भूदिति तन्निरास एव मेऽभीष्ट इति भावः । अथ वा क्लेशा बुद्धसिद्धान्तोक्ता. अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च । एनकारेण वैरादिकं व्यावर्तयति । अविद्यादीनामात्मनो मूलच्छेदे हेतुत्वात्तेषामेव शत्रुत्वमिति भाव । तद्यदीति । मम प्रियार्थमेव भवतोयं साहसोपक्रमः मत्प्रियं कर्तुमिच्छसि चेदनुकम्प्यता दयाविषयीक्रियताम् । तत्र हेतुमाह—क्लेशदासीकृत. मम शत्रुभूतेन क्लेशेन स्वाधीनीकृतः । अत एव वराकः अनुकम्पार्हः आक्रान्तराज्यः स तथैव वर्ततामित्यर्थः । सामर्षम् क्रोधाधीनत्वात्तदभिप्रायमजानन्नित्यर्थः । कथमिति सोपालम्भम् । ईदृशः राज्यहरणेनेत्यर्थः । कृपण इति पाठे दीन इत्यर्थः । स चासंगतः । अत्र अयमपकारी अकृतज्ञश्चेति नानुकम्पार्ह इति विरुद्धलक्षणया उक्तम् । प्रत्यग्रः नूतनः कोपरतेन आक्षिप्तं विचालितं चेतः

९३ मित्रा० — (सामर्षं सहासं च।) कथं नानुकम्प्यत ईदृशोऽसावस्माकमुपकारी कृतघ्नश्च।

९४ नाय० — (स्वगतम्।) प्रत्यग्रकोपाक्षिप्तचेतास्तावदयं न शक्यते निवर्तयितुम्। तदेवं तावत्। (प्रकाशम्।) मित्रावसो उत्तिष्ठ। अभ्यन्तरमेव प्रविशावः। तत्रैव त्वां बोधयिष्यामि। संप्रति परिणतमहः। तथा हि।

निद्रामुद्रावबन्धव्यतिकरमनिशं पद्मकोशादपास्य-
न्नाशापूरैककर्मप्रवणनिजकरप्रीणिताशेषविश्वः।
दृष्टः सिद्धैः प्रसक्तस्तुतिमुखरमुखैरस्तमप्येष गच्छ-
न्नेकः श्लाघ्यो विवस्वान्परहितकरणायैव यस्य प्रयासः॥ १८॥

अनिवार्यसरम्भः कोपा०. २ मुद्रावबन्धान्मधु०; प्रबन्धान्मधु. ३ प्राणिता. ४ प्रयुक्त. ५ प्रयासः.

(इति निष्क्रान्ताः सर्वे)

॥ इति तृतीयोऽङ्कः ॥

यस्य सः। निवर्तयितुं स्वाध्यवसायादिति शेषः। अनिवार्यसरम्भ इति पाठे अनिवार्यः दुर्वारः संरम्भ आवेगो यस्य स तथोक्तः। एवं तावद् ब्रवीमीति शेषः। बोधयिष्यामि उक्तार्थो यथा तव चेतसि पदं कुर्यात्तथा कथयिष्यामीत्यर्थः। परिणतम-[illegible]म्। नायं विस्तरतः वक्तुमुचितः काल इति भावः। अथ दिवसावसानवर्णनं प्रस्तुत्य उत्कृष्टदेहलाभः परोपकारसाधनत्वेन सफलीकर्तव्य इति स्वमतं शिष्टानुष्ठानप्रदर्शनेन द्रढयति — निद्रेत्यादि। अनिशं दिने दिने। पद्मकोशात्पद्ममुकुलात्। ल्यबपेक्षपञ्चमी। कोशोऽस्त्री कुड्मले खड्गपिधाने इति विश्वः। निद्रा अविकास इत्यर्थः। सा एव मुद्रावबन्धः संकोचावस्थानं तस्य व्यतिकरं सम्बन्धं अपास्यन् विकासनेन दूरीकुर्वन्। पद्ममुकुलानि विकासयन्नित्यर्थः। लोकान् प्रतिदिनं निद्रातः प्रबोधयन्नित्यपि ध्वनिः। तथा आशानां दिशां जनानां मनोरथानां च पूरः व्यापनं सम्पूरणं च॥ एष एवैकं मुख्यं कर्म तस्मिन् प्रवणैः तत्परैः। निजकरैः स्वकिरणैः। प्रीणितं तोषितम्। प्राणितमिति पाठे जीवितमित्यर्थः। अशेषं विश्वं येन स तथोक्तः। प्रसक्ताभिः सततं प्रवृत्ताभिः स्तुतिभिः स्तोत्रैः मुखराणि मुखानि येषां तैः। सूर्योपगमनं [illegible]

MITRAVASU—(*Angrily and laughing*) How can such a benefactor and such a grateful person be not pitied?

HERO—(*To himself*) It is not possible to dissuade him when his mind is distracted by fresh anger I shall just say this (*Aloud*) Mitravasu, get up, we shall go inside I shall *give you proper advice there The day has already come to a* close For,

The sun, who always removes from the lotus bud the close-clinging seal of sleep fastened (on it), who pleases the whole world by his rays (also, hands) intent on the sole duty of filling the quarters (also, fulfilling the desires of people) and who is seen by the Siddhas with their mouths vocal (mukhara) with continuous hymns of praise, is alone praiseworthy, as his effort is only for the good of others (18)

END OF ACT III

सिद्धैः तापसैः दृष्टः अर्घ्यदानसमये इति शेषः। एष विवस्वान् सूर्यः अस्तं गच्छन्नपि एकः केवलः श्लाघ्यः। सर्वश्लाघास्पदम्। यस्य प्रयास आतपवर्षहिमादिसम्पादनरूप परिश्रमः परहितकरणाय लोकस्थितिसाधनाय एव। अत्र श्लिष्टैः विशेषणैः परदुःखमपास्यतः परहितैकरतस्य महात्मनः परार्थे देहत्यागोपि श्लाघ्य इत्यर्थस्याभिधानात्समासोक्तिरलंकारः। तस्याश्च आशापूरे य एककर्मेत्वारोपः श्लिष्टः किरणेषु हस्तारोपस्तेन श्लिष्टपरम्परितरूपकेण संसृष्टिः। स्रग्धरा वृत्तम्॥ १८॥ अत्र यद्येवं ममापि परार्थमेव देहपातो भवेत्तर्हि श्लाघ्यतममिति उत्तराङ्कार्थः सूचितः॥
इति श्रीनागानन्दटीकायामर्थबोधिन्यां तृतीयोऽङ्कः॥

चतुर्थोऽङ्कः ।

(ततः प्रविशति कञ्चुकी गृहीतरक्तवस्त्रयुगलः प्रतीहारश्च ।)

१ कञ्चु० —

२ अन्तःपुराणां विहितव्यवस्थः पदे पदेऽहं स्खलितानि रक्षन् ।
जरातुरः संप्रति दण्डनीत्या सर्वं नृपस्यानुकरोमि वृत्तम् ॥ १ ॥

२ प्रती० — आर्य वसुभद्र क भवान् प्रस्थितः ।

३ कञ्चु० — आदिष्टोऽस्मि देव्या मित्रावसुजनन्या । यथा — कञ्चुकिंस्त्वया दशरात्रं यावन्मलयवत्या जामातुश्च रक्तवासांसि नेतव्यानीति । राजदुहिता मलयवती च श्वशुरकुले वर्तते । जीमूतवाहनोऽपि युवराजेन मित्रावसुना सह समुद्रवेला द्रष्टुमद्य गत इति मया श्रुतम् । तन्न जाने किं राजपुत्र्याः सकाशं गच्छाम्युताहो जामातुरिति ।

४ प्रती० — आर्य वरं राजपुत्र्याः सकाशगमनम् । तत्र कदाचिदियत्या वेलया जामातापि प्रत्यागतो भविष्यति ।

५ कञ्चु० — सुनन्द साधूक्तम् । भवता पुनः क गम्यते ।

१ पश्यन्. २ सर्वो...वृत्तिम्. ३ अस्मात्पर — कुत्र प्रथमं गच्छामि । इत्यधिकं पुस्तकान्तरे. ४ मलयवत्याः ५ उपदिष्टं. ६ अथ भवान् पुनः क प्रस्थितः.

अथ तृतीयाङ्कावसाने सूचितस्य नायकस्य परमसाध्यस्य सिद्धये अपेक्षितं नीरसत्वात्तस्य वृत्तं विष्कंभेण प्रतिपादयितुं कञ्चुकीप्रतीहारौ मध्यमपात्रे प्रवेशयति । तत्र कञ्चुकिलक्षण — अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः । सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते ॥ इति । ये नित्यं सत्यसम्पन्नाः कामदोषविवर्जिताः । ज्ञानविज्ञानकुशलाः कञ्चुकीयास्तु ते स्मृताः ॥ इति मातृगुप्ताचार्याः । प्रतीहारः द्वारपालः । तत्र अन्तःपुरवासे वार्धक्यस्यैवौचित्यात्तस्य वृद्धतां स्वोक्त्या प्रकाशयन् श्लिष्टैः पदैः नृपतिसाम्यमपि प्रतिपादयति — अन्तःपुराणामिति । जरया वार्धक्येन आतुरः आर्तः जरातुरः अहं सम्प्रति सर्वं नृपस्य वृत्तमनुकरोमि विडम्बयामि । तदेवोपपादयति । यष्टेः दण्डस्य दण्डावलम्बनेनेत्यर्थः । नीत्या परिग्रहेण । दण्डं विना गमनस्याशक्यत्वात् । दण्डो नीयते बोध्यते अनया । क्तिन् । यद्वा दण्डं नयति दण्ड्यान्प्रति प्रापयति इति दण्डनीतिः । क्तिन् । दण्डपदण्डनादिप्रतिपादकनीतिशास्त्रानुसारेण ।

ACT IV

(Then enter Chamberlain with a pair of red garments and the door-keeper)

CHAMBERLAIN—

Afflicted by old age, attending to the affairs of the harem, and guarding (myself) against stumblings at every step, I, under the guidance of this staff (i e taking *the support of the staff) now imitate every action of a king* who establishes order in the cities and avoids lapses at every step by following the policy of punishment (1)

DOOR-KEEPER—Revered Vasubhadra, where are you going?

CHAMB—I am ordered by the queen, the mother Mitravasu thus— 'Chamberlain, *you should take the red clothes to* Malayavati and the son-in-law for a period of ten days' Now, *Princess Malayavati is in her father-in-law's house* I hear that Jimutavahana also has now gone with Prince Mitravasu to see the beach. So I do not know whether I should go to the Princess or to the son-in-law

DOOR-KEEPER—Noble sir, it is better to go to the Princess For, perhaps, by this time, the son-in-law also might have returned there

CHAMB—Sunanda, you have spoken well But then, where have you started?

कथभूतोऽहमित्याह—अन्तःपुराणा राजस्त्रीणाम् । अन्तःपुर शुद्धान्तः । स्यगार भूभुजामन्तःपुर स्यादवरोधनम् । शुद्धान्तश्चावरोधश्च । इत्यमरः । तेन तत्रस्थाः स्त्रियो लक्ष्यन्ते । विहिता व्यवस्था अन्तःपुरकृत्याना यथावदवस्थितिः येन । पक्षे पुराणामन्तः नगरीषु राज्यान्तर्गतेषु विहिता व्यवस्था लौकिकवर्णाश्रमादिकृत्याना यथायथमनुष्ठापन येन स तथा । पुनश्च पदे पदे प्रतिचरणविन्यास । पक्षे व्यवहारस्य तत्तत्स्थाने । स्खलितानि गतिभ्रंशनानि । पक्षे नीतिशास्त्रानुष्ठाने प्रमादान् । परिहरन्निति त्यर्थः । स्खलिताना रक्षण न घटते इति मुख्यार्थबाधे रक्षणेन परिहारार्थो लक्ष्यते । पश्यन्निति पाठे अत्र स्खलित स्यादिति पूर्वमालोच्य तन्निवारयन्नित्यर्थः । श्लेषानुप्राणितोपमाऽलङ्कारः । उपजातिर्वृत्तम् ॥ १ ॥ आर्येति कञ्चुकिनो वृद्धत्वात्पूज्यतया सम्बोधनम् । मित्रावसुजनन्या मित्रावसोः प्रसिद्धतया तथा निर्देशः । दशरात्र यावद्दशरात्रावधि । दशाना रात्रीणा समाहार दशरात्रम् । रक्तवासासि द्वयो परिधानीयोत्तरीयार्थे चत्वारि सम्पन्निमित्त नेतव्यानि । श्वशुरकुले श्वशुरगृहे । दीपप्रतिपदुत्सवः कार्तिकप्रतिपदि दीपप्रज्वलनप्रधानः । शालीपाकाख्ये इति शिवराम. । **विष्कम्भकः** ।

६ प्रती० — अहमपि महाराजविश्वावसुना समादिष्टः । यथा सुनन्द गच्छ मित्रावसुं ब्रूहि । अस्मिन्दीपप्रतिपदुत्सवे मलयवत्या जामातुश्चैतदुत्सवानुरूपं यत्किंचित्प्रदीयते । तदागत्य निरूप्यतामिति । तद्गच्छतु राजपुत्र्याः सकाशमार्या । अहमपि युवराजमित्रावसोरानयनाय गच्छामि ।

(इति निष्क्रान्तौ ।)

॥ विष्कम्भकः ॥

(ततः प्रविशति जीमूतवाहनो मित्रावसुश्च ।)

७ नाय० —

शय्या शाद्वलमासनं शुचिशिला सद्म द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः ।
इत्यप्रार्थितलभ्यसर्वविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत्परार्थघटनावन्ध्यैर्वृथा स्थीयते ॥ २ ॥

मित्रा० — (ऊर्ध्वमवलोक्य ।) कुमार त्वर्यताम् । त्वर्यताम् । समयोऽयं चलितुमम्बुराशेः ।

९ नाय० — (आकर्ण्य ।) सम्यगुपलक्षितम् ।

उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन्प्रतिध्वानिनीः ।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा
प्रायः प्रेङ्खदसंख्यशङ्खधवला वेलेयमागच्छति ॥ ३ ॥

१ दिवसे प्र०. २ किंचिदागत्य निरूपयेति. ३ आह्वानाय. ४ नायकः. ५ दुःखप्रार्थिनि. ६ वन्ध्ये. ७ उद्गर्जत्. ८ ०द्धतः. ९ निताः. १० वल्या.

एतल्लक्षणं — वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः । मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः । शुद्धः स्यात्स तु संकीर्णो नीचमध्यप्रकल्पितः ॥ इति ॥ अथ प्रथमाङ्कोपक्षिप्तस्य द्वितीयाङ्कान्तरितस्यापि तृतीयाङ्कारम्भे अनुसंहितस्य परोपकारकरणस्य वनेऽवसरालाभात्खिन्नो ब्रूते — शय्येति । शाद्वलं बालतृणाच्छादितं स्थलं शयनापेक्षाया शय्या तल्पम् । शादः बालतृणमस्मिन् । ड्वलच् । शाद्वलः शादहरिते इत्यमरः । शुचिः पवित्रा शिला

DOOR-KEEPER—I too was ordered by His Majesty Vishvasu thus—"Sunanda, go and tell Mitravasu 'On this occasion of the first day of the Dipavali festival, some present, appropriate to the festival, is to be given to Malayavati and the son-in-law So come and observe it'" So, the noble sir may go to the Princess I too shall go to bring Prince Mitravasu

(*Exeunt Both*)

END OF THE VISHKAMBHAKA

(*Enter Jimutavahana and Mitravasu*)

HERO—

The grassy plot is the bed, a clear stone-slab is the seat, (the place) under the trees is the residence, the cool water of the streams is the drink, the roots form the food, and the deer serve as companions In a forest, where every object of enjoyment is thus obtained unsought for, there is this one defect, that here, where supplicants are hard to be found, one has to stay in vain, being unable to accomplish the purpose of others (2)

MITRAVASU—(*Looking up*) Prince, make haste, make haste It is time for the tide to flow in

HERO—(*Listening*) Well observed

Since a loud noise, heightened by the continuous and violent splashing by the lordly sea-elephants emerging (out of the waters) and making all the interiors of the mountain caves reverberate, is rising up so as to deafen the ears, the tide, probably, is coming up, white with innumerable conch-shells floating therein (3)

आसनम्। सद्म गेहं द्रुमाणामधः अधोभूमिः। शीतं निर्झरवारि पीयते इति पानं पेयम्। तृषितस्य शीते स्पृहा जायते इति शीतग्रहणम्। अशनं भोज्यवस्तूनि कन्दाः। सहायाः सहचारिणः। इत्येवं अप्रार्थितं प्रार्थनं विना लभ्यः अयत्नसाध्य इति यावत्। सर्वः विभवः भोग्यसम्पद् यस्मिन् एतादृशे वने अयं एकः केवलं प्रधानश्च दोषः वैगुण्यम्। यद् दुष्प्रापाः दुर्लभा अर्थिनः याचका यत्र तस्मिन्। परार्थस्य परप्रयोजनस्य घटना विधानं तत्र यत्नैः निष्फलैः स्थीयते। परार्थघटनापरेणापि अर्थिनोऽभावात्परोपकारकरणावसरो न लभ्यते। अयं हि सर्वगुणाभिभावी दोषः। अत एको हि दोषो गुणसंनिपाते इति नीतिरप्यत्र नाश्रीयत इति भावः॥ अत्राकांक्षाक्रममनुसृत्य विधेयांशस्य प्रथमं निर्देशः। का शय्या शाद्वलमिति। अन्यथा शाद्वलादिकं प्रथममुक्त्वा शय्यादिकं विधेयं शाद्वलं शय्या शिला

१० **मित्रा०** — नन्वियमागतैव । पश्य ।

कवलितलवङ्गपल्लवकरिमकरोद्गारसुरभिणा पयसा ।
एषा समुद्रवेला रत्नद्युतिरञ्जिता भाति ॥ ४ ॥

तदेहि । अस्माज्जलप्रसरणमार्गादपक्रम्यानेनैव गिरिसानुसमीपमार्गेण परिक्रामाव ।

(परिक्रम्यावलोक्य च ।)

११ **नाय०** — मित्रावसो पश्य पश्य । शरत्समयपाण्डुभिः पयोदपटलैः प्रावृता प्रालेयाचलशिखरश्रियमुद्वहन्त्येते मलयाचलसानव ।

१२ **मित्रा०** — कुमार नैतामी मलयाचलसानव । नागानामस्थिसंघाता खल्वेते ।

१३ **नाय०** — (सोद्वेगम् ।) कष्टम् । किंनिमित्त पुनरिमे सघातमुपयाता जाता ।

१४ **मित्रा०** — कुमार नैतामी सघातमृत्यव । श्रूयता यथैतत् । पुरा किल स्वपक्षपवनापास्तसमस्तसागरजलस्तरसा रसातलादुद्धृत्योद्धृत्य भुजङ्गाननुदिनमाहारयति स्म वैनतेय ।

१५ **नाय०** — (सोद्वेगम् ।) कष्टमतिदुष्कर कर्म करोत्यसौ । ततस्तत ।

१ द्वारि २ सावेगम् ३ इह ४ पास्तसाग० ५ जलपूर रसातलादुद्धृत्य प्रतिदिनमेकैक नागमा०

आसनमित्यादि । एक नात्र अनुवाद्यविधेयक्रमभङ्ग । शार्दूलविक्रीडित वृत्तम् ॥ २ ॥ समयोऽयमिति । अयमम्बुराशे समुद्रस्य चलितु चलोर्म्यवनावतरणस्य समय काल । यद्वा अम्बुराशे समुद्रवेलाया चलितु निर्गन्तुमावयो समय उचित काल । उन्मज्जदित । यथा यस्मात्कारणात् उन्मज्जन्त ऊर्ध्वं प्लवमाना ये जलकुञ्जरेन्द्रा जलकरिश्रेष्ठा तेषा रभसेन वेगेन य आस्फाल जलताडन तस्य अनुरूपेण सात त्येन उद्धत उत्कट । प्रचण्ड इति यावत् । अत सर्वा पर्वतस्य कन्दराणां उदर भुव कुहरस्थली प्रतिध्वानिनी बद्धप्रतिशब्दा कुर्वन् । श्रुतिपथ कर्णमार्गं उन्मथ्नातीति श्रुतिपथोन्माथी । शब्दान्तरग्रहणसामर्थ्यं निरुन्धन्नित्यर्थ । उच्चै अति प्रकर्षमुच्चरति ऊर्ध्वं प्रसरति तथा प्राय मन्ये प्रेसन्त चलन्त ये असख्या अमिता शङ्खा तै धवला शुभ्रा इय वेला उदन्वसागराम्बु आगच्छति । अब्ध्यम्बुविकृतौ वेला इत्यमर । स्वभावोक्ति । छेकानुप्रासश्च । शार्दूलविक्रीडित वृत्तम् ॥ ३ ॥

MITRA—It has indeed come up See!

This sea-tide, with its water fragrant on account of the spouting of elephants and crocodiles that have devoured the clove-shoots, glitters, tinged with the lustre of the gems (4)

Come then Leaving the path of the spreading waters, we shall walk along the way by the side of the mountain-ridges

(*Moving about and looking*)

HERO—Mitravasu, see, see Covered by *the veils of* clouds, white on account of autumn, these peaks of the Malaya mountain possess the beauty of the peaks of the Himalaya

MITRA—Prince, these are not the peaks of the Himalaya mountain These are, indeed, accumulations of the bones of serpents

HERO—(*With dejection*) Alas! for what reason have these *mass deaths occurred*?

MITRA—Prince, these are not at all mass deaths Hear *how this happened Formerly, it is said, that Garuda (lit son* of Vinata) used to eat the serpents every day, dragging them out forcibly from the nether world, having set aside all the water of the ocean by the blast of his wings

HERO—(*With dejection*) Alas! He was doing a very dreadful thing! What further?

कवलितेति । एषा रत्नाना मुक्तादीना द्युतिभिः कान्तिभिः रञ्जिता शोभिता समुद्रवेला सागरतटी भाति शोभते । कवलिता ग्रासीकृता लवङ्गपल्लवाः यैस्तादृशा ये करिणः जलहस्तिनः मकरा ग्राहाश्च तेषामुद्गारेण उत्सर्पन्मुखवायुना सुरभि शोभनगन्धं यत्पयस्तेन पयसोपलक्षिता । उदात्तालंकारः । छेकानुप्रासश्च । आर्यावृत्तम् ॥ ४ ॥ गिरेः सानुः प्रस्थः समभूभागः तत्समीपमार्गेण । प्रालेयाचलः हिमालयः तस्य शिखराणा शोभा उद्वहति धारयति । अस्थिसघाताः अस्थिराशयः । सघातेन सहत्या मृत्यवः बहूना युगपन्मृत्यव इत्यर्थः । किलेति वार्तायाम् । स्वपक्षेति । स्वपक्षयोः पवनेन वायुना अपास्त दूर प्रक्षिप्त समस्त सागरजलं येन सः । विनताया अपत्यं पुमान् वैनतेयः गरुडः । तरसा जवेन रसातलात् पातालात् । उद्धृत्योद्धृत्य पुनः पुनः निष्कास्य अनुदिन दिवसे दिवसे समाहारयति भक्षयति । चौरादिको छञ् । यद्वा आहार करोति । तत्करोतीति णिच् । महान्तः गरुतः पक्षाः सन्त्यस्य असौ गरुत्मान् गरुडः । तस्य अभिपातः आक्रमस्तस्मात्त्रासः भयं तस्मात् । यदर्थं य नाग नागभक्षणमित्यर्थः । उद्दिश्य । पन्नगा. नागाः । पन्नं पतितं यथा तथा गच्छन्तीति पन्नग । सर्वत्रपन्नयोः इति डः । कष्ट इति मनःपीडासूचकम् । निर्वेदस्यवचौ । वार्तायामव्ययौ किल इति निकाण्डशेष. । न सम्यग्भक्षिता इत्यर्थः ।

१६ **मित्रा०** — ततः सकलनागलोकविनाशशङ्किना नागराजेन वासुकिना गरुत्मानभिहितः ।

१७ **नाय०** — (सादरम् ।) किं मां प्रथमं भक्षयेति ।

१८ **मित्रा०** — नहि नहि ।

१९ **नाय०** — किमन्यत् ।

२० **मित्रा०** — इदमभिहितम् । गरुत्मन् त्वदभिपातसंत्रासात्सहसैव स्रवन्ति भुजङ्गमाङ्गनानां गर्भाः । शिशवश्च पञ्चत्वमुपयान्ति । एवं संततिविच्छेदोऽस्माकम् । भवतश्च स्वार्थहानिः । तदयदर्थमभिपतति भवान्नागलोकं तमिहैवैकं नागमनुदिनमहं समुद्रतटस्थितस्य ते प्रेषयामि ।

२१ **नाय०** — कष्टं रक्षिताः किलैवं नागराजेन पन्नगाः ।

> जिह्वासहस्रद्वितयस्य मध्ये नैकापि किं तादृगभूद्रसज्ञा ।
> एषोऽहिरक्षार्थमहिद्विषेऽद्य दत्तो मयात्मेति यया ब्रवीति ॥ ५ ॥

२२ **मित्रा०** — प्रतिपन्नं तत्पक्षिराजेन ।

> इत्येकशः प्रतिदिनं विहितव्यवस्थो
> यान्भक्षयत्यहिपतीनिह पक्षिराजः ।
> यास्यन्ति यान्ति च गताश्च दिनैर्विवृद्धिं
> तेषाममी तुहिनशैलरुचोऽस्थिकूटाः ॥ ६ ॥

१ ग्राश०. २ संपातत्रा०. ३ एवं च संततिसमुच्छेदादस्माकं तवैव स्वार्थहानिर्भवेत्. ४ नैकापि सा तस्य किमस्ति जिह्वा । एकाहि०. ५ द्विपः. ६ इत्येष भोगिपतिना. ७ पतीन्पतगाधिराजः.

जिह्वेति । तस्य वासुकेः जिह्वानां सहस्रद्वयस्य । नागानां द्विजिह्वत्वाद्वासुकेश्च सहस्रजिह्वत्वाद् द्विसहस्रजिह्वत्वम् । मध्ये एकापि सा तादृशी जिह्वा नास्ति यया जिह्वया मया अहीनां रक्षार्थमद्य आत्मा स्वदेहः एषः अहिद्विषे नागारये गरुडाय दत्त इति ब्रवीति । स्वदेहदानेन प्रजारक्षणं स्वामिधर्मः । तमकृत्वाऽन्येषां विसर्जनमत्यन्तमनुचितमिति भावः । इन्द्रवज्रा वृत्तम् ॥ ५ ॥ प्रतिपन्नमङ्गीकृतम् । तद्वासुकिवचः । तन्निर्दिष्टसमय इत्यर्थः । इतीति । इति उक्तप्रकारेण विहिता कृता व्यवस्था प्रतिदिनं एकाहिभक्षणरूपा मर्यादा यस्य तादृशः पक्षिराजः प्रतिदिनं एकशः यान् अहिपतीन् इह भक्षयति तेषां तुहिनशैलः हिमवान् तस्येव रुचिः कान्तिर्येषां तादृशाः । तद्वदुच्चा धवलाश्चेत्यर्थः । अमी अस्थिकूटाः अस्थिसमूहाः दिनैः

MITRA—Then Garuda was thus addressed by *Vasuki*, the king of serpents, who feared the destruction of the whole serpent race

HERO—(*Respectfully*) What? Did he say 'Eat me first?'

MITRA—No, no

HERO—What else?

MITRA—This was what he said "Garuda, through the dread of your onslaught the embryos of the female snakes fall off in thousands The young ones also die Thus our progeny is destroyed, and your own interest too suffers Therefore, every day I shall myself send you, while you stand on the sea-shore, one snake, for which you assail the nether world

HERO—Alas! this is how the serpents were protected by the king of serpents!

Among the two thousand tongues, was not there even one tongue (punningly,— 'that knows the pleasure of benevolence') by which he could say "Here, I offer myself to the enemy of serpents to save (all) serpents" (5)

And then?

MITRA—That was agreed to by the king of birds

These are the heaps of bones, resembling the mountain of snow, of those lordly serpents whom the king of birds, having made an agreement, eats, one by one, every day These (heaps) have increased, are increasing, and will increase as days pass on (6).

बहुकालेन विवृद्धिं गताः। विवृद्धिं यान्ति यास्यन्ति च। उपमा कारकदीपकं च। वसन्ततिलकं वृत्तम् ॥ ६ ॥ एवं गरुडचेष्टितं दृष्ट्वा निर्वेदात्सामान्येन मूढानां पापे प्रवृत्तिं निन्दन्नाह–सर्वेति। सर्वस्य अशुचिनः अशुचित्वस्य। भावप्रधानो निर्देशः। निधीयते अत्र इति निधानं आश्रयस्थानम्। यद्वा सर्वेषामशुचीनामपवित्राणां मांसमूत्रपुरीषास्थिरुधिरादीनां निधानस्य। कृतं हन्तीति कृतघ्नं तस्य। एकदिनभक्ताभावे बहुदिनकृतपोषमपि शोषं याति। सर्वदा मिष्टान्नेन पोषितमपि कदाचित्तदभावे पूर्वफलमुत्तरफलेन निराकरोतीति अस्य कृतघ्नत्वम्। विनाशिनः विनाशशीलस्य। कुत्सितं शरीरं शरीरकं तस्य क्षुद्रशरीरस्य कृते मूढाः विवेकहीनाः पापानि दुष्कर्माणि हिंसास्तेयादीनि कुर्वते। अत्र शरीरविशेषणानां साभिप्रायत्वात्परिकरालंकारः ॥ ७ ॥ अविद्यमानं पर्यवसानमन्तो यस्याः सा। अपि नामेति आशंसागर्भोक्तिः। बहवः प्रत्ययाया निशा यस्मिन्। बहूपाये इत्यर्थः। योषितः स्त्रियाः। गोपायितं छन्नं गृहीतं वस्त्रयुगलं येन। चिबुके मुखस्याधोभागे। अतिविक्लवा अत्यन्तमार्ता। अदृष्टा सूर्यस्य किरणा येन तददृष्टसूर्यकिरणम्। आतपगमनाभावादित्यर्थः।

२३ नाय० — आश्चर्यम् ।

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥ ७ ॥

कष्टमपर्यवसानेयं विपत्तिर्नागानाम् । (आत्मगतम् ।) अपि नाम शक्नुयामहं स्वशरीरदानादेकस्यापि फणभृतः प्राणैरक्षां कर्तुम् ।

(ततः प्रविशति प्रतीहारः ।)

२४ प्रती० — आरूढोऽस्मि गिरिशिखरम् । यावन्मित्रावसुमन्विष्यामि । (परिक्रम्य ।) अयं मित्रावसुर्जीमूतवाहनस्य समीपे तिष्ठति । (उपसृत्य प्रणम्य च ।) विजयेतां कुमारौ ।

२५ मित्रा० — सुनन्द किंनिमित्तमिहागमनं ते ।

२६ प्रती० — (कर्णे कथयति ।)

२७ मित्रा० — कुमार तातो मामाह्वयति ।

२८ नाय० — गम्यताम् ।

२९ मित्रा० — कुमारेणापि बहुप्रत्यवायेऽस्मिन्प्रदेशे कुतूहलिना न चिरं स्थातव्यम् । (इति प्रतीहारेण सह निष्क्रान्तः ।)

३० नाय० — यावदहमप्यस्माद्गिरिशिखरादवतीर्य समुद्रतटमवलोकयामि । (परिक्रामति ।)

३१ (नेपथ्ये ।) हा पुत्रक शङ्खचूड कथं व्यापाद्यमानः किल मयाद्य त्वं प्रेक्षितव्यः ।

३२ नाय० — (आकर्ण्य ।) अये योषित इवार्तप्रलापः । तद्यावदुपसृत्य केयं कुतो वास्या भयमिति स्फुटीकरोमि । (परिक्रामति ।)

(ततः प्रविशति रुदत्या वृद्धया जनन्यानुगम्यमानः
शङ्खचूडो गोपायितवस्त्रयुगलश्च किंकरः ।)

१ (साश्चर्यम् ।); आश्चर्यमाश्चर्यम्. २ ०शुभ. ३ जरत्तृणल्पीयसः. ४ मामाकारयति. ५ ०परिरक्षणं; परिरक्षां. ६ विलोक्य. ७ त्वरितं ग०. ८ कुतूहलात्; नैव चिरम्व०. ९ उपेत्य. १० क्रन्दन्त्या; वृद्धयानु०

क्रोडीकरोतीति । यतः यदा जन्मनि भेदः । नित्यं आशङ्क्यं मम इत्यर्थः । अनित्यता नश्वरता धात्री उपमाता इव । प्रथमं क्रोडीकरोति स्वक्रोडं गमयति । सा हि प्रसूतिवेदनया पीड्यमानां मातरं यावत् यावत् गर्भोद्घाटनपार्श्वे प्रथमं

HERO—O wonder!

The ignorant commit sins even for the sake of this wretched body, the abode of all impurities, ungrateful and perishable (7)

Pity that this misery of serpents is endless! (To himself) How I wish I should be able to save the life of at least one serpent by offering my own body!

(*Enter the door-keeper*)

DOOR-KEEPER—I have climbed up the peak of the mountain I shall just find out Mitravasu (*walking about*) Here is Mitravasu standing near the son-in-law (*Approaching and bowing down*) Victory to both the Princes!

MITRA—Sunanda, for what purpose have you come here?

(*The Door keeper whispers in the ear*)

MITRA— Prince, father has sent for me

HERO—You may go

MITRA—The prince also should not stay long, out of curiosity, in this place, full of dangers (*Exit with the Door-keeper*)

HERO—Descending from this mountain top, I shall just have a look at the sea-shore (*Walks about*)

(*Behind the curtain*) Alas! dear son, Shankhachuda, how, indeed, you are to be seen by me to-day, being killed!

HERO—(*Listening*) Ah! It looks as if it is a distressed cry of a woman! So, going near, I shall make it clear who she is or whence her fear

(*Then enter Shankhachuda followed by his weeping old mother and a servant holding (lit guarding) a pair of clothes*)

स्वाङ्के धारयति। जननी माता पश्चात्क्रोडीकरोति स्वाङ्के गृह्णाति। यद्वा धनिसता प्रथम क्रोडीकरोति जननी धात्रीव पश्चादिति योज्यम्। तदा यस्मादेव ततः शोकस्य परिदेवनस्य कः क्रमः परिपाटी। अवसर इति यावत्। शोको न युक्त इति भावः। उपमालङ्कारः ॥८॥ राजकार्ये राज्ञः राज्यस्येति यावद् हितार्थे यत्कार्यं तत्। प्रसक्तः प्रवृत्तः। व्यक्तिः स्फुटता। भयकारणस्येत्यर्थात्। विटपान्तरितः वृक्षव्यवहितः। रक्तांशुके एव चिह्नं तेन उपलक्षितं ज्ञातम्। सोरस्ताडं उरसः ताडनेन सहितम्। वज्रस्य पातः वज्रपातस्तेन सदृशं तद्वदाघातकरम्। मनोरथानामभिलाषाणां शतं तेन लब्धं। निर्घृणस्य भावः नैर्घृण्यं निष्करुणत्वम्। मूढाया इति। मूढायाः पुत्रस्नेहेन भ्रान्तचित्तायाः विचेतनायाः वा। मुहुः वारंवारम्। पुनः पुनः शोकोज्जृम्भणादिति भावः। अश्रुणा बाष्पेण मन्दमविरतप्रवाहं मुञ्चन्तीति

नागा. ७

३३ **वृद्धा** — (सास्रम् ।) हा पुत्रक शङ्खचूड कथं व्यापाद्यमानः किल मयाद्य त्वं प्रेक्षितव्यः । (चिबुके गृहीत्वा ।) अनेन मुखचन्द्रेण विरहितमिदानीमन्धकारीभविष्यति पातालम् ।

३४ **शङ्ख०** — अम्ब किमेवमतिविक्लवा सुतरामात्मानं पीडयसि ।

३५ **वृद्धा** — (चिर निर्वर्ण्य पुत्रस्याङ्गानि स्पृशन्ती ।) हा पुत्रक कथमेतत्तेऽदृष्टसूर्यकिरणं सुकुमारं शरीरं निर्घृणहृदयो गरुड आहारयिष्यति । (कण्ठे गृहीत्वा रोदिति ।)

३६ **शङ्ख०** — अम्ब अलं परिदेवितेन । पश्य ।

क्रोडीकरोति प्रथमं यदा जातमनित्यता ।
धात्रीव जननी पश्चात्तदा शोकस्य कः क्रमः ॥ ८ ॥

(गन्तुमिच्छति ।)

३७ **वृद्धा** — पुत्रक मुहूर्तकमपि तिष्ठ । यावत्ते वदनं प्रेक्षे ।

३८ **किङ्क०** — एहि कुमार शङ्खचूड । किं ते मात्रा भणन्त्या । पुत्रस्नेहमोहिता खल्वेषा न जानाति राजकार्यम् ।

३९ **शङ्ख०** — भद्र अयमागच्छामि ।

४० **किङ्क०** — (आत्मगतम् ।) आनीतः खल्वेष मया वध्यशिलासमीपम् । यावदेतद्वध्यचिह्नं रक्तांशुकयुगलं दत्त्वा वध्यशिलां दर्शयामि ।

४१ **नाय०** — (दृष्ट्वा ।) अये इयमसौ योषित् । (शङ्खचूडं दृष्ट्वा ।) नूनमनेनास्याः सुतेन भवितव्यं यदर्थमाक्रन्दति । (समन्तादवलोक्य ।) न खलु पुनः किंचिदस्या भयकारणं पश्यामि । तत्कुतोऽस्या भयमिति किमुपसृत्य पृच्छामि । अथ वा प्रसक्त एवायमालापः । कदाचिदत एवास्याभिव्यक्तिर्भविष्यति । तद्विटपान्तरितस्तावच्छृणोमि । (तथा करोति ।)

१ मम हृदयमन्धकारीभविष्यति पातालमपि ।. २ किमिति वैक्लव्येन; ०क्लवतया सुतरां नः. ३ न्यामृशन्ती. ४ ०त्वा तार. ५ जातं नित्यम०.

तयोन्मत्तयाः । बहून् अनेकविधान् प्रलापान्विलापान् कृत्वा हे पुत्रक तव कः त्राता रक्षकः भवेदिति कृपणं दिनं यथा तथा दिक्षु सर्वासु दिशासु दृशं दृष्टिं क्षिपन्त्याः प्रेरयन्त्याः । कोपि त्राता भवेदिति तत्र तत्रावलोकयन्त्या इत्यर्थः । मातुः अङ्के उत्सङ्गे अवस्थितं । न तु परोक्षम् । शिशुं बालकम् । घृणां दयां सकरुणा अन्ततः

OLD WOMAN—(*Weeping*) Alas! dear son, Shankhachuda, how indeed you are to be seen by me today, being killed! (*Touching his chin*) Deprived of the moon of your face, the nether world will be lost in darkness

SHANKHA—Mother, why do you torment yourself so much, by this great grief?

OLD WOMAN—(*Observing long and touching the limbs of her son*) Alas! my dear son! How will that cruel hearted Garuda devour this delicate body of yours, which has never seen (i e suffered) even the rays of the sun? (*Clasping him by the neck, weeps*)

SHANKHA—Mother, enough of lamentation! See

When first mortality (*anityata*) clasps to her bosom the new born (child), and then does the mother (clasp) like a nurse, where is the occasion for grief? (8)

(*Wishes to go*)

OLD WOMAN—Dear son, stay for a moment, while I shall have a look at your face

SERVANT—Come, Master Shankhachuda, what have you to do with your prattling mother? Overpowered by her affection for the son, she does not understand the duty towards the king

SHANKHA—Good man, here I come

SERVANT—(*To himself*) He has been brought by me near the rock of slaughter So, giving him the pair of red garments the mark of the victim, I shall show him the slaughter-stone

HERO—(*Seeing*) O, this is the woman (*Looking at Shankhachuda*) Surely, this must be her son for whom she is crying (*Looking around*) Indeed, I do not see any cause for her fear So, shall I, going near, ask her whence her fear comes? But this conversation is already being continued Perhaps, from this (conversation) itself, it (i e the cause) will be clear Concealed behind the tree, therefore, I shall just hear (it) (*does accordingly*)

भक्षयत. । खे आकाशे गच्छन्तीति खगा । अन्येभ्योपि—इति वार्तिकेन डः । तेषामधिपस्य गरुडस्य चञ्चुरेव वज्रेण न कृता किन्तु हृदयमपि वज्रेण कृतमिति मन्ये । उत्प्रेक्षा स्वभावोक्तिश्चालङ्कारौ । शार्दूलविक्रीडित वृत्तम् ॥ ९ ॥ स्फोट स्फुटनम् । यैरिति । दया पर येषा ते दयापराः कृपालव. । अत्यन्त दयापरा अत्यन्तदयापरास्तै यै अर्थिना याचकाना प्रार्थना याञ्चा वञ्च्या अलब्धफलेत्यर्थ । न विहिता कृता । यै कारुण्यस्य दयाया परिग्रह स्वीकार तस्मात्कारुण्यपरिग्रहाद्धेतो । परार्थे

४२ किङ्क०—(साक्ष कृताञ्जलि ।) कुमार शङ्खचूड एष स्वामिन आदेश इति कुलवेदश निष्ठुर मन्त्र्यते ।

४३ शङ्ख०—भद्र कथय ।

४४ किङ्क०—नागलोकस्वामी वासुकिस्त्व आज्ञापयति ।

४५ शङ्ख०—(शिरस्यञ्जलिं कृत्वा सादरम् ।) किमाज्ञापयति स्वामी ।

४६ किङ्क०—एतद्रक्तांशुकयुगल परिधायारोह वध्यशिलाम् । येन त्वा रक्तांशुकचिह्नोपलक्षित गरुडो गृहीत्वाहार करोतीति ।

४७ नाय०—कष्टमयमसौ तपस्वी वासुकिना परित्यक्तो गरुत्मत आहाराय दत्त ।

४८ किङ्क०—शङ्खचूड गृहाणेदम् । (इति वस्त्रयुगलमर्पयति ।)

४९ शङ्ख०—(सादरम् ।) उपनय । (इति गृहीत्वा ।) गृहीत शिरसि स्वाम्यादेश ।

५० वृद्धा—(पुत्रस्य हस्ते वाससी दृष्ट्वा सोरस्ताडम् ।) हा वत्स एतत्खलु वज्रपातसनिभ सभाव्यते । (इति मूर्छिता पतति ।)

५१ किङ्क०—आसन्ना खलु गरुडस्यागमनवेला । तदहमपक्रमामि । (इति निष्क्रान्त ।)

५२ शङ्ख०—अम्ब समाश्वसिहि समाश्वसिहि ।

५३ वृद्धा—(समाश्वस्य सास्रम् ।) हा जात हा पुत्रक । हा मनोरथशतलब्ध । हा भक्त । हा विनयसागर । क्व ते पुनरीदृश पौर्णिमाचन्द्रसदृश मुख प्रेक्षिष्ये । (कण्ठे गृहीत्वा रोदिति ।)

५४ नाय०—(सास्रम् ।) अहो नैर्घृण्य गरुत्मत । अपि च ।

> मृदाया मुहुरश्रुसततिमुचः कृत्वा प्रलापान्बहू
> न्कातात तव पुत्रकेति कृपण दिक्षु क्षिपन्त्या दृशम् ।
> अङ्के मातुरवस्थित शिशुमिम त्यक्त्वा घृणामश्नत
> अत्तुर्नैव खगाधिपस्य हृदय वज्रेण मन्ये कृतम् ॥ ९ ॥

१ गृहीता शिरसि स्वाम्यादेशमर्पयति. २ (इदृ वज्रपिद्ध क्षणा येन विमेरिता हृदयम्). ३ अभिने० ४ अयम ५ मृदा ६ कतान्ता, उदवीक्ष्याम् ७ वज्रेणैव.

प्रौ अत्यासमापदे स्थारे. मम्बा न निश्चिता । ५ स्थि दाम, तुम पदुस तत दुस्तरा मतारीति दृष्टा भी देवा । कथ ता । ते साधव

FOURTH ACT

SERVANT—(*With tears and folding his hands*) Master Shankhachuda, because it is the king's command, these harsh words are being addressed to you

SHANKHA—Good man, speak out

SERVANT—Vasuki, the lord of the nether world, commands you—

SHANKHA—(*Placing folded hands over his head, respectfully*) What does the Lord command?

SERVANT—Putting on this pair of the red garments, ascend the rock of slaughter So that, seizing you, marked out by a sign of the red garments, Garuda will devour you

HERO—What a pity that this poor fellow, abandoned by Vasuki, is given to Garuda for his food

SERVANT—Shankhachuda, take this (*Offers the pair of garments*)

SHANKHA—(*Respectfully*) Bring it (*Receiving*) I have borne my Lord's command over my head

OLD WOMAN—(*Seeing the pair of clothes in her son's hand and beating her breast*) Oh my child! It appears to me like a fall of thunderbolt (*Faints and falls down*)

SERVANT— The time for Garuda's arrival is drawing near So I shall quickly go away (*Exit*)

SHANKHA—Mother, take heart, take heart

OLD WOMAN—(*Recovering, with tears*) Oh child! Oh dear son! Oh you, obtained after hundreds of desires! Oh devoted one, oh ocean of modesty, where shall I again see such a face as yours, resembling the full moon (*Clasping him by the neck, weeps*)

HERO—(*With tears*) Oh, the cruelty of Garuda! Moreover,

I think that not ony the beak, but the heart (also) of the king of birds (i.e Garuda is made of adamant, who, setting aside pity, would devour this child placed on the lap of his mother, who is bewildered and who is shedding a continuous stream (samtati), of tears after having uttered many lamentations, casting her eyes in a pitiable manner (Krpanam) in all directions, saying, "O my dear son, who will be your saviour?" (9)

सज्जना अस्त गता. नष्टा । अत हे मात. बाष्पवेग सहर संस्तम्भय । अधुना कस्याग्रत पुरत रुद्यते । सप्रति कस्तव रोदन श्रृणुयादनेन त्व कृतकार्या भविष्यसीति भावः । शार्दूलविक्रीडित वृत्तम् ॥ १० ॥ इति कृत्वा एव विचार्य वातानुकम्पेन उत्पन्नदयेन निवारित· बध्यत्वादिति शेष. । येन समाश्वसिमि इति शेषः ।

५५ शङ्ख० — (दुःखातिशयान्मातुर्हृदयस्फोटं शङ्कमानो मातरं प्रति ।)

येरत्यन्तदयापरैर्न विहिता वन्ध्याऽर्थिनां प्रार्थना –
यैः कारुण्यपरिग्रहान्न गणितः स्वार्थः परार्थं प्रति ।
ये नित्यं परदुःखदुःखितधियस्ते साधवोऽस्तं गता
मातः संहर बाष्पवेगमधुना कस्याग्रतो रुद्यते ॥ १० ॥

(स्वहस्तेन मातुरश्रूणि मार्जयन् ।) अम्ब किमिति वैक्लव्यं ते । ननु समाश्वसिहि समाश्वसिहि ।

५६ वृद्धा — (सास्रम् ।) पुत्रक कथं समाश्वसितव्यम् । (किं एक एव पुत्रक इति कृत्वा जातानुकम्पेन निवारितो नागराजेन वासुकिना ।) हा कृतान्तहतक कथमिदानीं त्वया निघृणहृदयेनैवं विस्तीर्णे जीवलोके मम पुत्रक एव स्मृतः । सर्वथा हतास्मि मन्दभागिनी । (इति पुनर्मूर्च्छति ।)

५७ नाय० — (सकरुणम् ।)

आर्तं कण्ठगतप्राणं परित्यक्तं स्वबान्धवैः ।
त्राये नैनं यदि ततः कः शरीरेण मे गुणः ॥ ११ ॥

तद्यावदुपसर्पामि ।

५८ शङ्ख० — अम्ब संस्तम्भयात्मानम् ।

५९ वृद्धा — हा पुत्रक शङ्खचूड दुर्लभः संस्तम्भः । यदा नागलोकपरिरक्षकेण वासुकिना स्वयं परित्यक्तोऽसि तदा कस्तेऽपरः परित्राणं करिष्यति ।

६० नाय० — (सत्वरमुपसृत्य ।) नन्वहमहम् ।

६१ वृद्धा — (ससंभ्रमं गरुडभ्रान्त्या स्वोत्तरीयेण पुत्रमाच्छाद्य नायकमुपसृत्य ।) विनतानन्दन खादय माम् । अथाहं ते नागराजेनाहारनिमित्तं परिकल्पिता ।

६२ नाय० — (सास्रम् ।) अहो पुत्रवात्सल्यम् ।

अस्या विलोक्य मन्ये पुत्रस्नेहेन विक्लवत्वमिदम् ।
अकरुणहृदयः करुणां करिष्यति भुजङ्गशत्रुरपि ॥ १२ ॥

१ आत्मनोऽश्रूणि निवारयन्. २ न निवा. ३ अविच्छिन्ने जीवलोके मम पुत्रो न विस्मृतः । ४ मूर्च्छां नाटयति. ५ बन्धुभिः. ६ तदा. ७ कुर्वीत.

स्मृतः गरुडस्य भक्ष्यत्वेन योजयितुमिति भावः । एवं मूर्च्छान्तेन करुणप्रकर्षेणोद्दीपितधृगः स्वाध्यवसायं व्यतिरेकेण समर्थयति—आर्तमिति । यदि अहं आर्तं

SHANKHA—(*Suspecting that his mother's heart would break due to excessive grief, addressing the mother,*)

Those good people, by whom, out of extreme compassion, the request of the supplicants was never rendered fruitless (*Vandhya*), by whom, due to their acceptance of (the vow of) kindness, personal benefit was not counted as against the good of others, and whose hearts are always distressed at the misery of others—(those good people) have all gone away O mother, withhold this flow of tears Before whom, do you now weep? (10)

(*Wiping off his mother's tears with his own hands*) Mother, why are you distressed? Take heart, take heart

OLD WOMAN—(*With tears*) Dear son, how can I be consoled? Why were you not exempted by Vasuki, the lord of serpents, feeling pity that you are my only son? O cruel death, how is it that in this vast world of mortals, my son alone was remembered by you, the cruel-hearted one? I am undone in every way, unfortunate that I am (*Again faints away*)

HERO—(*With pity*)

If I do not protect this distressed one, whose life is lingering at the throat, and who is abandoned by his own relatives, then what is the use of my body? (11)

I shall just approach

SHANKHA—Mother, control yourself

OLD WOMAN—Alas, dear son Shankhachuda, consolation is difficult for me now When you have been abandoned by Vasuki himself, the protector of the serpent-world, who else will protect you?

HERO—(*Approaching hastily*) Indeed I will (protect him)

OLD WOMAN—(*Covering her son with her upper garment in confusion, mistaking (the hero) for Garuda, and approaching the hero*) O son of Vinata, kill me I have been fixed upon, today, by the lord of serpents, as your food

HERO—(*With tears*) O, the affection for the son!

Looking to this affliction of hers, due to her love for her son, I think that even the cruel hearted enemy of serpents will show mercy (12)

पीडित कातर्यमापन्न वा। कण्ठ गता. प्राणा यस्य त कण्ठगतप्राणमासन्नमृत्युम्। स्वबान्धवै. परित्यक्तमेन शखचूड न त्राये प्राणक्षयात रक्षामि तर्हि मे शरीरेण क: गुण किं प्रयोजनम्। न कोऽपीत्यर्थ:। कस्मायर्थायेद शरीर ध्रियते इति भाव.। अनेन अस्य प्राणरक्षा विधाय स्वशरीर सफलता नेष्यामीति स्वाध्यवसाय.

६३ शङ्ख० — अम्ब अलमलं त्रासेन । न खल्वयं नागशत्रुः । पश्य ।

महाहिमस्तिष्कविभेदमुक्तरक्तच्छटाचर्चितचण्डचञ्चुः ।
क्वासौ गरुत्मान्क्व च नाम सौम्यः सत्त्वस्वभावाकृतिरेष साधुः ॥ १३ ॥

६४ वृद्धा — पुत्रक अहं खलु तव मरणभीता सर्वमपि जीवलोकं गरुडमयं प्रेक्षे ।

६५ नाय० — अम्ब मा भैषीः । नन्वहं विद्याधरस्तव पुत्ररक्षणार्थमेवागतः । अतस्त्वं धीरा भव ।

६६ वृद्धा — (सहर्षम् ।) पुत्रक पुनः पुनरेवं भण ।

६७ नाय० — अम्ब किमनेन पुनः पुनरभिहितेन । ननु कर्मणैव संपादयामि ।

६८ वृद्धा — (शिरस्यञ्जलिं बद्ध्वा ।) पुत्रक चिरं जीव ।

६९ नाय० —

ममैतदम्बार्पय वध्यचिह्नं प्रावृत्य यावद्विनतात्मजाय ।
पुत्रस्य ते जीवितरक्षणार्थं स्वदेहमाहारयितुं ददामि ॥ १४ ॥

७० वृद्धा — (कर्णौ पिधाय ।) प्रतिहतममङ्गलम् । जात त्वमपि मे शङ्खचूडनिर्विशेष एव पुत्रकः । अथ वा शङ्खचूडादप्यधिकतरो य एवं बन्धुजनपरित्यक्तं मे पुत्रकं निजशरीरदानेन रक्षितुमिच्छसि ।

७१ शङ्ख० — (सविषादम् ।) अहो जगद्विपरीतमस्य महात्मनश्चरितम् । कुतः ।

१ सोमसौम्य० ; सौम्यस्वभावरूपाकृतिः. २ एव. ३ त्वत्पु०—घातकः. ४ यदि विनतासुताय. ५ (सहर्षः). ६ अहिअ (अधिकः). ७ गरिमाणम्. ८ चैतः

प्रदर्शितः । परिकरालङ्कारः ॥ ११ ॥ गत्वाम्बय निर्वापय । उत्तरीयेण उत्तरीय-वर्तितेन वस्त्रेण । उत्तमाङ्गे देहभागे मस्तके । महाहिमस्तिष्कः । अहो विस्मया-पदमित्यर्थः । यस्मै पुत्रादौ स्नेहपात्रे कामः अप्यास्मीति यत्नः । यत्रोपमाक्षी कामदेवे । इति स्मृ । स्नेहस्य भावः सामान्यम् । पुत्रे सामान्यं पुत्रसामान्यं पुत्रविशेषत्वर्थः । अम्बा इति । अम्बाः पुत्रस्नेहेन पुत्रप्रेम्णा हेतुना हृदयं दुःखेन विदीर्णं व्याकुलं । तथापि सकलेदनादिव्यापारानि निर्विशेष । नास्ति कश्चन यस्य गात्रो हृदयं यस्यापि आक्रन्ददयः दुर्गतिः पुत्रस्नेहपूर्वकानि करुणं अभिनन्दयो परिपश्यतीति मन्ये । तन्मध्ये इव स्तोति सामान्यार्थश्चार्थः ।

SHANKHA—Mother, away with fear Indeed this is not the enemy of serpents See,

Where that Garuda with his terrible beak smeared with streaks of blood gushing forth at the tearing of the brains of the big serpents, and where this gentle and pious man, whose nature and appearance (*akrti*) are quite befitting his noble virtues! (13)

OLD WOMAN—Dear son, afraid of your death, I see the whole world of living beings filled with Garuda!

HERO—Mother, be not afraid Indeed, I am a Vidyadhara and have come here just for the purpose of saving your son So compose yourself

OLD WOMAN—(*With joy*) Dear son, say these words again and again

HERO—What is the use of saying it again and again? I shall prove it by action

OLD WOMAN—(*Folding her hands on the head*) Dear son, may you live long!

HERO—

Mother, give me this mark of a victim, covered with which I shall offer my body to the son of Vinata to be eaten up for his food, in order to save the life of your son (14)

OLD WOMAN—(*Closing her ears*) May evil be averted! Child, you are also a son to me just like (lit without any difference from) Shankhachuda, or you are even more so than Shankhachuda, as you thus wish to save my beloved son, abandoned by (his) relatives, by offering your own body

SHANKHA—(*Sorrowfully*) Oh, the action of this noble one is quite contrary to the ways of the world

For,

उत्प्रेक्षा । आर्या छन्दः ॥ १२ ॥ महाहीति । महान्तः बृहत्कायाश्च ते अहयश्च महाहयस्तेषां मस्तिष्काणि मस्तकान्तस्थाः स्नेहास्तेषां विभेदेन विदारणेन मुक्ताभिः निसृताभिः रक्तच्छटाभिः रुधिरधाराभिः चर्चिता लिप्ता चण्डा भीषणा चञ्चुर्यस्य सः । उग्रस्वरूप इत्यर्थः । गरुत्मान् क । सौम्यः शान्ताकृतिः सत्त्वानुरूपः स्वभावः आकृतिश्च यस्य स तथोक्तः । एष साधुश्च नाम क । कद्वयेनोभयोरत्यन्तं विसदृशत्वमुक्तम् । अत्र नायकगरुडयोरत्यन्तविलक्षणयोः सम्बन्धोऽनुपपद्यमानतयैव कशब्दद्वयेन प्रतीयते इति विषमालङ्कारः । उपजातिर्वृत्तम् ॥ १३ ॥ तव पुत्ररक्षणार्थमेवागतः इति श्रुत्वा स्वविक्रमेणैव गरुडात्पुत्रं रक्षेदिति मन्यमानाह—पुनश्च पुनः पुनरिति । कर्मणा रक्षणरूपेण न तु वृथोक्त्या । कर्मणैवेति यदुक्तं तत्स्पष्टयति-ममैतदिति । हे अम्ब मातः एतद् वध्यचिह्नं रक्तवस्त्रयुगलं मम मह्यमर्पय देहि ।

विश्वामित्रः श्वमांसं श्वपच इव पुराऽभक्षयद्यन्निमित्तं
नाडीजङ्घो निजघ्ने कृततदुपकृतिर्यत्कृते गौतमेन ।
पुत्रोऽयं कश्यपस्य प्रतिदिनमुरगानत्ति तार्क्ष्यो यदर्थं
प्राणांस्तानेषं साधुस्तृणमिव कृपया यः परार्थे जहाति ॥ १५ ॥

(नायकमुद्दिश्य ।) भो महात्मन् दर्शिता त्वयेयमात्मप्राणप्रदानव्यवसाय-निर्व्याजा मयि दयालुता । तदलमनेन निर्बन्धेन । पश्य ।

जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः ।
परार्थे बद्धकक्षाणां त्वादृशामुद्भवः कुतः ॥ १६ ॥

तत्किमनेन निर्बन्धेन । प्रसीद मुच्यतामयमध्यवसायः ।

७२ नाय० — (शङ्खचूडं करे गृहीत्वा ।) कुमार शङ्खचूड न मे चिराल्लब्धावसरस्यास्य (परार्थसंपादनमनोरथस्यान्तरायं) कर्तुमर्हसि । तदलं विकल्पेन । दीयतां मे वध्यचिह्नम् ।

१ एव चित्रम्. २ ददाति. ३ आत्मप्रदानाध्यवसायात्. ४ कृपालुता. ५ ते मरणाग्रहेण. ६ उत्पद्यन्ते. ७ परार्थे; परार्थे दत्तदेहानाम्. ८ यथार्थसम्पादितम०.

यावद् अवधारणे । येन स्वदेहं प्रावृत्यावगुण्ठ्य वै पुत्रस्य जीवितरक्षणार्थं विनतात्मजाय गरुडाय आहारयितुं भक्षयितुं ददामि । उपजातिः वृत्तम् ॥ १४ ॥ प्रतिहतममिति । अमङ्गलं मरणरूपम् । अवक्तव्यस्य मरणादेः श्रवणे एवं मा भूदित्यर्थे प्रयुज्यते एतत् । निर्गतः विशेषः आधिक्यं यस्मात्स निर्विशेषः । शंखचूडान्निर्विशेषः शंखचूडनिर्विशेषः । तत्तुल्य इत्यर्थः । जगद्विपरीतं ईदृशं जगति न दृष्टम् इत्यर्थः । विश्वामित्र इति । पुरा विश्वामित्रः । न तु यः कश्चिदविशेषज्ञः । विश्वस्य मित्रं विश्वामित्रः । मित्रे चर्षौ इति दीर्घः । श्वानं पचतीति श्वपचः । अन्त्यजः । चण्डालः स इव । ये निमित्तं यस्मिन्कर्मणि तद्यथा तथा यन्निमित्तं येषां प्राणानां कृते श्वमांसं कुक्कुरमांसम् । अभक्ष्येषु प्रधानतमम् । अभक्षयत् । तदुक्तं मनुना—क्षुधार्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम् । चाण्डालहस्तादादाय धर्माधर्मविचक्षणः ॥ अत्रेदं कथा—पुरा किल—अनावृष्टिरभूद् घोरा लोके द्वादशवार्षिकी । * * * तस्मिन्प्रतिभये काले क्षीणधर्मे युधिष्ठिर । बभूवुः क्षुधिता मर्त्याः खादमाना. परस्परम् ॥ विश्वामित्रोऽपि मुनिर्देहधर्मानुवृत्त्या क्षुधार्तः अभ्यवहारार्थं किमप्यपश्यन्नितस्ततः परिभ्रमन् श्वपचानां वसतिं प्राप । तत्र निशि श्वमांसं भक्षणार्थं जिहीर्षुः शयनचेष्टितेन चण्डालेनानुचितमिदमिति निषिध्यमानोऽपि प्राणानां सर्वथा रक्षणीयत्वं समर्थ्य युक्त्या तं प्रबोध्य मांसं जहार । ततो

This good man gives up, through pity for the sake of another, as if it were a mere straw, his very life, for the sake of which Visvamitra formerly ate the flesh of a dog like a *Chandala*, for the sake of which Gautama killed Nadijangha, who had done him a favour, and for the sake of which this son of Kasyapa, *Garuda, eats the serpents everyday* (15)

(*Addressing the hero*) O magnanimous one, you have shown to me this kindness, unalloyed (*nirvyaja*) because of your determination to sacrifice your own life So enough of this persistence See,

Insignificant creatures like myself are born and die (in *any number*) But whence is the birth of *persons like you*, who are ready to serve (lit who have girded up their loins) for the sake of others? (16)

So what is the use of this insistence of yours to die (for me)? Be pleased Give up this resolve

HERO — (*Taking Shankhachuda by the hand*) Shankhachuda, it is not proper for you to put an obstacle (*antaraya*) in the way of my desire to accomplish the good of others, for which an opportunity has been obtained (by me) after a long time So enough of hesitation Give me the token of the victim

---

जग्राह स श्वाङ्ग जीवितार्थी महामुनिः। अथास्य बुद्धिरभवद्विधिनाहं श्वजाघनीम्। *भक्षयामि यथाकालं पूर्वं सन्तर्प्य देवताः॥ ततोभिमुपसहृत्य श्राहोश विधिना मुनिः।* * * * आहूय देवानिन्द्रादीन्भाग भागं विधिक्रमात्। एतस्मिन्नेव काले तु प्रववर्ष स वासव। सञ्जीवयन्प्रजाः सर्वा जनयामास चौषधीः॥ इति॥ विशेषस्तु भारते शान्तिपर्वणि १४१ तमेऽध्याये द्रष्टव्यः। तस्य गौतमस्य उपकृतिः उपकार तदुपकृतिः। कृता तदुपकृति येन स कृततदुपकृति॰। अनेन कृतघ्नतादोषोपि ध्वनितः। यत्कृते येषा प्राणाना कृते यद्रक्षणार्थमित्यर्थः। पुरा गौतमेन तन्नाम्ना केनचित् ब्राह्मणेन नाडीजङ्घो नाम कश्चिद् बको निजघ्ने हतः। भक्षितश्चेत्यर्थात्। अत्र गौतमस्य कर्तृत्वे प्रतिपादिते उपकृतिसम्बन्धित्वेन तस्य तच्छब्दनिर्देशो न युक्तः। कृतोपकृतिरित्येवाल्म् इति व्यक्तिविवेककारो दूषण प्रतिपादितवान् इति शिवरामः। अत्रेय कथानुसधेया— *पुरा किल गौतमो नाम कश्चिद्ब्राह्मणो मध्यदेशीयो दस्युधर्मपर धनाल्लिप्सया* पर्यटन् परिश्रान्त न्यग्रोध सुमण्डलं दृष्ट्वा तस्याधस्तादुपाविशत्। तत्रस्थः स नाडी जङ्घनाम्ना बकराजेन राजधर्मेति विख्यातेन दृष्टोतिथिधर्मेण पूजितः पृष्टश्च परिभ्रमणकारणम्। ततोब्रवीद्गौतमस्तं दरिद्रोह महामते। समुद्रगमनाकाङ्क्षी द्रव्यार्थमिति भारत॥ इति। स चैव तस्य द्रव्यार्थित्व ज्ञात्वा त स्वमित्रस्य विरूपाक्षनाम्नो

७३ शङ्ख० — भो महात्मन् । हे साहसिकाग्रणीः । किं वृथा प्रयासेन । न खलु शङ्खचूडः शङ्खधवलं शङ्खपालकुलं मलिनीकरिष्यति । अथानुकम्पनीया वयं तदियमस्मद्विपत्तिविक्लवाम्बा यथा न परित्यजति जीवितं तथाभ्युपायश्चिन्त्यताम् ।

७४ नाय० — किमत्र चिन्त्यते । ननु चिन्तित एवाभ्युपायः । स च त्वदायत्तः ।

७५ शङ्ख० — क इव ।

७६ नाय० —

> म्रियते म्रियमाणे या त्वयि जीवति जीवति ।
> तां यदीच्छसि जीवन्तीं रक्षात्मानं ममासुभिः ॥ १७ ॥

अयमेवाभ्युपायः । तदर्पय त्वरितं वध्यचिह्नम् । यावदनेनात्मानमाच्छाद्य वध्यशिलामारोहामि । त्वमपि जननीं पुरस्कृत्यास्मात्प्रदेशान्निवर्तस्व । कदाचिदियमालोक्य संनिकृष्टमाघातस्थानं स्त्रीस्वभावकातरतया प्राणाञ्जह्यात् । किं न पश्यति भवानिदं विपन्नपन्नगानेककङ्कालसंकुलं महाश्मशानम् । तथा हि ।

१ अस्मात्प्रा॰ (स्मरणान्निवर्तते॰ वा यथा. २ आत्मादेशात्. ३ स्त्रीसहभुवा कातरत्वेनाम्बा.

राक्षसस्य समीपं प्रेषितवान् । स च गौतमस्तस्माल्लब्धसुवर्णभारः प्रतिनिवृत्य तमेव न्यग्रोधं प्राप्य नाडीजङ्घसमीपे विश्रान्तः । ततस्तमभ्यगाद्राजन्राजधर्मा खगोत्तमः । स्वागतेनाभ्यनन्दच्च गौतमं मित्रवत्सलः ॥ तस्य पक्षाग्रविक्षेपैः क्लमं व्यपनयद्बकः । पूजां चाप्यकरोद्धीमान्भोजनं च यथाविधि ॥ स तु गौतमः पथि किंचिद्भोजनं नास्तीति चिन्तापरः कृतघ्नः पार्श्वे विश्रब्धं सुप्तं बकराजं हत्वाग्नौ विपच्य गृहीत्वा ययौ । इति । विस्तरस्तु भारते शान्तिपर्वणि १६८–१७६ अध्यायेषु द्रष्टव्यः । अयमिति प्रकरणाद् बुद्धिस्थत्वेन प्रत्यक्षनिर्देशः । कश्यपस्य तदाख्यप्रजापतेः पुत्रः । तृतस्य कश्यपस्य अपत्यं पुमान् तार्क्ष्यः गरुडः. यदर्थं यत्प्राणरक्षणार्थं प्रतिदिनमुरगान् नागान् । "उरगजातिम् । जातौ बहुवचनम् । अन्यथा 'इत्येकशः प्रतिदिनं' इत्यनेन विरोधः" इति शिव० । अत्ति भक्षयति । तान् तादृशान् । सर्वथा रक्षणीयानित्यर्थः । प्राणान् यः एव साधुः तृणमिव कृपया परार्थे परप्राणरक्षार्थं सहसा त्यजति । तस्मात्स्य स्वगद्विषतो न्यायमिति सम्बन्धः । अत्र उपमानभूतेभ्यो विश्वामित्रादिभ्यः उपमेयस्य नायकस्याधिक्यप्रदर्शनात् व्यतिरेकालंकारः । स चोक्तोत्प्रेक्षाभ्यां संसृष्टः । स्रग्धरा वृत्तम् ॥ १५ ॥ आत्मनः प्राणानां प्रदाने स्वरगाय उप-

SHANKHA—O noble one, O the foremost of the brave! Why trouble (yourself) in vain? Shankhachuda will never soil (i e disgrace) the family of Shankhapala, white (i e pure) as a conch If, however, we deserve pity, then think of some way by which this my mother, distressed by my calamity, would not give up her life

HERO—What is there to be thought about? Indeed, the remedy has already been thought of and it depends upon you

SHANKHA—How is it?

HERO—

If you wish her to be living, who dies if you die and lives if you live, save yourself by (using) my life (17)

This is the only remedy So give me the token of the victim Covering myself with it, I shall ascend the slaughter-stone You, too, headed by your mother, return from this place Perhaps, on seeing the place of slaughter so near, she may give up her life, due to fear natural for a woman Do you not see this big cemetery filled with many a skeleton of dead serpents? For

---

मन्तेन निर्व्याजा छलरहिता स्फुटेत्यर्थः । अनेन निर्बन्धेन प्राणपरित्यागाग्रहेण । जायन्त इति । अहमिव दृश्यमाना मादृशाः मद्विधाः क्षुद्राश्च ते जन्तवश्च क्षुद्रजन्तवः तुच्छाः प्राणिनः । जायन्ते च म्रियन्ते च । तेषां जन्ममरणाभ्यां न कस्यापि लाभः क्षतिर्वा । परार्थे परार्थसाधने बद्धा कक्षा यैस्तेषां बद्धपरिकराणां सर्वात्मनोद्यतानां त्वादृशामुद्भव उत्पत्तिः कुतः । त्वद्विधा विरला एव जायन्ते इत्यर्थः ॥ १६ ॥ अध्यवसायः उत्साहः । साग्रहो निश्चय इति वा । लब्धः अवसरः यस्य । परार्थस्य सम्पादनं करणं तत्र मनोरथः । यद्वा परार्थसम्पादनरूपः मनोरथः तस्य । अन्तरायं विघ्नम् । विकल्पेन अन्यथाकल्पनेन । युक्तायुक्तादिविचारेणेत्यर्थः । अग्रं नयतीति अग्रणीः धुरीणः । साहसिकानां दुष्करकर्मकारिणामग्रणीः । वृथाप्रयासेन अनर्थश्रमेण । अथेति पक्षान्तरोपन्यासार्थम् । यदि वयं केनचित्प्रकारेण दयनीयाः । अस्माकं ममेत्यर्थः विपत्तिर्मृत्युस्तेन विक्लवा विह्वला । म्रियते इति । त्वयि म्रियमाणे न तु मृते । तव मरणनिर्वर्तनात्प्रागेवेत्यर्थः । या म्रियते । त्वयि जीवति प्राणान्धारयति या जीवति तां तव मातरं यदि जीवन्तीमिच्छसि तर्हि ममासुभिः । त्वदर्थं मम प्राणार्पणमनुमन्येत्यर्थः । आत्मानं रक्ष ॥ १७ ॥ पुरस्कृत्य अग्रतः स्थापयित्वा । संनिकृष्टं समीपस्थम् । स्त्रीस्वभावस्य कातरता भीरुता तया हेतुना । विपन्ना मृताश्च ते पन्नगाश्च तेषामनेकैः कङ्कालैः शरीरास्थिभिः सङ्कुलं व्याप्तम् । महत् च तत् श्मशानं महाश्मशानम् । शवाः शेरते अत्रेति श्मशानम् । पृषोदरादिः । श्मशानं स्यात्पितृवनम् इत्यमरः । चञ्चद्भिरिति । चञ्चता चलता

चञ्चच्चञ्च्वग्रकृत्तच्युतपिशितलवग्राससंवृद्धगर्धै-
गृध्रैरावद्धपक्षद्वितयविधुतिभिर्बद्धसान्द्रान्धकारे ।
धै[illegible]

७७ शङ्ख०—कथं न पश्यामि

प्रतिदिनमशून्यमहिनाहारेण विनायकाहितप्रीति ।
शशिधवलास्थिकपालं वपुरिव रौद्रं श्मशानमिदम् ॥ १९ ॥

१ च्चूधृतार्धं; च्चूधूतार्ध. २ सम्बद्धलक्षैः. ३ कारैः. ४ यत्रोद्दामं भ्रमन्त्यः शमितशिखिशिखा. ५ स्थगित; शमित. ६ अजस्रं; स्रुत–स्रुति. ७ मिश्रे. ८ दिनमहिना०.

चञ्च्वग्रेण । अत्र गरुडस्येति केचित् । गृध्राणामित्यन्ये । कृत्ताच्छिन्नात् च्युताः भ्रष्टाः ये पिशितस्य मांसस्य लवाः तेषां ग्रासे भक्षणे संवृद्धा गर्धो अभिलाषः येषां तैः । अत एव अवतरणार्थमारब्धाः आरब्धाः पक्षद्वयस्य विधुतयः विधृत्य कम्पनानि यैः । तादृशैः गृध्रैः बद्धः जनितः सान्द्रः घनः अन्धकारः यस्मिन् एवंविधे अस्मिन् श्मशाने । अजस्रं निरन्तरं स्रुता गलिता बहला प्रभूता वसा मेदः तस्या वासेन संस्काराधानेन विस्रे आमगन्धिनि । मेदस्तु वपा वसा इति । विस्रं स्यादामगन्धि यत् इति चामरः । असृक्स्रोतसि रुधिरप्रवाहे । छिमिति पतन्त्यः । छिमिति जले अग्निपतने अव्यक्तानुकरणशब्दः इति शिवरामः । शिवानां शृगालीनां वक्त्रेभ्यः मुखेभ्यः । तासामुल्कामुखत्वात् । उद्भ्रान्ता उद्गीर्णाः । शिखिनामग्नीनां शिखाश्रेणयः ज्वालपंक्तयः स्वनन्ति शब्दायन्ते । पाठान्तरे यत्र उद्दाममप्रतिबन्धं यथा तथा भ्रमन्त्यः शमिताः शिखिशिखा याभिः तादृश्यः शिवानां श्रेणयः स्वनन्तीति योज्यम् । अत्र बीभत्स-भयानकौ स्फुटौ एव । स्वभावोक्तिः । अनुप्रासश्च । स्रग्धरा वृत्तम् ॥ १८ ॥ किं न पश्यति भवानिति यन्नायकेनोक्तं तत् श्मशानस्य भीषणस्वरूपताङ्गीकारेण आक्षि-पति—कथं न पश्यामीति । भीषणत्वमेव श्लेषेण वर्णयति—प्रतिदिनमिति । प्रतिदिनं नित्यं आहारेण गरुडस्य भोज्यभूतेन अहिना नागेन अशून्यं सहितं तत् । वीनां पक्षिणां नायकः तस्य आहिता जनिता प्रीतिर्येन तत् । यद्वा विनायकश्चासौ अहितः शत्रुश्च तस्य प्रीतिर्यत्र तत् । शशिवत् धवलमस्थीनि च कपालानि च अस्थिकपालं यत्र तथाभूतम् । इदं श्मशानं प्रतिदिनं अहिना अहिरूपेण हारेण अशून्यं युक्तम् । विशेषेण विघ्नान् दूरं नयतीति विनायकः गजाननः । तेन आहिता प्रीतिर्यस्य तत् । तथा शशिना धवलानि भूषणास्थीनि कपालानि च यत्र । तादृशं रुद्रस्य शिवस्येदं रौद्रं वपुः शरीरमिव इदं श्मशानं भाति । श्लेषानुप्राणितोपमालंकारः । आर्या छन्दः । अत्र शिवरामः—

In this (cemetery), where dense darkness is formed (*baddha*) by vultures, flapping (*vidhuti*) the pairs of their wings, whose greed is increased by their swallowing bits of flesh (*pishita*) as they are torn by the tips of their restless beaks, rows of the flames of fire are making a sound (*svananti*), emitted (*udvanta*) from the mouths of the female jackals and falling with a 'chim' sound into the river of blood stinking (*visra*) of the mass of fat, flowing continuously (18)

SHANKHA—How can I not see it?

This dreadful cemetery, which is not devoid of (i e full of) a daily feast upon serpents every day, which gives delight to the king of birds (*vi-nayaka*) and which is full of bones and skulls, as white as the moon, is like the body of *Siva*, which is never devoid of the garland in the form of serpents, which gives delight to Vinayaka (*Siva's* son) and which has (on it) the bones and *skulls* white with (the rays of) the moon (19)

एव शाब्देन अर्थेन समानधर्मेण श्मशानं रौद्रं वपुरिव नोद्वेगजनकम् । स्वामिनियोगनिर्वाहस्थानतया शिवविग्रहवदनुग्राहकमेवेति भावः । अत्र श्मशानोपमानत्वेन शिववपुषो न दुष्टत्वम् । श्मशाने प्याक्रीडा इत्युक्तदिशा तत्सम्बन्धेन सर्वेषा मङ्गलत्वमेव न केनापि तस्यामङ्गलत्वम् । किं च मरणोद्यतस्य तस्य परमशैवस्य महेश्वरानुसन्धानानुबन्धेन तथा दृष्टान्तपरिग्रहस्तस्य भीषिकानिरासार्थः इति ॥ १९ ॥ सामोपन्यासैः सान्त्ववचनप्रस्तावैः । शिरसि निहितः स्थापितः अञ्जलिः येन स, शिरोनिहिताञ्जलिः । मरणकाले अभीष्टतममाशास्ते—**समुत्पत्स्यामह** इति । हे मातः यस्या यस्या गतौ योनौ वय स्वकर्मपरिपाकानुसारेण समुत्पत्स्यामहे जनिष्यामहे *तस्या तस्या गतौ हे प्रियसुते प्रियः सुतः यस्याः तादृशि* । त्वमेव नः अस्माकं माता भूयाः । यतः एवमसामान्य पुत्रवात्सल्यमन्यस्या मातरि न दृष्टमिति भावः ॥ २० ॥ अपश्चिम नास्ति पश्चिमं उत्तरकालभव यस्मात्तत् । अन्तिममित्यर्थः । मरणस्योत्तरभावित्वात् । भगवन्त सकलैश्वर्यसम्पन्नम् । दक्षिणगोकर्णे तदाख्यशिवलिङ्गम् । प्रगतः दक्षिण प्रदक्षिण । तिष्ठद्गुप्रभृतीनि च इति अव्ययीभावः । ततश्चिवः । अप्रदक्षिण प्रदक्षिण सम्पद्यमान कृत्वा प्रदक्षिणीकृत्य । स्वाम्यादेश वासुकेराज्ञाम् । अत्र को नामाभ्युपाय इत्यस्य अर्थान्तरप्रयुक्तस्य इद रक्तांशुकयुगलमित्यस्योत्तरत्वेन सम्पन्नत्वात्तृतीय पताकास्थानकमिदम् । अतर्कितोपनतेन अतर्कितं अकस्माद् यथा तथा उपनतेन प्राप्तेन । अनेन दैवानुकूल्य प्रदर्शितम् । सफलीभूतः तत्सम्बन्धेन रक्तवासोयुगलला भात्र तु भोगादिसम्पत्त्या इति भावः । अभिवादनीया तस्यै मन्नमस्कृतिर्वाच्येत्यर्थः । अनेन तदिच्छानुवृत्तिर्ध्वनिता । **वासोयुगमिति** । प्राप्ते काले योग्यावसरे समागत

तद्गच्छ । किमेभि. सामोपन्यासैः । आसन्नः खलु गरुडागमनसमयः । (मातुरग्रतो जानुभ्यां स्थित्वा शिरोनिहिताञ्जलिः ।) अम्ब त्वमपि निवर्तस्वेदानीम् ।

समुत्पत्स्यामहे मातर्यस्यां यस्यां गतौ वयम् ।
तस्यां तस्यां प्रियसुते माता भूयास्त्वमेव नः ॥ २० ॥

(पादयोः पतति ।)

७८ वृद्धा — (सास्रम् । आत्मगतम् ।) हा कथमपश्चिममस्य वचनम् । (प्रकाशम् ।) पुत्रक न खलु त्वामुज्झित्वान्यतो मे पादौ प्रसरतः । तदहमपि त्वयैव सह मरिष्यामि ।

७९ शङ्ख० — (उत्थाय ।) यावदहमप्यदूरे भगवन्तं दक्षिणगोकर्णं प्रदक्षिणीकृत्य स्वाम्यादेशमनुतिष्ठामि । (मात्रा सह निष्क्रान्तः ।)

८० नाय० — कष्टम् । न संपन्नमभिलषितम् । तत्को नामाभ्युपायः ।

(सहसा प्रविश्य ।)

८१ कञ्चु० — इदं रक्तांशुकयुगलं—

८२ नाय० — (दृष्ट्वा सहर्षमात्मगतम् ।) दिष्ट्या सिद्धमभिवाञ्छितमनेनातर्कितोपनतेन रक्तांशुकयुगलेन ।

८३ कञ्चु० — देव्या मित्रावसुजनन्या प्रेषितम् । तदेतत्परिधत्तां कुमारः ।

८४ नाय० — कञ्चुकिन्नुपनय ।

८५ कञ्चु० — (रक्तवसनद्वयमर्पयति ।)

८६ नाय० — (गृहीत्वा स्वगतम् ।) सफलीभूतो मे मलयवत्याः पाणिग्रहः । (परिधाय प्रकाशम् ।) कञ्चुकिन् गम्यताम् । मद्वचनादभिवादनीया देवी ।

८७ कञ्चु० — यदाज्ञापयति कुमारः । (इति निष्क्रान्तः ।)

१ सामोपन्यासैः; आसन्नोपायैः. २ पश्चिमं. ३ वहन्ति. ४ (स्थास्यामि). ५ मध्यसादुत्तरेणादूरं. ६ गमनं मेमिल०.

हस्तगतमिदं रक्तं वासोयुगं वस्त्रयुगलं परार्थं अन्यनिमित्तं देहमुद्गाः त्यक्तः । त्वदनुग्रहतश्चेति यावत् । मम महतीं प्रीतिं परां मुदं धत्ते ॥ २१ ॥ चलितः निर्धूतः परिपन्थो वा मलयाचलस्य शिलानां चयः शिलाचयः प्रस्तरसमूहः यस्मात् स तथोक्तः । नभस्वान्नाधवनेनाम्बेति नभस्वान् वायुः । तुल्या इति । गर्जावार्धैः प्रलयकालिकमेघैः । आवर्तकैश्च सर्वैः पुष्करैः द्रोण एव च । इति चत्वारो मेघाः । तुल्याः । तडिद्विलासिन्यः नीलाश्च । पक्षानां उपर्युपरि श्रेणिः निपाना

Go, therefore What is the use of these consoling speeches? The time for Garuda's arrival is, indeed, near (*Kneeling before his mother and placing his folded hands on the head*) Mother, you too, go back now

In whatever state (of life) I may be born hereafter, O mother, so loving to your son, may you alone become my mother in every one of those conditions (20)

(*Falls at her feet*)

OLD WOMAN—(*With tears, to herself*) Alas, how, these are his last words! (*Aloud*) My child leaving you, my legs, indeed, do not move to another place So I too shall die just with you

SHANKHA—(*Rising*) Meanwhile, I too shall go round the deity (Siva) at the Southern Gokarna nearby and then carry out the orders of my Master (*Exit with the mother*)

HERO—Alas, I have not accomplished my desire What then can be the remedy now?

(*Entering suddenly*)

CHAMBERLAIN—This pair of red garments—

HERO—(*Seeing, with joy to himself*) Fortunately my desire is fulfilled by this pair of red garments obtained unexpectedly

CHAMB—Has been sent by the Queen, the mother of Mitravasu May The Prince wear it

HERO—Chamberlain, bring it

(*Chamberlain hands over the pair of red garments*)

HERO—(*Taking them, to himself*) My marriage with Malayavati has borne fruit (*Wearing them, aloud*) Chamberlain, you may go Convey my respects to the Queen (Lit bow down to the queen on my behalf)

CHAMB—As the Prince commands (*Exit*)

पक्षाणा पङ्क्तयः पटलिकाः गगन पिदधति आच्छादयन्ति । वेगानिल· वेगोत्पन्नः वायुः भुवः पृथिव्या प्लावनाय निमज्जनाय इव अम्बुराशेः सागरस्य अम्भः जल तीरे क्षिपति। एव कल्पान्तशङ्का प्रलयकालभ्रान्ति कुर्वन् जनयन्। अत एव दिग्द्विपेन्द्रैः दिग्वारणश्रेष्ठैः सपदि सहसा सभय सत्रास वीक्षितः दृष्टः। अय द्वादशादित्याना प्रलय उदितानामिव दीप्तिः तेजः यस्य स तादृशः । गरुत्मान् इति अध्याहार्यम्। [अत्र शिवरामटीका यथा—उत्प्रेक्षानिमित्तेन जलोत्प्लुत्यतिशयेन तत्कारणस्य वेगस्य प्रचण्डता प्रकाश्यते । प्लावनोत्प्रेक्षया वेगवायोरुत्पातवातसाम्य च प्रतीयते। प्रथम पक्षदर्शन ततो वेगकार्यतया समुद्रक्षोभदर्शन ततो देहप्रभाव

८८ नाय० —

> वासोयुगमिदं रक्तं प्राप्ते काले समागतम् ।
> करोति महतीं प्रीतिं परार्थे देहमुज्झतः ॥ २१ ॥

(दिशोऽवलोक्य।) यथा चायं चलितमलयाचलशिलाचय. प्रचण्डो नभस्वास्तथा तर्कयाम्यासन्नीभूत. पक्षिराज इति । तथा हि ।

> तुल्यैः संवर्तकाभ्रैः पिदधति गगनं पङ्क्तयः पक्षतीनां
> तीरे वेगानिलोऽम्भः क्षिपति भुव इव प्लावनायाम्बुराशः ।
> कुर्वन्कल्पान्तशङ्कां सपदि च सभयं वीक्षितो दिग्द्विपेन्द्रै-
> र्देहोद्योतैर्दशाशाः कपिशयति मुहुर्द्वादशादित्यदीप्तिः ॥ २२ ॥

तद्यावदसौ नागच्छेच्छङ्खचूडस्तावत्त्वरिततरमिमां वध्यशिलामारोहामि । (तथा कृत्वोपविश्य शिलास्पर्शं नाटयति ।) अहो स्पर्शोऽयमस्याः ।

> न तथा सुखयति मन्ये मलयवती मलयचन्दनरसार्द्रा ।
> अभिवाञ्छितार्थसिद्धयै वध्यशिलेयं यथा स्पृष्टा ॥ २३ ॥

अथ वा किं मलयवत्या ।

> शयितेन मातुरङ्के विश्रब्धं शैशवे न तत्प्राप्तम् ।
> लब्धं सुखं मयास्यां वध्यशिलायामस्यास्तदुत्सङ्गे ॥ २४ ॥

तदयमागतो गरुत्मान् । यावदात्मानमाच्छाद्य तिष्ठामि ।

(तथा करोति ।)

१ प्राप्तकाले. २ महतीं प्रीतिमाधत्ते. ३ परार्थकदशो मम. ४ तुल्य. ५ पिदधति. ६ तीरे वेगान्निरस्त क्षिपति...म्बु सिन्धोः. ७ द्योतो...शिशुद्वाद०. ८ शालीम. ९ मनः १० यथाश्लिष्टा.

लोकनमिति प्रतीतिक्रमेण वर्णनम् इति ।] देहोद्योतैः शरीरकान्तिभिः दश आशाः दिशः मुहुः वार वार कपिशयति पिङ्गलाः स्वर्णवर्णा इत्यर्थः करोति । पादचतुष्टयक्रमेण अतिशयोक्त्युत्प्रेक्षाभ्रान्तिमदुपमानां संसृष्टिः । स्रग्धरा वृत्तम् ॥ २२ ॥ न तथेति । अभिवाञ्छितः अभिलषितः यः अर्थः परप्राणरक्षणरूपस्तस्य सिद्धये सम्पादनाय स्पृष्टा इयं वध्यशिला यथा सुखयति मामिति शेषः । मम निर्वृतिं जनयति तथा । मलये भवाः चन्दनाः मलयचन्दनास्तेषां रसेन आर्द्रा स्निग्धा स्पृष्टा कृतालिङ्गना मलयवती मम कान्ता न सुखयतीति मन्ये । यथाश्लिष्टा इति पाठे इयं वध्यशिला

HERO—

This pair of red garments that has come to me at the right time, gives great delight to me while giving up my body for the sake of another (21)

(*Looking in all directions*) As there is this violent wind, shaking heaps of rocks on the Malaya mountain I guess the king of birds is nearby, for,

The rows of (his) wings (*Pakshati*), resembling the Samvartaka clouds (i e the clouds of deluge) cover up the sky, the wind, stirred by his speed throws the water of the ocean *on the beach as if for submerging (plavanaya) the earth* and suddenly creating a suspicion of the end of the world s period (*kalpa*) and looked at with dread by the lordly elephants of the quarters, he, having the brilliance of the twelve suns is making the ten quarters reddish brown by the flashing lustre of his body (22)

So before that Shankhachuda comes I shall ascend the —slaughter stone in great haste (*Doing so, sitting and gesticulating the touch of the rock*) Oh the (delightful) touch of *this (stone-slab)*!

I think that even Malayavati, cool with the juice of the sandal from the Malaya mountain does not please me so much when embraced, as does this slaughter-slab touched by me for attaining my desired object (23)

Or why speak of Malayavati?

Such pleasure as I have obtained on the lap of this slaughter slab was not experienced even while sleeping confidently in my mother's lap in childhood (24)

Here comes now Garuda I shall stay, covering myself (*Does so*)

शिलया जातस्पर्शो यथा सुखयति तथा आश्लिष्टा आलिङ्गिता मलयवती इति वाच्यम् । व्यतिरेकगर्भा उत्प्रेक्षा । आर्या वृत्तम् ॥ २३ ॥ शयितेनेति । शैशवे बाल्ये मातु अङ्क उत्सङ्गे विश्रब्ध पतनादिशङ्कारहित शयितेन यत्सुख न प्राप्त तद् अस्या वध्य शिलाया उत्सङ्गे क्रोडे शयितेन प्राप्तम् । अत्रापि उपमानभूताया मातुरपि उपमेयरूपाया वध्यशिलाया सुखप्रदत्वेनाधिक्यकथनात् व्यतिरेकालङ्कार । आर्या छन्द ॥ २४ ॥ दृष्ट्वेति । एषोह अहेर्नागस्य ग्रासे भक्षणे गृध्नु अभिलाषुक । क्षणेन वेलाया स्थित महीध्र वेलामहीध्र त समुद्रतटपर्वत मलय प्राप्तोस्मि । किं कुर्वन्नि त्याह—हिमा शीता अशवो रश्मयो यस्य स हिमांशुश्चन्द्रस्तस्य बिम्ब दृष्ट्वा । पुरा मद्दर्शनाद्भय तेन कृत वलय मण्डलाकारेणावस्थान यया ता शेषस्य मूर्ति स्मरन् । कीदृश । पूर्णि घूर्णि स्यन्दनाश्वाना रथयुक्तवाजिना भ्रमन मद्दर्शनाद्भय तेन चलिते रथ

(ततः प्रविशति गरुडः ।)

८९ गरु० —

दृष्ट्वा[1] बिम्बं हिमांशोर्भयकृतवलयां संस्मरञ्[2]शेषमूर्तिं
सानन्दं स्यन्दनाश्वत्रसनविचलिते पूष्णि दृष्टोऽग्रजेन ।
एष भ्रान्त्वा[3]पसर्पज्जलधरपटलै[4]रायतीभूतपक्षः
प्राप्तो वेलामहीध्रं मलयमहमहिग्रासगृध्नुः क्षणेन ॥ २५

नाय० — (सपरितोषम् ।)

संरक्षता पन्नगमद्य पुण्यं मयार्जितं यत्स्वशरीरदानात् ।
भवे भवे तेन ममै[6]वमेव भूयात्परार्थः खलु देहलाभः ॥ २६ ॥

९१ गरु० — (नायकं निर्वर्ण्य ।)

अस्मिन्वध्यशिलातले निपतितं शेषानहीन्रक्षितुं
निर्भिद्याशनिदण्ड[7]चण्डतरया चञ्च्वाधुना वक्षसि ।
भोक्तुं भोगिनमुद्धरामि तरसा रक्ताम्बरप्रावृतं
दिग्धं मद्भयदीर्यमाणहृदयप्रस्यन्दिनेवासृजा ॥ २७ ॥

(इत्यभिपत्य नायकं गृह्णाति । नेपथ्ये दुन्दुभिध्वनिः पुष्पवृष्टिश्च ।)

९२ गरु० — (सविस्मयम् ।) अये दुन्दुभिध्वनिः पुष्पवृष्टिश्च । (ऊर्ध्वमवलोक्याकर्ण्य च ।)

आमोदानन्दितालिर्निपतति किमियं पुष्पवृष्टिर्नभस्तः
स्वर्गे किं चैष चक्रं मुखरयति दिशां दुन्दुभीनां निनादः ।

(विहस्य ।)

आ[8] ज्ञातं सोऽपि मन्ये मम जवमरुता कम्पितः पारिजातो
मन्द्रं[9] सावर्तकाभ्रैरिदमपि रसितं[10] जातसंहारशङ्कैः[11] ॥ २८ ॥

१ क्षिप्त्वा. २ संहरन्. ३ वस०; धावत्. ४ लाञ्छायती०; लव्याय०. ५ वेगात्. ६ ममैव भूयात्परोपकाराय शरीरलाभः; परार्थहेतोः खलु. ७ चण्ड. ८ आ; हा. ९ मन्दं; सार्धं; सर्वैः. १० राणितं; रचितं. ११ जाति.

विसष्टुलगत्या कम्पिते सति अग्रजेन ज्यायसा भ्रात्रा अरुणेन सानन्दं दृष्टः । अथ च प्रान्तयोः पार्श्वयोः अपसर्पद्भिः पक्षविधूत्या दूरीभूय प्रसर्पद्भिः जलधरपटलैः मेघसमूहैः आयतीभूतौ विस्तारं गतौ । तथा भासमानौ इत्यर्थः । पक्षौ यस्य तादृशः । प्रथमार्धे स्मरणालंकारः । यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः स्मरणम् । इति दर्पणात् ।

(*Then enter Garuda*)

GARUDA—Having seen the orb of the moon and remembering the form of Sesa coiled up with fear, and observed with joy by my elder brother (i e *Aruna*), when the sun was rudely shaken by the fright of the horses of his chariot, here I come within a moment to the Malaya mountain on the shore, greedy to make a morsel of the serpent, my wings broadened by the layers of clouds clinging to their ends (25)

HERO—(*With satisfaction*)

Through the merit that I have acquired to-day by saving the serpent by offering my own body, may I, in every birth, obtain a body only for doing good to others (26)

GARUDA—(*Observing the Hero*)

I shall now speedily (*tarasa*) lift up, in order to devour, *the serpent who is lying on the slaughter-stone to save the remaining serpents*, who is covered with red garments as if besmeared with blood flowing from the heart splitting up through fear of me, after having pierced him through the chest with my beak more terrible than the thunderbolt (*Ashani-danda*) (27)

(*Swooping down seizes the hero The sound of the drums and the shower of flowers behind the curtain*)

GARUDA—(*With wonder*) Ah, the sound of the drums and a shower of flowers ! (*Looking up and listening*)

Why does this shower of flowers fall down from the sky, delighting the bees with its fragrance ? And why does this sound of drums in heaven make the circle of quarters resound? (*Laughing*) Ah, (now) I know! I think that even the Parijata tree is shaken by the wind caused by my speed and this gentle rumbling too is (caused) by the clouds of deluge, suspecting [this to be the moment of the destruction (of the world)] (28)

स्रग्धरा वृत्तम् ॥ २५ ॥ सपरितोषमिति गरुडागमनेनात्मनो मरणमुपस्थित जानतोपि नायकस्याय परितोषोऽस्य दयार्द्रत्वमेव प्रकटयति । **संरक्षतेति** । स्वशरीरदानादात्मनो देहार्पणेन पन्नग संरक्षता मया यत्पुण्य सुकृतमर्जित सम्पादितं तेन पुण्येन हेतुना मम भवे भवे जन्मनि जन्मनि देहलाभः शरीरप्राप्तिः एव परार्थ एव परकार्यसिद्ध्यर्थमेव भूयात् । उपजातिर्वृत्तम् ॥ २६ ॥ अस्मिन्निति । शेषास्त्वव्यतिरिक्तान् अहीन् रक्षितुम् । अन्यथा समयारक्षणे सर्वेषामेव नाशः स्यादिति हेतोः । अस्मिन् वध्यशिलातले निपतित विक्लवतया प्रक्षिप्तगात्रम् । निश्चलस्थित्या कोप्यसामान्योय सर्वानहीन् रक्षतीति पञ्चमाङ्कवृत्तबीजावापोप्यत्र कृत

१३ नाय० — (आत्मगतम् ।) दिष्ट्या कृतार्थोऽस्मि ।

१४ गरु० — (नायकं कवॅल्यन् ।)

नागानां रक्षिता भाति गुरुरेष यथा मम ।
तथा सर्पाशनाकाङ्क्षां व्यक्तमद्यापनेष्यति ॥ २९ ॥

तद्यावदेनं गृहीत्वा मलयपर्वतमारुह्य यथेष्टमाहारयामि ।

(इति नायकं गृहीत्वा निष्क्रान्तः ।)

॥ ईति चतुर्थोऽङ्कः ॥

१ कल्यन्. २ पुरुषेषु. ३ शङ्कां. ४ शिखर. ५ जीमूतवाहनं. ६ इति श्रीहर्षकृतौ नागानन्दनाटके चतुर्थोऽङ्कः समाप्तः ।

कविना इति बोध्यम् । रक्ताम्बरप्रावृतं रक्तवस्त्राभ्यामाच्छादितम् । अतः मत्तो यद्भयं तेन दीर्यमाणं च तत् हृदयं च तस्मात्प्रस्यन्दिना निस्सरता असृजा रुधिरेण दिग्धं लिप्तमिव दृश्यमानं भोगिनम् । अशनिदण्डचण्डतरया अशनिदण्डवत् । अनेन दैर्घ्यं तैक्ष्ण्यं च सूचितम् । चण्डतरया अतिभीषणया चञ्च्वा वक्षसि निर्भिद्य विदार्य भोक्तुमधुना तरसा वेगेन उद्धरामि ऊर्ध्वं नयामि । उपमा उत्प्रेक्षा चालंकारौ । शार्दूलविक्रीडितं वृत्तम् ॥ २७ ॥ सविस्मयमिति । तत्कालं यावत् दुन्दुभिध्वनेस्तदाऽश्रवणात्पुष्पवृष्टेश्चादर्शनाद्विस्मयः । आमोदेति । आमोदेन अतिहृद्येन सौरभेन गन्धप्रियत्वात् आनन्दिता अलयः भ्रमराः यया तादृशी इयं पुष्पवृष्टिः नभस्तः किं कस्माद्धेतोः निपतति । किं किमर्थं च स्वर्गे एष दुन्दुभीनां भेरीणां निनादः दिशां चक्रं दिङ्मण्डलं मुखरयति निनादयति । आ इति स्मरणे । ज्ञातमनुगतम् । मन्ये तर्कयामि । स प्रसिद्धः पारिजातः सुरतरुराजः अपि मम जवमरुता आगमनवेगवायुना कम्पितः । यस्मादियं पुष्पवृष्टिः । इदमपि जाता संहारस्य प्रलयस्य शङ्का येषां तैः संवर्तकाभ्रैः मन्द्रं मृदु यथा तथा रसितं गर्जितम् । मन्द्रमित्यत्र सार्धमिति पाठे सर्वैः संभूय गर्जितमित्यर्थः । उत्प्रेक्षालंकारः । स्रग्धरा वृत्तम् ॥ २८ ॥ उद्धृतमस्यस्य अनन्यसदृशं देहगौरवं ज्ञात्वा आत्मनः परितुष्टिर्भवेदिति संभावयन्नाह । नागानामिति । यथा यस्मात् एष नागानां रक्षिता मम गुरुः भारवान् भाति तथा तस्मात् अद्य मम सर्पाशनाकाङ्क्षां नागभक्षणेच्छां व्यक्तं स्फुटमपनेष्यति दूरीकरिष्यति । एतद्देहस्यमांसरुधिरादि-

HERO—(*To himself*) Fortunately, I have attained my object!

GARUDA—(*Picking up the Hero as a morsel*)

As this saviour of serpents feels heavy, he will surely satisfy my craving for eating the serpents—(other meaning — As this saviour of serpents appears to be my 'Guru', he will surely put an end to my desire to eat the serpents) (29)

So, taking him, I shall just ascend the Malaya mountain and feed on him to my heart's content

(*Exit, taking the Hero*)

END OF ACT IV

प्राचुर्यान्मम परा तुष्टिं जनयिष्यतीति भावः। अत्र अथ नागाना रक्षिता भूत्वा प्राणिना हिंसा न कर्तव्या इत्युपदेशदानान्मम गुरुरिव भाति इति प्राकरणिकस्य भाविनोऽर्थस्य सूचनात्पताकास्थानकमिदम्। तदुक्त घनञ्जयेन—प्रस्तुतागन्तुभावस्य वस्तुनोन्योक्ति-सूचकम्। पताकास्थानक तुल्यसविधानविशेषणम्॥ इति। अत्र नागभक्षणेच्छानिवारणे गुरुत्वस्य हेतुत्वेनोपादानात्काव्यलिङ्गमलङ्कारः॥ २९॥

इति श्रीनागानन्दटीकायामर्थबोधिन्या चतुर्थोऽङ्कः॥

पञ्चमोऽङ्कः

(ततः प्रविशति प्रतीहारः।)

१ प्रती०—

स्वगृहोद्यानगतेऽपि स्निग्धे पापं विशङ्क्यते स्नेहात्।
किमु दृष्टबहुपायप्रतिभयकान्तारमध्यस्थे ॥ १ ॥

तथा हि। जीमूतवाहनो जलधिवेलावलोकनकुतूहली निष्क्रान्तश्चिरयतीति दुःखमास्ते महाराजो विश्वावसुः। समादिष्टश्चास्मि तेन। यथा सुनन्द श्रुतं मया संनिहितगरुडप्रतिभयमुद्देशं गतो जामाता जीमूतवाहनस्तत्र चिरयतीति। शङ्कित एवास्म्यनेन वृत्तान्तेन। तत्त्वरितं विज्ञायागच्छ किमसौ स्वगृहं गतो न वेति। तद्यावत्तत्र गच्छामि। (परिक्रम्याग्रतो विलोक्य।) अये अयमसौ राजर्षिर्जीमूतवाहनस्य पिता जीमूतकेतुरुटजाङ्गने सहधर्मचारिण्या राजपुत्र्या वध्वा चोपास्यमानस्तिष्ठति। तथा हि।

क्षौमे भङ्गवती तरङ्गितदशे फेनाम्बुतुल्ये वह-
न्जाह्नव्येव विराजितः सवयसा देव्या महापुण्यया।
धत्ते तोयनिधेरयं सुसदृशीं जीमूतकेतुः श्रियं
यस्यैषान्तिकवर्तिनी मलयवत्याभाति वेला यथा ॥ २ ॥

तद्यावदुपसर्पामि

(ततः प्रविशत्यासनस्थः पत्नीवधूसमेतो जीमूतकेतुः।)

१ सुनन्दो नाम प्र०. २ विशङ्कते. ३ जलनिधि० निष्क्रान्तः कुमारो जीमू०. ४ तत्समादिष्टोऽस्मि. ५ परिक्रम्य; अग्रे दृष्ट्वा. ६ सह स्वध०. ७ वध्वा मलयवत्या. ८ तरङ्गतरले; तरङ्गितचलत्. ९ सुपयसा. १० एव. ११ तत्तावदुपसृत्य पृच्छामि.

अथ तत्र तत्र निवेशितानर्थान्समग्रफलसिद्धये ऐकान्त्यं नेतुमन्तिममङ्कमारभते। तत्रादौ रौद्रजन्यस्य करुणस्य पित्राद्यालम्बनस्य निष्पत्त्यर्थं पित्रादीनां चितारोहणाद्युद्यमप्रस्तावार्थं प्रतीहारप्रवेशः। स्वगृहेत्यादि। स्निग्धे प्रेमपात्रे जने स्वगृहोद्यानगते। प्रथमं तावदुद्यानं न शंकास्थलम्। तत्रापि गृहसमीपस्थं ततोऽपि स्वगृहसम्बद्धमिति न सर्वथा शंकास्पदम्। तद्गतेऽपि। स्नेहात् प्रीतिहेतोः पापममङ्गलं विशंक्यते। अतिस्नेहः पापशङ्कीति भावः। तस्मिन् दृष्टाः बहवोऽपाया अनर्था यस्मिन् तद्बहुपायमत एव प्रतिभयं भयावहं यत्कान्तार तन्मध्यस्थे किमु किमु वक्तव्यं

ACT V

(Then enter the Door-keeper)

DOOR-KEEPER—

Even when a beloved person has gone to the garden of his own house, danger is suspected through affection How much more then, when he is in the midst of a forest which is dreadful on account of many dangers (actually) witnessed? (1)

For instance, King Visvavasu is worried because Jimutavahana who has gone out of curiosity to see the sea-shore is delaying So I have been ordered by him thus "Sunanda, I heard that the son-in-law, Jimutavahana who has gone to the region, dreadful due to Garuda being near, is lingering there I am alarmed at this news So come back quickly, having found out whether he has come home or not" I shall, therefore, just go there *(Moving about and looking in front)* Ah, here is the royal sage, Jimutaketu, the Father of Jimutavahana, sitting in the court-yard of his cottage, attended by his wife (Lit companion in religious duties) and the Princess, his daughter-in-law Thus,

Wearing a pair of white silken garments with folds (Bhangavati), having the hems fluttering (like waves) and resembling the foamy water (in whiteness), and adorned by his queen very pious like the holy Ganges with birds (on its banks), *thus Jimutaketu bears the majestic splendour closely resembling* that of the ocean, while Malayavati standing near him appears like the shore with the Malaya mountain (2)

Well, I shall just approach them

(Enter Jimutaketu, seated, accompanied by his wife and daughter-in-law)

पाप शक्येतेति । अर्थापत्तिरलकारः । आर्या वृत्तम् ॥ १ ॥ जलधेः वेला जलधिवेला तस्या अवलोकन । कुतूहलमस्यास्तीति कुतूहली । जलधिवेलावलोकने कुतूहली । सन्निहितः गरुडः तेन प्रतिभय भयंकरम् । प्रतिगतं भयेन प्रतिभय । प्रतिगत भय मस्मिन्निति वा प्रतिभयम् । प्रादिसमास. । उटज पर्णादिनिर्मितं गृहम् । तस्याङ्गने अजिरे । सह धर्मं चरतीति सहधर्मचारिणी धर्मपत्नी तया । उपास्यमानः परिचर्यमाण. । ताभ्यामन्वित इत्यर्थः । क्षौमे इति । भङ्गवती भगयुते वायुवशात् तरङ्गिता विचलिता दशा अञ्चलाः अन्ता वा ययोः तादृशे । फेनाकारमम्बु फेनाम्बु तेन तुल्ये सदृशे फेनाम्बुतुल्ये । भङ्गेनान्तरा निम्नोन्नतत्वाद्वायुना मन्दचलनात् धवलतया लघुतया च फेनाम्बुसाम्यम् । क्षुमाया विकारः क्षौमम् । क्षौमे पट्टवा-

² जीमू॰—

> भुक्तानि यौवनसुखानि यशो विकीर्णं
> राज्ये स्थितं स्थिरधिया चरितं तपोऽपि।
> श्लाघ्यः सुतः सुसदृशान्वयजा स्नुषेयं
> चिन्त्यो मया ननु कृतार्थतयाद्य मृत्युः ॥ ३॥

³ प्रती॰—(सहसोपसृत्य।) जीमूतवाहनस्य।

⁴ जीमू॰—(कर्णौ पिधाय।) शान्तं पापं शान्तं पापम्।

⁵ देवी—प्रतिहतममङ्गलम्।

⁶ मल॰—(स्वगतम्।) वेपते मे हृदयमनेन दुर्निमित्तेन।

⁷ जीमू॰—(वामाक्षिस्पन्दनं सूचयित्वा।) भद्र किं जीमूतवाहनस्य।

⁸ प्रती॰—जीमूतवाहनस्य वार्तामन्वेष्टुं प्रेषितोऽस्मि युष्मदन्तिकं महाराजविश्वावसुना।

⁹ जीमू॰—किमसंनिहितस्तत्र मे वत्सः।

¹⁰ प्रती॰—अथ किम्।

¹¹ देवी—(सविषादम्।) महाराज यदि तत्र न संनिहितस्तत्कुत्र गतो मे पुत्रको भविष्यति।

¹² जीमू॰—*निर्गतमस्मत्प्राणयात्रार्थे नितान्तदूरं गतो भविष्यति।*

¹³ मल॰—(सविषादमात्मगतम्।) अहं पुनरार्यपुत्रमप्रेक्षमाणा (अपश्यन्ती) अन्यदेव किमप्याशङ्के।

१ ०वकीर्णं. २ स्व. ३ तयँच. ४ वृद्धा. ५ नायिका. ६ असात्पर–तदाज्ञापयतु महाराजः किं मया स्वामिने विज्ञापनीयमिति; किमहं स्वामिने निवेदयामि. ७ पुत्रः. ८ सूनं.

सती वहन् धारयन्। पुनश्च सवयसा सदृशवयसा उचितवयस्कयेत्यर्थः। महत्पुण्यं यस्याः सा महापुण्या तन्नाम्न्या या देव्या दीप्यमानगात्रया राज्या। वयोभिः हंसादिभिः पक्षिभिः सहितया। महत् पुण्यं पावनत्वं यस्यास्तया। अत्र शाब्दं साम्यम्। जाह्नव्या गंगया इव विराजितः शोभितः अयं जीमूतकेतुः तोयनिधेः सागरस्य सुसदृशीं श्रियं शोभां धत्ते। यस्य अन्तिके निकटे वर्तते इति अन्तिकवर्तिनी समीपस्था मलयवती वेला इव आभाति विराजते। उपमा। शार्दूलविक्रीडितं वृत्तम्॥ २॥

JIMUTAKETU —

I have enjoyed the pleasures of youth, (my) fame has spread (all around); (I have) ruled the kingdom, and practised penance with a steady mind, my son is praise-worthy, and this is my daughter-in-law, born of a very worthy family Now, as all my desires are fulfilled, I should, indeed, think of death (3)

DOOR-KEEPER—*(approaching suddenly)* Of Jimutavahana—

JIMU—(closing the ears) God forbid!

QUEEN—May evil be averted!

MALAYAVATI—*(To herself)* My heart trembles at this evil omen

JIMU—*(Indicating the throbbing of the left eye)* Good man, what of Jimutavahana?

DOOR-KEEPER—Of Jimutavahana—I have been sent to you by King Visvavasu to learn the news

JIMU—What, is my son not even there?

DOOR-KEEPER—No

QUEEN—*(With dejection)* Your Majesty, if he is not there, where could he have gone?

JIMU—Surely he must have gone very far away (to procure the means) for sustaining our lives

MALAYAVATI—*(with dejection, to herself)* But, not seeing my husband, I apprehend something different

---

भुक्तानीति । यूनो भावः यौवनं तारुण्यम् । युवादित्वादण् । तस्मिन् उपभोक्तव्यानि सुखानि यौवनसुखानि । यौवने विषयसुखानीत्यर्थः । भुक्तानि अनुभूतानि । यशः कीर्तिः विकीर्णं सर्वत्र प्रसारितम् । राज्ये स्थितं राज्यकर्माणि रक्ष्यरक्षणादिकानि कृतानीत्यर्थः । यशोवकीर्णे इति पाठे यशसा अवकीर्णे व्याप्ते राज्ये स्थितम् । तथा राज्यं कृतं यथा सौराज्यकीर्तिर्लब्धेत्यर्थः । एव सुखोपभुक्त्या काम राज्यस्थित्या यशोलब्ध्या च धर्मार्थौ इति त्रिवर्गसंपादनमुक्त्वा चतुर्थेपि कृता प्रवृत्तिमाह । स्थिरा निश्चला चासौ धीः स्थिरधीः तया । अविचलितेन मनसेत्यर्थः । तप त्रिविधमपि चरित तप्तम् । एव सत्यपि एष वा अनृणो यः पुत्री इति वचनदिशा पुत्राभावे सर्वं व्यर्थं ऋणबद्धत्वादित्याह । श्लाघ्य. धर्मयशआदिगुणमण्डितत्वात्प्रशसनीयः पुत्र. । सुसदृशे अन्वये अनुरूपे वंशे जायते इति सुसदृशान्वयजा स्नुषा वधू । एव कृत. साधित. अर्थ जन्मप्रयोजन येन स कृतार्थस्तस्य भावः कृतार्थता तया । कृतकृत्यत्वादित्यर्थः । मया अद्य मृत्युः चिन्त्य चिन्तनीय । प्रार्थनीय इत्यर्थ ।

१४ **प्रती०** — आज्ञापयतु महाराजः किं मया स्वामिने निवेदनीयम् ।

१५ **जीमू०** — (वामाक्षिस्पन्दनं सूचयन् ।) जीमूतवाहनश्चिरयतीति मयि आकुले विचिन्तयति

स्फुरसि किमदक्षिणेक्षण मुहुर्मुहुः कथयितुं ममानिष्टम् ।
हतचक्षुरपहृतं ते स्फुरितमिदानीं करिष्यते भानुः ॥ ४ ॥

(ऊर्ध्वं पश्यन् ।) अयमेव त्रिभुवनैकचक्षुर्भगवान्सहस्रदीधितिः स्फुरन् जीमूतवाहनस्य श्रेयः करिष्यति । (अवलोक्य सविस्मयम् ।)

आलोक्यमानमतिलोचनदुःखदायि
रक्तच्छटा निजमरीचिरुचो विमुञ्चत् ।
उत्पातवाततरलीकृततारकाभ-
मेतत्पुरः पतति किं सहसा नभस्तः ॥ ५ ॥

कथं चरणयोरेव निपतितम् ।

(सर्वे सविस्मयं निरूपयन्ति ।)

१६ **जीमू०** — अये कथं लग्नसरसमांसश्चूडामणिः । कस्य पुनरयं भविष्यति ।

१७ **देवी** — (सविषादम् ।) महाराज पुत्रस्यैव म एतच्चूडारत्नम् ।

१८ **नायि०** — (अपवार्य ।) मैवं भण ।

१९ **प्रती०** — महाराज माऽविज्ञायैवं विक्लवो भूः । अत्र हि तार्क्ष्येण भक्ष्यमाणानां नागाधिपानामनेकशो नखमुखोत्खाताः पतन्त्येते शिरोमणयः ।

१ ०तीति पर्याकुलोस्मि हृदयेन. २ किमु दक्षिणेतर. ३ सूचयन्. ४ मम पुत्रकः कुशली. ५ स्फुटं. ६ मयि. ७ भुवः. ८ काल. ९ एवाग्रतः; वामे.

तार्क्ष्येण भक्ष्यमाणानां पन्नगानामनेकशः । उल्कारूपाः पतन्त्येते शिरोमणय ईदृशाः ॥ काव्यलिङ्गमलंकारः । वसन्ततिलकं वृत्तम् ॥ ३ ॥ जीमूतवाहनस्येति । एवं मया मृत्युश्चिन्तनीयः इति वाक्योपसंहारानन्तरं झटित्येव प्रविश्य प्रतीहारेण उक्तः जीमूतवाहनस्येति वाक्यावयवः आपाततो पूर्ववाक्यान्वयित्वेन भासमानः जीमूतवाहनस्य मृत्युश्चिन्तनीय इत्यर्थे पर्यवस्यति । अतः पताकास्थानकमिदम् । तदुक्तं यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्यो प्रयुज्यते । आगन्तुकेन भावेन पताकास्थानकं तु तत् । अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत् । श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥ इति । जीमूतकेतुः जीमूतवाहनस्येति वाक्यावयवं श्रुत्वा तं स्ववाक्यशेषत्वेन योजयन्नमङ्गलशङ्काकुलः प्रार्थयते शान्तं पापमिति । पापस्यामङ्गलकारणत्वात्तच्छान्तिरस्तु इति । दुष्टमशुभशंसि निमित्तं दुर्निमित्तं तेन । नियतं नूनम् ।

DOOR-KEEPER—Let the King command what I should convey to my Master

JIMU—(Indicating the throbbing of the left eye) When I am thinking, painfully agitated because Jimutavahana is delaying

Why do you, o my left eye (Punningly—unkind eye), *throb again and again to foretell me about some evil?* Ah wretched eye, here, this sun will destroy (the evil effects of) your throbbing (*Looking up*) (4)

This divine sun (Lit having thousand rays,) alone, the one eye of the three worlds, shining bright, will bring about the welfare of Jimutavahana (*Looking up, with wonder*)

What is it that falls down suddenly in front of me from the sky, giving excessive pain to the eye when seen and emit-

(5)

How, it has fallen just on my feet

(All observe it with wonder)

JIMU—Oh, this is a crest-jewel with flesh full of blood, sticking to it. Whose can it be?

QUEEN—(With dejection) Your Majesty, this crest-jewel looks like my son's

HEROINE—(*Aside*) Do not say so

DOOR-KEEPER—Your Majesty, do not be thus distressed without knowing (the truth) Here indeed, many such crest-jewels of lordly serpents uprooted by Garuda with his beak and nails, fall down

---

प्राणयात्रार्थं जीवनसाधनार्थं फलमूलादिकमाहर्तुमिति भाव । नितान्तदूरमत्यन्तदूरम्। अन्यदेव किमपि अनिष्टमिति यावत्। स्फुरसीति। दक्षिण न भवतीति अदक्षिणं। अदक्षिण च तदीक्षण च तत्सम्बुद्धि'। हे अदक्षिणेक्षण वामनेत्र। एवम काले अयुक्तकारित्वात्तवादाक्षिण्य युक्तमेवेत्युपालम्भोपि ध्वनित । मम अनिष्टमशुभ कथयितु मुहुर्मुहु पुन. पुनः किं किमर्थं स्फुरसि। हे हतचक्षु. कुत्सितनयन। अय भानुरिह ते स्फुरित स्फुरण अपहतं विनष्टं। निरर्थकमित्यर्थः। करिष्यते। देवतासङ्कीर्तनेन हि दुर्निमित्तदोप' परिहीयते। मम पुत्रकः कुशली इति पाठे—ते स्फुरित अपहस्त ध्वस्तम्। तद्विगणयामीति यावत्। मम पुत्रक. कुशली क्षेमवानेव इत्यर्थं.। अनुप्रासालङ्कार । आर्या वृत्तम्॥ ४॥ यदुक्त तदेवोपपादयति अयमेवेत्यादिना। त्रयाणा भुवनाना समाहार त्रिभुवन तस्यैक चक्षुः। सहस्र दीधितयो यस्य। स्फुरन्प्रकाशमानः। स्फुरणसूचितमनिष्ट शुभशसिना तेज स्फुरणेनैवापाकरिष्यतीति

२० जीमू०—देवि नोपपत्तिक्रममिहित सुनन्देन। कदाचिदेवमपि स्यात्।

२१ देवी—सुनन्द गच्छ। कदापीयत्या वेलया श्वशुरगृहमेव गतो भविष्यति मे पुत्रक। तद्गच्छ। ज्ञात्वा लघ्वेवास्मभ्य निवेदय।

२२ प्रती०—यदाज्ञापयति देवी। (इति निष्क्रान्त।)

२३ जीमू०—देवि अपि नाम नागचूडामणिरय स्यात्।

(तत प्रविशति रक्तवस्त्रसंवृतः शङ्खचूड।)

२४ शङ्ख०—(सास्रम्।) कष्ट भो कष्टम्। मुषितोऽस्मि दैवेन।

गोकर्णमर्णवतटे त्वरितं प्रणम्य
प्राप्तोऽस्मि तां खलु भुजङ्गमवध्यभूमिम्।
आदाय तं नखमुखक्षतवक्षसं च
विद्याधरं गगनमुत्पतितो गरुत्मान् ॥ ६ ॥

हा निष्कारणबान्धव। हा परमकारुणिक। हा परदुःखदुःखित। हा विपद्वारिनिधिपतितजनोद्धरणपोत। हा परोपकारतृणीकृतदत्तदेह। क नु खलु गतोऽसि। प्रयच्छ मे प्रतिवचनम्। (आत्मानमुद्दिश्य।) हा हतोऽस्मि मन्दभाग्य। हा शङ्खचूडहतक किं त्वया कृतम्।

नाहित्राणोत्कीर्तिरेका मयाप्ता
नापि श्लाघ्या स्वामिनोऽनुष्ठिताज्ञा।
दत्वात्मानं रक्षितोऽन्येन शोच्यो
हा धिक्कष्टं वञ्चितो वञ्चितोऽस्मि ॥ ७ ॥

१ सवीतः. २ प्रियव०. ३ प्राणा की०. ४ रन्या; रम्या; रेकाहमासा. ५ तेन वा.

भाव.। आलोक्यमानमिति। आलोक्यमान दृश्यमान सत्। दुःख ददातीति दुःखदायि। अतिशयेन लोचनयोर्दुःखदायि पीडाकर अतिलोचनदुःखदायि। निजस्य मरीचीना रश्मीनामिव रुचः कान्तयः यासा तादृशी. रक्तच्छटा रुधिरधारा विमुञ्चत् पातयत्। उत्पातस्य अनिष्टसूचकस्य वात प्रभञ्जन. तेन तरलीकृता कम्पिता स्वस्या नाच्च्याविता या तारका नक्षत्र तस्या इव आभा यस्य तत्। एतत् लोचनदुःखदायी-त्यस्य हेतु। एतत् किं वस्तु नभस्त आकाशात् सहसा वेगेन पुरः अग्रे पतति। उपमा। वसन्ततिलक वृत्तम् ॥ ५ ॥ अत्र क्षेमेन्द्रः—तच्च चूडकचभ्रष्ट रक्तधारापुरःसरम्। अङ्के मलयवत्यास्तच्चूडारत्नमथापतत् ॥ इति। अये इति खेदे। लग्न श्लिष्ट सरसं रुधिरार्द्रं मांसं यत्र स तथोक्तः। चूडामणि. शिरोरत्नम्। विक्लव· व्याकुलः। नखानि च मुख च नखमुख तेनोत्खाताः। उपपत्ति. युक्तिवादः तया सहित

JIMU—Queen, Sunanda's speech is reasonable Perhaps it might be so

QUEEN—Go, Sunanda Perhaps by this time my son must have gone to his father-in-law's house So, go, and having ascertained, inform us immediately

DOOR-KEEPER—As the Queen commands (*Exit*)

JIMU—O Queen, how I wish this would (really) be the crest-jewel of a serpent!

(Then enter Shankhachuda covered with red garments)

SHANKHA—(*With tears*) Alas! Alas! I have been deceived by Destiny

Having hurriedly bowed down to Gokarna on the sea-shore, I reached *that notorious (tam)* place of slaughter of serpents, and Garuda has (just) flown up to the sky having clasped that Vidyadhar whose chest is pierced by his beak and claws (6)

O you, my relative without any cause! O extremely compassionate one! Oh you, afflicted by the misery of others! O you, the boat for saving people fallen into the ocean of calamity! O you who gave up your body for the good of others thinking it to be (mere) straw! Where, indeed have you gone? Give me a reply (Referring to himself) Alas, I am undone, unlucky as I am! Ah wretched Shankhachuda, what have you done?

For one thing, the great glory of having saved the serpents was not achieved by me, and (for another) even the praise-worthy command of my master was not carried out, a pitiable fellow (I am), saved by another by giving up his own life Ah fie upon me! Alas! I am indeed deceived (by destiny)! (7)

सोपपत्तिकम्। इदं परिमाणमस्या इयती तया। इयता कालेन गतेनेत्यर्थः। गोकर्णमिति। अर्णवतटे सागरतीरे स्थित गोकर्णे गोकर्णक्षेत्रस्थ शिवलिङ्गं प्रणम्य ता प्रसिद्धा भुजङ्गमवध्यभूमिं सत्वर प्राप्तोऽस्मि खलु आगत एव। नखमुखैः नखकोटिभिः क्षत विदीर्णं वक्ष· यस्य त नखमुखक्षतवक्षस त विद्याधर आदाय गरुत्मान् खमाकाश-मुत्पतितश्च। अत्र शिवरामव्याख्या—क्षतवक्षसमिति जीवनप्रत्याशानिवृत्त्या खेदः। विद्याधरमिति आत्मार्थे महापुरुषनाशेन लज्जा। गरुत्मानिति अप्रतिक्रियत्वेन दैन्यम्। यौगपद्यकथनेन देवप्रातिकूल्यनिरूपणाद्वैराग्यम्। सर्वाभिप्रायेण कष्टमिति। अनुप्रास। वसन्ततिलक वृत्तम्॥ ६॥ निष्कारणः बान्धवः निष्कारण बान्धवः अहेतुकमित्रम्। विपदेव वारिनिधिः समुद्रः विपद्वारिनिधिः तस्मिन्

तन्नाहमेनमिव क्षणमपि जीवन्नुपहास्यमात्मानं करोमि । यावदेनां रुधिरधारामनुगन्तुं प्रयतिष्ये । (भूमौ दत्तदृष्टिः परिक्रामति ।)

आर्द्रार्द्रत्पीडपृथ्वीं प्रविरलपतितैः स्थूलबिन्दुं ततोऽग्रे
ग्रावस्त्र्यापातशीर्णप्रसृततनुकणां कीटकीर्णां स्थलीषु ।
दुर्लक्ष्यां धातुपीठे घनतरुशिखरे गह्वरे स्त्यानरूपा-
मेतां तार्क्ष्यं दिदृक्षुर्निपुणमनुसरन्रक्तधारां व्रजामि ॥ ८ ॥

२५ **देवी** — (ससाध्वसम् ।) महाराज एष कोऽपि रुदितवदन इत एव त्वरितमागच्छन्हृदयं मे आकुलीकरोति । तज्ज्ञायतां तावत्क एष इति ।

२६ **जीमू०** — यथाह देवी ।

२७ **शङ्ख०** — हा त्रिभुवनैकचूडामणे । क्व मया द्रष्टव्योऽसि । मुषितोऽस्मि भो मुषितोऽस्मि । (इति क्रन्दति ।)

२८ **जीमू०** — (आकर्ण्य सहर्षम् ।) देवि मुञ्च विषादम् । अस्यायं चूडामणिर्नूनं मांसलोभात्केनापि पक्षिणा समुत्क्षिप्य नीयमानोऽस्मिन्प्रदेशे पतितः ।

२९ **देवी** — (सहर्षं मलयवतीमालिङ्ग्य ।) अविधवे धीरा भव । न खल्वीदृश्याकृतिर्वैधव्यदुःखमनुभवति ।

३० **नायि०** — (सहर्षम् ।) अम्ब युष्माकमाशिषा प्रभावेण । (इति पादयोः पतति ।)

१ वुत्पीड्य; वुत्पास्य. २ ता. ३ स्त्रायाम०; ग्रावण्यापातशीर्णो–कीटकीर्णरथ०. ४ दुर्लक्षाधातुभित्तौ; धातुभित्ते. ५ घ-व-नतरुशिखरे स्त्याननीलस्वरूपा. ६ शान्त. ७ एना. ८ ०मणे हा परार्थदत्तदेह. ९ क्वासि प्रस्थितो मया द्रष्टव्य.. १० मस्तकादुत्पाय.

पतितजनस्य उद्धरणे पोत. नौरूप । परोपकारार्थे तृणीकृतः दत्तश्च देहो येन तादृशः । नाहित्राणादिति । अहित्राणान्नागरक्षणान्मया एका उत्कृष्टा कीर्तिर्न आप्ता लब्धा । एकाहमिति पाठे एकम् अह. एकाहः तं व्याप्य । एकदिनमपि इत्यर्थः । स्वामिनः अस्मदधिपतेः. श्लाघ्या स्वकुलरक्षणपरत्वात्प्रशंसनीया आज्ञा निदेश. अपि न अनुष्ठिता कृता । प्रत्युत अन्येन आत्मानं स्वशरीरं दत्त्वा रक्षितोऽस्मि । अत एव शोच्यः शोचितुं योग्यः निन्दनीय इत्यर्थः । हा धिक् । कष्टं पीडाकरमेतत् । वञ्चितो वञ्चित. अत्यन्तं विप्रलब्धोऽस्मि । दैवेनेति शेषः । अत्र पादत्रयस्य शोच्यत्वं प्रति हेतुत्वात्काव्यलिङ्गम् । अभीष्टस्यालाभादप्रार्थितस्य चाप्तेर्विषमालङ्कारोऽपि ।

So, I shall not make myself ridiculous, living like this even for a moment I shall, therefore, try to follow this line of blood (*Walks about, with eyes fixed on the ground*)

Desirous of seeing Garuda (*Tarkshya*), I shall carefully follow this line of blood, which is broad at first on account of the gushing flow (of blood) and then consists of big drops fallen at intervals, which, further on, is scattered in tiny particles, having been shattered when fallen on rocks, which is covered with insects on even grounds (Sthali), which is hardly visible on mineral stones and is congealed on the tops of the cluster of trees in the caverns • (8)

QUEEN—(*Feeling nervous*) Your Majesty, some one, coming this way hastily with a weeping face, agitates my heart. Please find out who he is

JIMU—As the Queen says

SHANKHA—Oh you, the excellent crest-jewel of the *three* worlds' Where can you be seen by me' I am robbed, oh, I am robbed' (weeps aloud)

JIMU—(*Listening, with joy*) Queen, give up your dejection This crest-jewel, fallen here when being carried away by some bird, snatching it out of greed for flesh, surely belongs to this man

QUEEN—(*With joy, embracing Malayavati*) Oh you, *whose husband is living (Lit one who is not a widow)'* Take heart Surely such a form will never suffer the pangs of widowhood

HEROINE—(*Joyfully*) By the power of your blessings, Mother' (*Falls at her feet*)

शालिनी वृत्तम् ॥ ७ ॥ एवं विधा यस्यासौ एवंविधः। आद्राविति। तार्क्ष्यं गरुड दिदृक्षुः द्रष्टुमिच्छुः। दृशेः सन्नन्तात् सनाशसभिक्ष उ इत्युप्रत्ययः। अहम् आदौ उत्पीडेन तरसा निःसरणेन। देहस्य प्रथमभेदे रुधिरबाहुल्यात्तथा। पृथ्वीं घनाम्। तत प्रविरलाः प्रविरल यथा तथा वा पतिता. स्थूलाः बिन्दवो यस्या तादृशीम्। अथ च ग्रावसु प्रस्तरेषु आपातेन शीर्णा चूर्णिता अत एव प्रसृताः विकीर्णाः तनवः सूक्ष्माः कणाः यस्यास्ताम्। स्थलीषु अकृत्रिमभूमिषु कीटैः सूक्ष्मजीवैः कीर्णां व्याप्ताम्। धातुपीठे गैरिकादिभूमौ दुर्लक्ष्या कृच्छ्रेण विभाव्याम्। समानवर्णत्वादिति भावः। घनानि निरतराणि तरुशिखराणि यस्य तादृशे गह्वरे गुहायां। गुहास्थवनतरुशिखरेषु इत्यर्थः। समानं घनीभूत रूप यस्याः तादृशीम्। घनतरुशिखरे स्त्यानिनीलस्वरूपामिति पाठे घन सान्द्रशाख यत्तरुशिखर तत्र स्त्यान पत्रस-

३१ **जीमू०** — (शङ्खचूडमुपसृत्य ।) वत्स किं तव चूडामणिरपहृतः ।

३२ **शङ्ख०** — आर्य न ममैव त्रिभुवनस्यापि ।

३३ **जीमू०** — कथमिव ।

३४ **शङ्ख०** — दुःखातिभाराद्बाष्पोपरुद्धकण्ठो न शक्नोमि कथयितुम् ।

३५ **जीमू०** —

> **आवेद्य ममात्मीयं पुत्रं दुःखं सुदुःसहम् ।**
> **मयि संक्रान्तमेतत्ते येन सह्यं भविष्यति ॥ ९ ॥**

३६ **शङ्ख०** — श्रूयताम् । शङ्खचूडो नाम नागः खल्वहम् । वैनतेयस्याहारार्थमवसरप्राप्तो वासुकिना प्रेषितः । किं वा विस्तरेण । कदाचिदियं रुधिरधारापद्धतिः पांशुभिरवकीर्यमाणा दुर्लक्ष्यतामुपयास्यति । अतः संक्षेपतः कथयामि ।

> **विद्याधरेण केनापि करुणाविष्टचेतसा ।**
> **मम संरक्षिताः प्राणा दत्त्वात्मानं गरुत्मते ॥ १० ॥**

३७ **जीमू०** — (सविषादम् ।) कोऽन्य एवं परहितव्यसनी । वत्स ननु स्फुटमेवोच्यतां ते पुत्रेण जीमूतवाहनेनेति । हा हतोऽस्मि मन्दभाग्यः ।

३८ **वृद्धा** — हा पुत्रक किं त्वयैतत्कृतम् ।

३९ **नायि०** — हा कथं सत्यीभूतं मे दुर्निमित्तम् ।

(सर्वे मोहं गच्छन्ति ।)

१ ममैकस्य. २ स्फुटं कथ०. ३ पुत्रदुःखं...। संक्रान्तमस्ति हृदये. ४ करुणामय; ०णाधीन.

चूडामणिशब्दश्रवणेन मुषितोऽस्मीत्याकर्ण्य च चूडामणिमोषणेनायं विलपतीति जातप्रतीतिः हृष्टो ब्रूते देवि मुञ्च विषादमिति । भर्तृप्रत्ययाज्जाताश्वासा राज्यपि वधूमाश्वासयति अविधवे जीवद्भर्तृके इति । दुःखातिभाराद् दुःखावेगाद्वा हेतुभूतैः उपरुद्धः कण्ठः यस्य । आवेद्येति । हे पुत्र सुदुःसहं अतिदुर्भरमात्मन इदमात्मीयं दुःखं मम मन्थाचीलं च स्वरूपं यस्याः ताम् । एतां रक्तधारा निपुणं सावधानं । कच्चिद्दुर्ज्ञेयत्वादित्यर्थः । अनुसरन् व्रजामि । स्वभावोक्तिरलंकारः । स्रग्धरा वृत्तम् ॥ ८ ॥ ममयमावेद्य । येन मयि संक्रान्तं । कथनेन संविभक्तमित्यर्थः । ते सह्यं भविष्यति । अत्र आत्मीयं पुत्रदुःखमावेदयेति मात्सर्यसूचनमपि ॥ ९ ॥ अनन्तरं प्रामः प्राप्तवारः इत्यर्थः ।

JIMU—(*Approaching Shankhachuda*) My son, is your crest-jewel stolen?

SHANKHA—Sir, not only mine but of the entire three worlds!

JIMU—How is it?

SHANKHA—I am unable to explain it, as my throat is choked by tears due to the heavy load of grief

JIMU—

Tell me, my son, of your grief which is extremely unbearable, so that, when conveyed (Lit transferred) to me, it would become bearable to you. (9)

SHANKHA—Listen I am a serpent, Shankhachuda by name I was sent by Vasuki to Garuda for his food, when my turn came But what is the use of these details? Perhaps this track of the stream of blood will become difficult to be traced, when (later) covered with dust So I shall narrate in brief

By a certain Vidyadhara, whose heart was filled with pity, my life has been saved by offering himself to Garuda (10)

JIMU—(*With dejection*) Who else is so much intent on doing good to others? Rather, child, say it plainly, —'by your son Jimutavahana'. Alas I am undone, unlucky that I am!

QUEEN—Alas! dear son, what have you done!

HEROINE—Alas! how the evil omen has come to be true!

(*All faint away*)

रुधिरधारायाः पद्धतिः सन्तानरेखा । रुधिरधारोपलक्षिता पद्धतिर्मार्गो वा । अवकीर्यमाणा व्याप्यमाना । **विद्याधरेणेति** । करुणया आविष्ट व्याप्त चेतः यस्य तेन । केनापि अज्ञातनामधेयेन विद्याधरेण गरुत्मते आत्मान स्वदेह दत्त्वा मम प्राणाः सरक्षिताः ॥ १० ॥ परहिते व्यसन आस्था यस्य स परहितव्यसनी परोपकाररत इत्यर्थः । धरतीति धरः विषस्य धर. विषधरः सर्पः । गुरुजनस्य शुश्रूषा परिचर्या तस्या अभिज्ञ । **चूडामणिमिति** । मम चरणयोः चूडामणिं पातयता निक्षिपता त्वया लोकान्तर गतेन परलोकगतेनापि विनयक्रमः शिक्षापद्धतिः न उज्झित' त्यक्तः ॥ ११ ॥ एतावदेव एतावन्मात्र दर्शन यस्य । **भक्त्येति** । भक्त्या मयि प्रीत्या श्रद्धया वा अवनौ भूम्या अतिदूर अवनम्रः प्रणतः मौलि यस्य तस्य । सुदूरमवनामितेति पाठे सुदूरमत्यन्त अवनामितः नम्रः निसर्गविनीतः मौलिः येन तस्य । विदूरविनताननेति पाठे विदूरान्मा दृष्ट्वातिदूरादेव विनत नम्रीभूत यदानन तेन नम्रः मौलिर्यस्येति विग्रहः । शश्वत् नित्य मम इमौ मदीयौ चरणौ प्रणमतः तवाय चूडामणिः निकषणैः घर्षणै. मसृणः स्निग्ध. । अपरुषस्पर्श इत्यर्थः । अपि मे

४० शङ्ख० — (सास्रम् ।) नूनमेतौ पितरौ तस्य महासत्त्वस्य । कथमप्रियवादिना मयेमामवस्थां नीतौ । अथ वा विषधरवदनाद्विपमन्तरेण किमन्यन्निष्क्रामति । अहो प्राणप्रदस्य सुसदृशं प्रत्युपकृतं जीमूतवाहनस्य शङ्खचूडेन ।) तत्किमधुनैवात्मानं व्यापादयामि । अथ वा समाश्वासयामि तावदेतौ । तात समाश्वसिहि । समाश्वसितु अम्बा ।
(उभौ समाश्वसितः ।)

४१ देवी — (मलयवतीमुद्दिश्य ।) वत्से उत्तिष्ठ । मा रुदिहि । वयमपि किं जीमूतवाहनेन विना जीवामः । तत्समाश्वसिहि तावत् ।

४२ नायि० — (समाश्वस्य ।) हा आर्यपुत्र केदानीं मया त्वं प्रेक्षितव्यः ।

४३ जीमू० — हा वत्स गुरुजनशुश्रूषाभिज्ञ ।

चूडामणिं चरणयोर्मम पातयता त्वया ।
लोकान्तरगतेनापि नोज्झितो विनयक्रमः ॥ ११ ॥

(चूडामणिं गृहीत्वा ।) हा वत्स कथमेतावन्मात्रदर्शनः संवृत्तोऽसि । (हृदये दत्त्वा ।) अहह ।

भक्त्यातिदूरमवनाववनम्रमौलेः
शश्वत्तव प्रणमतश्चरणौ मदीयौ ।
चूडामणिर्निकषणैर्मसृणोऽप्ययं हि
गाढं विघट्टयति मे हृदयं कथं नु ॥ १२ ॥

१ अप्रियावेदनान्मयैव; अप्रियनिवेदनान्मयैता. २ विषादृते किमन्यद्विषधरस्य मुखात्. ३ प्रदानस्य. ४ सुदूरमवनामित; विदूरविनतानन. ५ विकषणैः. ६ ०प्यहिंस्रः. ७ विदारयति; मे हृदयं.

हृदयं कथं नु गाढमत्यन्तं विघट्टयति उल्लिखति । अत्र कोमलस्यापि चूडामणेर्हृदयविघट्टनकथनाद्विभावना विरोधालंकारो वा । वसन्ततिलकं वृत्तम् ॥ १२ ॥ प्रतिपाल्यते वेलातिपातः क्रियते इत्यर्थः । आहिता. निक्षेपयर्थं स्थापिताः अग्नयः येन तस्य । अग्निहोत्रिणः । संस्कारः दाहः । अग्निहोत्रार्थं शरणं गृहमग्निहोत्रगृहम् । विविधविलसितानि दैवक्रीडितानि । दैवचरितानीति यावत् । वितथं तथा गतं यस्याः सा वितथा । न वितथा अवितथा सत्या । कुर्वाण इति । रुधिरेण आर्द्रा क्लिन्ना या चञ्चुस्तस्याः कषणैः घर्षणैः अद्रेः शिलाः द्रोणीः पाषाणगुहाम्बुधारिणीः कुर्वाणः । अनेन चञ्च्वाः पृथुता प्रहारस्य तीक्ष्णता च प्रदर्शिता । तटीः इति पाठे

SHANKHA—(*with tears*) Surely these must be the parents of that noble person They have been brought to this state by me who told (them) the unpleasant news Or what else except poison can come out of the mouth of a serpent (Lit. poison-bearer)? Ah, Shankhachuda has made a befitting return of the obligations of Jimutavahana who saved his life! So shall I kill myself just now? Or rather, I shall console these two Father, be consoled Mother, take heart (*Both recover*)

QUEEN—(*Addressing Malayavati*) Daughter, rise up Do not weep Can we, indeed, live without Jimutavahana? So, be consoled

HEROINE—(*Recovering*) Alas, my lord, where indeed can you be seen by me now?

JIMU—Oh child, you who know very well how to serve the parents!

By you, causing the crest-jewel to fall at my feet, the course of humility has not been abandoned even while going to the other world (11)

(*Taking up the crest-jewel*) Alas! child, you have become such that only so much (i e the crest-jewel) of you can be seen! (*Placing it on the breast*) Alas,

How, indeed, is it that this your crest-jewel, though smooth by rubbing as you constantly saluted my feet with your head bent down towards the earth through devotion, tears my heart deeply (12).

प्रान्तभागान् द्रोणीः नौसदृशीः कुर्वन्। तदुक्त—द्रोणीभिरम्भसि चरन्ति महार्णवस्य। स्वनयनयो. ज्योतिषस्तेजसः शिखाश्रेणिभिः ज्वालापरिभिः प्लुष्ट दग्धमुपान्तवनान्तर समीपवर्तिकानन मध्यभागो येन स तथोक्त । तथा च सज्जन्तः मलग्ना । मज्जदिति पाठे मज्जन्तोर्थान्नायकोरसि प्रविशन्तः । ये वज्रवत्कठोरा नखरास्तेषा प्रान्तै. अग्रै । नखोऽस्त्री नखरोऽस्त्रियामित्यमर' । अवगाढा उत्खाता अवनिः भूमि येन तादृश । नाथन्देहमभिव्याप्य (पाठान्तरे निर्भिद्य) भूमौ प्रवेशनान्नखाग्राणां दैर्घ्यमुक्तम् । अथ पन्नगारिपु. शृङ्गाग्रे मलयस्य शिखराग्रे दूरात् दृश्यते । उत्प्रेक्षास्वभावोक्त्योः संसृष्टिः । शार्दूलविक्रीडित वृत्तम् ॥ १२ ॥ आ जन्मनः इति पाठे आ स्मृतौ। भुजङ्गपतीन् न तु क्षुद्रभुजङ्गान्। महत् सत्त्व मन स्थैर्यं पीडासहनसामर्थ्यमित्यर्थ. यस्य । तदुक्त भावप्रकाशे—चित्तस्याविकृति. सत्त्व विकृतेः कारणे सति । इति । ग्लानिरिति । अधिक अत्यर्थं पीयमान रुधिर यस्य तस्यापि धैर्यस्योदधि. धैर्योदधिस्तस्य सत्त्वसागरस्य अस्य ग्लानिः वैवर्ण्या-

४४ **देवी**—हा पुत्र जीमूतवाहन यस्मै ते गुरुजनशुश्रूषां वर्जयित्वान्यत्सुखं न रोचते स कथमिवेदानीं पितरमुज्झित्वा स्वर्गसुखमनुभवितुं गतोऽसि।

४५ **जीमू०**—(सास्रम्।) देवि वयं किं जीमूतवाहनेन विना जीवामो येनैवं प्रलपसि।

४६ **नायि०**—(पादयोर्निपत्य कृताञ्जलिः।) तात देहि मे आर्यपुत्रचिह्नं चूडारत्नम्। येनैतद् हृदये कृत्वा ज्वलनप्रवेशेनापनयाम्यात्मनः संतापदुःखम्।

४७ **जीमू०**—अयि पतिव्रते किमेवमाकुलासि। ननु सर्वेषामेवास्माकमयं निश्चयः।

४८ **देवी**—महाराज तत्किं प्रतिपाल्यते।

४९ **जीमू०**—देवि न किंचित्। किं त्वाहिताग्नेर्नान्येनाग्निना संस्कारो विहितः। अतोऽग्निहोत्रशरणादग्नीनादायात्मानमुद्दीपयामः।

५० **शङ्ख०**—(स्वगतम्।) हा कष्टं ममैकस्य पापस्य कृते सकलमेवेदं विद्याधरकुलमुच्छिन्नम्। तदेवं तावत्। (प्रकाशम्।) तात न खल्वेवमनिश्चित्यैव युक्तमीदृशं साहसमनुष्ठातुम्। (विचित्राणि हि विधिविलसितानि।) कदाचिन्नायं नाग इति विज्ञाय जीवन्तमेव जीमूतवाहनं परित्यजेन्नागशत्रुः। तदनयैव तावद्रुधिरधारया वैनतेयमनुसरामः।

५१ **देवी**—सर्वथा देवतानां प्रसादेन जीवन्तमेव मे पुत्रकं प्रेक्षिष्ये।

५२ **नायि०**—(स्वगतम्।) दुर्लभं खल्वेतन्मम मन्दभाग्यायाः।

५३ **जीमू०**—वत्स अवितथैषा भारती ते भवतु। तथापि साग्नीनामेवास्माकं युक्तमनुसर्तुम्। तत्त्वमनुसरतु भवान्। वयमप्यग्निशरणादग्नीनादाय त्वरितमेवागच्छामः। (इति पत्नीवधूसमेतो निष्क्रान्तः।)

५४ **शङ्ख०**—तथाहृद्गरुडमनुसरामि। (परिक्रम्याग्रतो निर्वर्ण्य च।)

१ उत्तानं. २ सविचाराणि हि दैव०; विधेः. ३ दिशा.

ह्युपलक्षिता निष्प्राणता नास्ति। मांसस्योत्कर्तनं छेदनं तस्माज्जायन्ते इति मांसोत्कर्तनजाः रुजः पीडाः यद्दतः। अनुभवत इत्यर्थः। प्रीत्या हर्षेण मुखं प्रसन्नमुत्फुल्लम्। वर्तते इति शेषः। यद् गात्रं न विलुप्तं छिन्नं भक्षितं वा तत्र एष पुलकः रोमाञ्चः हर्षचिह्नं स्फुटः विशदः लक्ष्यते। किं च अस्य दृष्टिः अपकारिणि अपकार कृतवत्यपि मयि उपकारिणि उपकर्तरि इव निपतति। स्निग्धया दृशा मा पश्यतीत्यर्थः। अतः अहोऽस्य महासत्त्वतेति भावः। विशेषोक्तिरलंकारः। शार्दूलविक्रीडितं वृत्तम्॥ १४॥

QUEEN—Alas! my son, Jimutavahana How is it that you, who would not cherish any other pleasure except the service of the parents, have gone to enjoy the happiness of heaven (*leaving your father*)?

JIMUTAKETU—(*With tears*) Can we, indeed, live without Jimutavahana that you should lament thus?

HEROINE—(*Falling at his feet and with folded hands*) Father, give me the crest-jewel, the token of my lord, so that, placing it on my bosom, I may remove the pain of grief by entering the fire

JIMUTAKETU—Oh chaste one (Lit one who is devoted to her husband) Why are you so distressed? Indeed this is the resolve of us all

QUEEN—Your Majesty, then what are you waiting for?

JIMU—Nothing, Queen But for one who maintains the sacred fire (*Ahitagni*), cremation by any other fire is not enjoined So bringing fires from the place of sacred fire let us burn ourselves

SHANKHA—(*To himself*) Alas! The whole of this Vidyadhara family perishes on account of a single sinful person like myself! So I shall just say this (*Aloud*) Father, it is not proper to commit this rash action without having ascertained (*the truth*) Strange are the workings of Destiny! Perhaps, the enemy of serpents will leave off Jimutavahana alive, having found that he is not a serpent We shall, therefore, follow Garuda by this very line of blood

QUEEN—By all means, I may see my son alive by the favour of the deities

HEROINE—(*To herself*) This is indeed difficult to get, unlucky that I am

JIMU—Child may these words of yours come to be true! Even then it would be proper for us to follow, taking (with us) the sacred fire You may, therefore, follow that (line of blood) We shall also follow you immediately, after taking the fires from the fire-place (*Exit with his wife and daughter-in-law*)

SHANKHA—Let me now follow Garuda (*Moving about and looking in front*)

विस्मयविशिष्टा जिज्ञासा कुतूहलम्। धैर्यस्य वृत्तिः वर्तनं धैर्यवृत्तिः। धैर्येण वृत्तिरिति वा। धैर्यलक्षणं तु—चापलेनानुपहता सर्वार्थेष्वविकत्थना। स्वाभाविकी चित्तवृत्तिः धैर्यमित्यभिधीयते॥ इति। निजां दयावीरतां प्रदर्शयन्नाह—**शिरामुखैरिति**। शिरामुखैः नाडीमुखैः रक्तं स्यन्दते क्षरत्येव। मम देहे अद्यापि मांसमस्ति। किं

कुर्वाणो रुधिरार्द्रचञ्चुकषणैर्द्रोणीरिवाद्रेः शिलाः
तुण्डोत्पान्तवनान्तरः स्वनयनज्योतिःशिखाश्रेणिभिः ।
सञ्जद्वज्रकठोरघोरनखरप्रान्तावगाढावनिः
शृङ्गाग्रे मलयस्य पन्नगरिपुर्दूरादयं दृश्यते ॥ १३ ॥

(ततः प्रविशत्यासनस्थः पुरःपतितैर्नायको गरुडः ।)

५५ गरु० —(आत्मगतम् ।) जन्मनः प्रभृति भुजङ्गपतीनश्नता नेदृशमाश्चर्यं मया दृष्टपूर्वम् । यदयं महासत्त्व न केवलं न व्यथते प्रत्युत प्रहृष्ट इव दृश्यते । तथा हि ।

ग्लानिर्नाधिकपीयमानरुधिरस्याप्यस्ति धैर्योदधे-
र्मांसोत्कर्तनजा रुजोऽपि वहतः प्रीत्या प्रसन्नं मुखम् ।
गात्रं यन्न विलुप्तमेव पुलकस्तत्र स्फुटो लक्ष्यते
दृष्टिर्मय्युपकारिणीव निपतत्यस्यापकारिण्यपि ॥ १४ ॥

तत्कुतूहलमेव जनितमस्यानया धैर्यवृत्त्या । तद्भवतु न भक्षयाम्येनम् पृच्छामि तावत्कोऽयमिति । (इत्युपरतो भक्षणात्पुरस्तिष्ठति ।)

५६ नाय० —(मांसोत्कर्तनविमुखमुपलक्ष्य)।

शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवैव तावत्किं भक्षणात्त्वं विरतो गरुत्मन् ॥ १५ ॥

५७ गरु० — (स्वगतम् ।) आश्चर्यमाश्चर्यम् । कथमयमस्यामप्यवस्थायामेव-मूर्जितगिराभिधत्ते (प्रकाशम् ।) अहो महासत्त्व ।

१ नदीः; नगाः. २ ०श्रेण्यान. ३ सद्वर्ग०. ४ मज्ज. ५ कुठार. ६ अग्रौ. ७ पाति. ८ पीड्यते; विपद्यते. ९ धैर्योदयैः. १० कर्षण. ११ जानामि. १२ असमर्थीति । १३ तदेव; तथापि देहे; न ते महात्मन्.

तथानया चिन्तया तूष्णीं चेत् तथापि तावत् मांसेन तृप्तिं न पश्यामि । हे गरुत्मन् भक्षणान्मांसभक्षणात् । रुधिरपानाद्वेत्यर्थः । किं कस्मात् विरतः असि । अनेनालौकिकधैर्यौदार्यं प्रकाशितम् । उपजातिवृत्तम् ॥ १५ ॥

On the high summit of the Malaya mountain, is seen from a distance the enemy of serpents, turning the rocks of the mountain into troughs, (*droni*) by the scratching (*Kashana*) of his beak wet with blood, burning (*plushta*) the interiors of the adjoining forests (*upanta-vana*) by the series of flames of fire (coming out) from his eyes and digging up the earth by the tips (*pranta*) of his terrible claws hard as adamant and clinging (to the body) (13)

(*Enter Garuda seated, with the hero lying before him*)

GARUDA—(*To himself*) Though I have been eating the serpents since my birth, I have never seen such wonder before, since, not only is magnanimous one not pained but on the contrary seems to be delighted, as it were

For,

There is no langour in him, the ocean of courage, though his blood is being drunk in profusely, his face beams with pleasure though he bears the pain caused by the tearing up of his flesh the thrill of joy (horripilation) is clearly seen on the limb which is not plucked off (*vilupta*), and his eyes fall on me as if on a benefactor though I am doing harm to him (14).

So, my curiosity is roused by his courageous conduct Well let it be, I shall not eat him up I shall just ask him who he is (*Giving up eating, stands before him*)

HERO—

The blood is still there to ooze out from the openings of my veins There is still flesh in my body I do not see any satisfaction in you When then, O Garuda, do you desist from eating (me)? (15)

GARUDA—(*To himself*) Oh how wonderful! Even in this condition, he talks so nobly! (*Aloud*) O magnanimous one!

अस्यामप्यवस्थायामेव क्षतदेहत्वाद् दौर्बल्य गतोपीत्यर्थ. । ऊर्जितमुन्नतम् । लोकोत्तरौदार्यधैर्योत्कर्षमिति यावत् । आवर्जितमिति । मया तव हृदयात् हृदयस्थानात् शोणित रुधिरमावर्जित गृहीतम् । त्वया च अनेन धैर्येण धृतेराविष्करणेन मम हृदयमन्तःकरणमेव हृतमात्मसात्कृतम् । पाठान्तरे अद्य त्वया मम हृदयात् शोणित हृतमिवेत्यर्थ. । स च न मनोरम ॥ १६ ॥ क्षुदुपतप्त इति पाठे क्षुधा बुभुक्षया उपतप्तः । साहसमविचारित कर्म । साहस तु दमे दुष्करकर्मणि । अविमृश्य कृतौ धार्ष्टये । इति हैम· । अस्थाने अविषये । न हि रजतभ्रम· घटे जायते । अत भ्रान्त्यविषये प्रवृत्तत्वादसमीक्ष्यकारितैव तवैषा इति भावः । एतदेव दर्शयति—

आवर्जितं मया चञ्च्वा हृदयात्तव शोणितम् ।
धैर्येणानेन च हृतं त्वया हृदयमेव मे ॥ १६ ॥

तत्कस्त्वमिति श्रोतुमिच्छामि ।

५८ **नाय०** — एवं क्षुधाकुलो भवान्न श्रवणयोग्य. । तत्कुरुष्व तावन्मासशोणितेन तृप्तिम् ।

५९ **शङ्ख०** — (ससंभ्रममुपसृत्य ।) तार्क्ष्य तार्क्ष्य न खलु साहसमनुष्ठातव्यम् । नायं नागः । परित्यजैनम् । मा भक्षय । अहं तवाहारार्थं वासुकिना प्रेषित । (उरो ददाति ।)

६० **नाय०** — (शङ्खचूडं पश्यन्नात्मगतम् ।) कथं विफलीकृतो मे मनोरथ शङ्खचूडेनागच्छता ।

६१ **गरु०** — (उभौ निरूप्य ।) द्वयोरपि भवतोर्वध्यचिह्नम् । कतर खलु नाग इति नावगच्छामि ।

६२ **शङ्ख०** — कथमस्थान एव भवतो भ्रान्ति. ।

आस्तां स्वस्तिकलक्ष्म वक्षसि तनौ नालोक्यते कञ्चुको
जिह्वे जल्पत एव मे न गणिते नाम त्वया द्वे अपि ।
तिस्रस्तीव्रविषाग्निधूमपटलव्याजिह्मरत्नत्विषो
नैता दुःसहशोकफूत्कृतमरुत्स्फीताः फणाः पश्यसि ॥ १७ ॥

१ अनेन धैर्येण पुनस्त्वया—हृदयमेव नः; हृतमिवाद्य मे. २ क्षुदुपततः न श्रवणयोग्यस्त्वम्. ३ सहसा. ४ इत्यभिधाय पुरो वपुर्ददाति. ५ सविषादमा०. ६ आस्ते स्वस्तिकलक्षणं न कथितं किं कञ्चुको यत्तनौ. ७ कञ्चुकं. ८ शूत्कृ०; सीत्कृतमरुत्पीडाः.

आस्तामिति । वक्षसि स्वस्तिकलक्ष्म स्वस्तिकाकार चिह्नं तावदास्ता तिष्ठतु । न नाम तत्त्वया लक्षितं भवेदित्यर्थः । तनौ शरीरे कञ्चुकः निर्मोकः न आलोक्यते न लक्ष्यते किमिति काकुगर्भम् । जल्पतः भाषमाणस्य एव । न तु गन्तृतमुखस्य । मे द्वे जिह्वे । असाधारणं चिह्नमित्यर्थः । अपि न नाम गणिते विचारिते । नाम सम्भावनायां कुत्सायां वा । नाम प्राकाश्यसमाव्यक्रोधोपगमकुत्सने । इत्यमरः । पुनश्च तीव्रः तीक्ष्णः दुःसह इत्यर्थः यः विषाग्निः विषाग्निः तस्य धूमपटलेन धूमसहत्या । तीव्रेण विषाग्निधूमपटलेनेति वा । व्याजिह्माः अप्रसन्ना हतत्विष इत्यर्थः । रत्नानां त्विषः दीप्तयो यासा तादृशीः । दुःसहः सोढुमशक्यः यः शोकः तेन यत्फूत्कृत ।

I have drawn out the blood from your heart with my beak, but you have snatched away my heart itself by this fortitude! (16)

Therefore, I wish to hear who you are

HERO—When oppressed by hunger thus, you are not fit to hear So first obtain your satisfaction with my flesh and blood

SHANKHA—(*Approaching hastily*) O Garuda! Garuda! Not indeed should this rash act be done by you! He is not a serpent Leave him Devour me I have been sent by Vasuki *for your food* (*Presents his chest*)

HERO—(*Seeing Shankhachuda, to himself*) How now, Shankhachuda, coming here, has frustrated my desire

GARUDA—(*Observing both*) Both of you have the symbol of a victim I do not know which of you is the serpent

SHANKHA—Your doubt is misplaced

Let alone the Swastika mark on his chest, but can you not see the slough on (my) body? My two tongues also have not been counted by you, while I am speaking *Don't you see* these three hoods, having the lustre of their gems dimmed (*Vyajimha*) by the columns of smoke (coming out) from the fire of dreadful poison, and swollen with the wind of hissings given out in unbearable sorrow? (17)

जात्युचितः फूत्कारः । शूत्कृत सीत्कृतमिति पाठान्तरे । तस्य महता वायुना स्फीताः स्पष्टं भासमाना. । विस्तृतप्रान्तभागाः इति शिवरामः । एताः तिस्रः फणाः न पश्यसि । अत्रापि प्रश्नगर्भकाकुः । स्वभावोक्तिः । शार्दूलविक्रीडितं वृत्तम् ॥ १७ ॥ **मेरावित्ति** । यस्य मया मेरौ मेरुपर्वते मन्दरकन्दरासु मन्दराचलदरीषु हिमवत्सानौ हिमाचलप्रस्थे । महेन्द्राचले तदाख्यकुलपर्वते कैलासस्य शिलातलेषु मलयस्य प्राग्भारेषु शिखरप्रदेशेषु तेषु तेषु दिक्कुञ्जेषु दिक्षु स्थितेषु निकुञ्जेषु । चारयन्ति कीर्तिमिति चारणाः बन्दिविशेषाः । नन्धादिल्युः । तैः उद्गीयमान उच्चैर्गीयमानम् लोकालोकं चक्रवालं पर्वतं विचरतीति लोकालोकविचारि अखिलजगदन्तरालव्यापि । तत् यशः बहुशः श्रुतम् । उदात्तालकारः । शार्दूलविक्रीडित वृत्तम् ॥ १८ ॥ अहः पापमेव पङ्कः कर्दमः तस्मिन् । उद्विग्नः खिन्नः । अस्थान अविषयः आवेगस्योद्विग्नतायाः । तदेव प्रतिपादयति—**स्वशरीरेणेति** । स्वशरीरेण स्वदेहार्पणेन ममेद मदीय इद शरीर तार्क्ष्यात् परिरक्षतः भवतः पातालतलादपि तलमघःप्रदेशम् । नरकमिति यावत् । मा नेतु युक्तमिति काकुगर्भोक्तिः । यतो नीतो तत उद्विग्नोस्मीत्यर्थः ॥ १९ ॥ करुणया आर्द्रं चेतः यस्य तेन । मम ग्रासः मद्ग्रासस्तस्य गोचर पतित. । तस्य मम भक्ष्यभूतस्य । अप्रशस्त कृत्यमकृत्यम् । अप्रशस्य नञर्थः । बोधिसत्त्व एव

६३ **गुरु०** — (शङ्खचूडस्य फणान्वीक्ष्य नायक पश्यन् ।) तत्क खल्वय मया व्यापादित ।

६४ **शङ्ख०** — विद्याधरवशतिलको जीमूतवाहन । कथमकारुणिकेन त्वयेदम नुष्ठितम् ।

६५ **गरु०** — (स्वगतम् ।) अये अयमसौ विद्याधरकुमारो जीमूतवाहन ।

मेरौ मन्दरकन्दरासु हिमवत्सानौ महेन्द्राचले
कैलासस्य शिलातलेषु मलयप्राग्भारभागेष्वपि ।
दिक्कुञ्जेषु च तेषु तेषु बहुशो यस्य श्रुत तन्मया
लोकालोकविचारि चारणगणैरुद्गीयमानं यश ॥ १८ ॥

सर्वथा महत्यह पङ्के निमग्नोऽस्मि ।

६६ **नाय०** — भो फणिपते किमेवमुद्विग्नोऽसि ।

६७ **शङ्ख०** — किमस्थानमिदमावेगस्य ।

स्वशरीरेण शरीर ताक्ष्यात्परिरक्षतो मदीयमिदम् ॥
युक्त नेतु भवतः पातालतलादपि तल माम् ॥ १९ ॥

६८ **गरु०** — अये कथ करुणार्द्रचेतसानेन महात्मना (मद्रासगोचर पतितस्यास्य) फणिन प्राणान्रक्षितु स्वदेहो ममाहारार्थमुपनीत । तन्महद कृत्यमेतन्मया कृतम् । किं बहुना । बोधिसत्त्व एवाय मया व्यापादित । तदस्य महापातकस्याग्निप्रवेशादृते नान्यप्रायश्चित्त पश्यामि । तत्क नु खलु वह्निमा सादयामि । (दिशो विलोक्य ।) अये अमी केचिद्गृहीताग्नय इत एवाभिवर्तन्ते । यावदेता-प्रतिपालयामि ।

१ भा भो अय वि०, भो विद्याधरराजवशतिलक । कथ कारुणिकेनापि त्वयैतदतिनिष्ठुरमनुष्ठितम् । २ परमकारुणिकेनापि त्वयामु प्रति निष्ठुरमिदमाचरितम ज्ञानात् ३ यश महीम्रा० ४ उद्देशेष्वपि, उद्देशेष्वनिलेषु तेषु ५ विचारिचा०. ६ अहमयश पङ्के ७ आविग्नोऽसि, अस्मात्पर—किंनु स्थानमिदमागमनस्य । स्वशरीरेण ह० ८ स्वशरीरमिद दत्वा ताक्ष्यात्परिरक्षित यदीयमिदम् । ९ क्षता भवता १० लादपि चपातालम ११ ममास्यगोचर प्रातस्य

भगवान् बुद्ध एव जीमूतवाहनसज्ञ । व्याख्यातपूर्वोय शब्द । ईदृशी अवस्था यस्य स ईदृगवस्थस्तम् । आत्मीय इति । अयमात्मीय बन्धुजन अय पर इत्यय नम पारपाटी दयाया कुत खलु । नेय गणना दयावताम् । सत्यमिदम् । नास्त्यन

GARUDA—(*Seeing the hoods of Shankhachuda and looking at the Hero*) Then, who is this indeed that is killed by me?

SHANKHA—This is Jimutavahana the ornament of the Vidyadhara family How was this done by you, merciless that you are!

GARUDA—(*To himself*) Ah this is that Vidyadhara Prince, Jimutavahana

Whose fame, spreading up to the Lokaloka mountain, and being sung aloud by the groups of bards, has been frequently heard by me on the Meru (mountain), in the caves of the Mandara (mountain), on the summits of the Himalaya on the Mahendra mountain, on the rocky slopes of the Kailasa mountain and even on the topmost regions of the Malaya mountain and in the bowers of the different quarters (18)

In every way, I am sunk in the mire of sin

HERO—O lord of serpents, why are you so dejected?

SHANKHA—Is it no cause for agitation?

Is it proper for you to take me to a region even below the nether world, by saving this body of mine from Garuda by (offering) your own body? (19)

GARUDA—Ah how now, by this great person with his heart filled with compassion his own body was offered as food to protect the life of this serpent who had become my prey (Lit who had fallen within the range of my greed) So this is an unworthy act done by me What more? Thus, indeed a Bodhisatva has been killed by me I see no other expiation for this great sin except entering fire Where then can I find fire? (*Looking to the quarters*) Ah here are some persons carrying fire coming just this way I shall therefore *wait for them*

विवाद । किं तु बहव कि रक्ष्या उत एक कि रक्ष्य इति चिन्ता विचारणा ते कथ न जाता । अय भाव —एकस्य रक्षणे बहूना नाश । तेषा रक्षणे एकस्यैव । एव स्थिते कि एक रक्षामि उत बहून् इति विकल्परूपिणी चिन्ता ते कथ न जाता । न जाता इति कथ ज्ञायते इति चदेवम । येन यस्मात् तार्क्ष्यात् गरुडादर्हि त्रातु स्वजीवितपरित्याग स्वप्राणदान कुर्वता त्वया आत्मा स्वशरीर पितरौ आवामि त्यय वधूश्च इति एतत्कुल नि शेष हतम् । अपुत्रवति त्वयि कुलोच्छेद एव जात इत्यथ ॥ विशेषेण सामान्यसमथनरूपार्थान्तरन्यासालंकार । शार्दूलविक्रीडित वृत्तम् ॥ २० ॥ अविरता मतताश्च ता ज्वालाश्च ताभि । विगता ज्वाला यस्यासौ विज्वाल । पाठान्तरे अविरत निपतन्त ये अश्रुबिन्दवस्ते । एतदीयेन एतेषा

६९ शङ्ख० — कुमार पितरौ ते प्राप्तौ ।

७० नाय० — (ससंभ्रमम् ।) शङ्खचूड एहि । समुपविश्यानेनोत्तरीयेणाच्छादितशरीरं कृत्वा धारय माम् । अन्यथा कदाचिदीदृगवस्थं मा सहसैवालोक्य पितरौ जीवितं जह्याताम् ।

७१ शङ्ख० — (पार्श्वपतितमुत्तरीयमादाय तथा करोति ।)

(ततः प्रविशति पत्नीवधूसमेतो जीमूतकेतुः ।)

७२ जीमू० — (सास्रम् ।) हा पुत्र जीमूतवाहन ।

आत्मीयः परं इत्ययं खलु कुतः सत्यं कृपायां क्रमः
कि रक्ष्या बहवः किमेक इति ते जाता न चिन्ता कथम् ।
तार्क्ष्यात्त्रातुमहिं स्वजीवितपरित्यागं त्वया कुर्वता
येनात्मा पितरौ वधूरिति हतं निःशेषमेतत्कुलम् ॥ २० ॥

७३ देवी — (मलयवतीमुद्दिश्य ।) जाते मुहूर्तमपि तावद्विरम तवाविरताश्रुधाराभिर्निर्व्वालो भवत्यग्नि । तन्मा रुदिहि ।

(सर्वे परिक्रामन्ति ।)

७४ जीमू० — हा पुत्र जीमूतवाहन ।

७५ गरु० — (श्रुत्वा ।) हा पुत्र जीमूतवाहनेति ब्रवीति । तद्व्यक्तमयमस्य पिता । तत्कृतमेतैदीयेनाग्निना । न शक्नोम्यस्य पुत्रघातैल्लज्जया मुखं दर्शयितुम् । अथ वा किमग्निहेतो पर्याकुलोऽस्मि । तटस्थ एवास्मि जलनिधे । तद्यावदिदानी

ज्वालाभङ्गैस्त्रिलोकीग्रसनरभसलसत्कालजिह्वाग्रकल्पैः
सर्पद्भिः सप्त सर्पिःकणमिव कवलीकर्तुमीशे समुद्रान् ।
स्वैरेवोत्पातवातप्रसरपटुतरैर्धुक्षिते पक्षवातै-
रस्मिन्कल्पावसानज्वलनभयकरे वाडवाग्नौ पतामि ॥ २१ ॥

(इत्युत्थातुमिच्छति ।)

१ ०हन हा गुरुचरणशुश्रूषाभिज्ञ. २ कृपायाः. ३ रक्षामि बहून् किमेकमि. ४ वधूरभिहत, अस्मत्कुल. ५ आलिङ्गय. ६ किमेतदीयेनाग्निनात्मानमुद्दीपयामि. ७ तात्; ०घाति, ती; तीति. ८ समीपस्थ एव जलधिस्तावदिदानीम्. ९ सप्तसप्तेः पदमिव...मीशैः समुद्रे, सप्तहस्तैस्तृणमिव.

हस्तवर्तिना इत्यर्थः । पुत्रस्य घातस्तस्मात् लज्जा तया । युवयोः पुत्रो मया हत । अतोऽभिर्दीयतामिति वक्तुं लज्जे इत्यर्थः । अत्र अयत्नलभ्योऽग्निः सन्निहितः इत्याह — ज्वालाभङ्गैरिति । कल्पावसाने प्रलयकाले यः ज्वलन अग्निस्तद्वद्भयंकरे भीषणे

SHANKHA—Prince, your parents have come

HERO—(*In confusion*) Come, Shankhachuda, *sitting* here and covering my body with this upper garment, support me Otherwise, seeing me in this condition, my parents may perhaps give up their life suddenly

(*Shankhachuda takes up the upper garment lying by his side and does so*)

(*Then enter Jimutaketu with his wife and daughter-in-law*)

JIMUTAKETU—(*With tears*) Alas, my son Jimutavahana!

Truly, how can there be a preferential order (*Kramah*) in showing mercy, (thinking) that this one is my own while this a stranger? How is it that the thought whether many should be saved or only one, did not arise in you? and therefore, this entire family consisting of yourself, your parents and your wife has been completely destroyed by you, while giving up your life to protect a serpent from Garuda (20)

QUEEN—(*Addressing Malayavati*) child, stop (weeping) for a while The fire is being extinguished by the constant flow of your tears So do not weep

(*All move about*)

JIMUTAKETU—Alas! *my son Jimutavahana*

GARUDA—(*Listening*) He says 'Alas! my son Jimutava-

[illegible]

I be so anxious for the sake of fire? I am just on the shore of the ocean Therefore, now,

I shall fall into this submarine fire, which is dreadful like the fire of deluge (*Kalpavasana*), which is kindled (*dhukshita*) by the wind of my own wings stronger than the sweeping (*prasara*) portentous stormy blast, which is able to swallow tl [illegible]
(*sarp* [illegible]
the ti [illegible]
with [illegible]
up) (21)

अस्मिन् । वडवाया भय वाडवः स चासौ अग्निश्च तस्मिन् वाडवाग्नौ पतामि। कीदृशे इत्याह–उत्पाते प्रलये उत्पातस्य वा यः वातः तद्वत् प्रसरे सन्चलने पटुतरैरतिपटुभि स्वैरवे पक्षवातैः पक्षाभ्यामुत्थितैः समीरणैः धुक्षिते सदीपिते। पुनश्च त्रयाणा लोकाना समाहारः त्रिलोकी तस्या ग्रसनं कवलीकरण तत्र य. रस आसक्तिः तेन लसन्ती स्फुरन्ती या कालस्य जिह्वा तस्या अग्र तस्मादीपन्न्यूनैः। तत्सदृशः इत्यर्थः।

७६ **नाय०** — भो पुतगराज अलमनेनाध्यवसायेन । नाय प्रतीकारोऽस्य पाप्मन ।

७७ **गरु** — (जानुभ्या स्थित्वा कृताञ्जलि ।) भो महात्मन्कस्तर्हि कथ्यताम् ।

७८ **नाय०** — प्रतिपालय क्षणम् । पितरौ मे प्राप्तौ । यावदेतौ प्रणमामि ।

७९ **गरु०** — एव क्रियताम् ।

८० **जीमू०** — (दृष्ट्वा सहर्षम् ।) देवि दिष्ट्या वर्धसे । अय वत्सो जीमूतवाहनो न केवल ध्रियते प्रत्युत कृताञ्जलिना गरुडेन शिष्येणेव पर्युपास्यमानस्तिष्ठति ।

८१ **देवी** — (सहर्षम् ।) महाराज कृतार्थास्मि । अक्षतशरीरस्य पुत्रस्य मुख प्रेक्षिष्ये ।

८२ **नायि०** — यत्सत्यमार्यपुत्र प्रेक्षमाणाया अपि झटितिकृत्वा न प्रत्येति मे हृदयम् ।

८३ **जीमू०** — (उपसृत्य ।) वत्स एह्येहि । परिष्वजस्व माम् ।

८४ **नाय०** — (उत्थातुमिच्छ पतितोत्तरीयो मूर्च्छति ।)

८५ **शङ्ख०** — कुमार समाश्वसिहि ।

८६ **जीमू०** — हा वत्स कथ मा दृष्ट्वापि परित्यज्य गतोऽसि ।

८७ **देवी** — हा पुत्रक कथ वाङ्मात्रकेणापि त्वया न सभाविताम्मि ।

८८ **नायि०** — हा आर्यपुत्र कथ गुरुजनोऽपि त्वयोपेक्षित ।

(सर्वे मोह गच्छन्ति ।)

सर्पद्भि सर्वत प्रसरद्भि । ज्वालाभङ्गै अर्चि समूहै । प्रस्फुरद्भिर्ज्वालाभिरिति वा । सप्त समुद्रान् सर्पिष्कणमिव घृतबिन्दुमिव कवलीकर्तु ग्रसितुमीशे समर्थे । सप्तसप्ते पदमिवति पाठे सप्तसप्ते सूर्यस्य पद स्थानमिव कवलीकर्तुमीशे ज्वालाभङ्गै । समुद्रे वाडवाग्नौ इति योज्यम् । सर्पद्भि सप्तहस्तैस्तृणमिवेति पाठे ज्वालाभङ्गै सैरेव हस्तै सप्त समुद्रान् कवलीकर्तुमीशे इति योजना । उपमानेन ग्रसनस्य पत्करत्व वाडवाग्नेरत्वपोतिशयकथनात्पतत एव भस्मीभावात्प्रायश्चित्तस्य साथक्य मपि ध्वनितम् । भयानकरस । असम्बन्धे सम्ब धरूपातिशयोक्ति । सा च वाच्योत्प्रेक्षया संसृष्टा । प्रथमे पादे रसरस इति वृत्त्यनुप्रासश्च । स्रग्धरा वृत्तम् ।

HERO—O lord of birds, away with this resolve! This is not the remedy for this sin

GARUDA—(*Kneeling, with folded hands*) O noble one, *what is it then? Just tell me*

HERO—Wait for a moment My parents have come I shall just bow down to them

GARUDA—Do so

JIMUTAKETU—(*Looking, with joy*) O Queen, I congratulate you This our son Jimutavahana is not only alive, but on the contrary is being waited upon by Garuda with folded hands as by a disciple

QUEEN—(*With joy*) Your Majesty, my desire is fulfilled I shall see the face of my dear son whose body is unharmed

HEROINE—Though *I* actually see the face of my lord, my heart does not believe it at once

JIMUTAKETU—(*Approaching*) Child, come, come Embrace me

HERO—(*The hero, wishing to rise, faints away with the upper garment falling aside*)

SHANKHA—Prince, take heart

JIMUTAKETU—Oh child, even after seeing me, how have you gone away, leaving me?

QUEEN—Oh dear son, how is it that you have not honoured me even by a word?

HEROINE—Oh my lord, how have you ignored even the elders!

(*All faint away*)

॥ २१ ॥ दिष्ट्या वर्धसे तव दैवसम्पदमभिनन्दामि इत्यर्थः । ध्रियते जीवति । पर्युपास्यमानः सेव्यमानः । अक्षतमजातव्रण शरीर यस्य तादृशम् । झटितिवृत्त्वा सहसा । परस्यात्मा परात्मा । परात्मना रक्षितः जीवः येन । विपन्न मृतः । मरणमतिगच्छतीति मरणातिग मरणाधिकम् । असमीक्ष्यकारिता अविमृश्यकारिता । विजृम्भित परिणामः । विलुप्तेति । विलुप्तानि गरुडेन मांसादेर्भक्षणान्नष्टानि शेषाणि कण्ठव्यतिरिक्तानि अङ्गानि अवयवाः यस्य स विलुप्तशेषाङ्गः तस्य भाव· विलुप्तशेषाङ्गता तया । निराश्रयत्वात् अधिष्ठानाभावात्कण्ठदेशे कण्ठप्रान्त प्रयातान् । प्रयाणोन्मुखानित्यर्थः । प्राणान्वहन्त धारयन्तं तनयं निरीक्ष्य पाप· अह कथ शतधा शतप्रकार न व्रजामि विभक्तो भवामि । कठिनहृदयः खलु अहमिति भावः । हेतूत्प्रेक्षा । उपजातिवृत्तम् ॥ २२ ॥ पाठान्तरे अतिदुष्करकारिणी अतिकठोरकर्मकारिणी । कठोरहृदयेत्यर्थः ।

८९ शङ्ख० — हा शङ्खचूडहतक परात्मरक्षितजीव कथं गर्भस्य एव न विपन्नोऽसि येनैवं क्षणे क्षणे मरणा॒तिगं दुःखमनुभवसि ।

९० गरु० — सर्वमिदं मम नृशंसस्यासमीक्ष्यकारिताया विजृम्भितम् । तदेवं तावत्करोमि । (पक्षाभ्यां वीजयन् ।) भो महात्मन्समाश्वसिहि समाश्वसिहि ।

९१ नाय० — (समाश्वस्य ।) शङ्खचूड समाश्वासय गुरून् ।

९२ शङ्ख० — (उपसृत्य ।) तात समाश्वसिहि । मातः समाश्वसिहि । समाश्वसितो जीमूतवाहनः । किं न पश्यथ युष्माकमेव समाश्वासनार्थं प्रत्युत्थितोपविष्टस्तिष्ठति ।

(उभौ समाश्वसितः ।)

९३ देवी — पुत्र कथं प्रेक्षमाणानामेवास्माकं कृतान्तहतकेनापह्रियसे ।

९४ जीमू० — देवि मैवममङ्गल्यवादिनी भव । ध्रियत एवायुष्मान् । तद्वधूः समाश्वास्यताम् ।

९५ देवी — (मुखं वस्त्रेणावृत्य रुदती ।) प्रतिहतममङ्गलम् । न रोदिष्यामि । (मलयवतीमुद्दिश्य ।) जाते समाश्वसिहि समाश्वसिहि । उत्तिष्ठोत्तिष्ठ । वरमियत्या वेलायां भर्तुस्ते मुखं दृष्टम् ।

९६ नायि० — (समाश्वस्य ।) हा आर्यपुत्र । किं करोमि मन्दभागिनी ।

९७ देवी — (मलयवत्या मुखं पाणिना परिमृज्य ।) वत्से मैवं कुरु । प्रतिहतो विघ्नः ।

९८ जीमू० — (सास्रम् । आत्मगतम् ।)

विलुलितशेषाङ्गतया प्रयातास्रिराश्रयत्वादिव कण्ठदेशम् ।
प्राणान्वहन्तं तनयं निरीक्ष्य कथं न पापः शतधा व्रजामि ॥ २२ ॥

९९ नायि० — अतिदुःखभागिनी खल्वहं येदृशमप्यार्यपुत्रं प्रेक्षमाणा अद्यापि जीवितं न परित्यजामि ।

१०० देवी — (नायकस्याङ्गानि परामृशन्ती गरुडमुद्दिश्य ।) हा नृशंस कथमिदानीं त्वयैतदाभरणानामपि कृतशोभमेवैतदवस्थं पुत्रकस्य मे शरीरं कृतम् ।

१ णाधिकं ; णादतिरिक्तं. २ देवि मा मैवमाश्वसिहि. ३ प्रत्युत ; प्रत्युत युष्मानेव समाश्वासयितुम्०. ४ मामङ्गलं वादीः. ५ त्यजन्तं. ६ स्पृशन्ती.

परामृशन्ती हस्तेन स्पृशन्ती । आपूर्यमाणेति पाठान्तरे आपूर्यमाणा सम्रियमाणा नवा रूपयौवनयोः शोभा यत्र तत् । मैवं वदेति शेषः । परमार्थतः यथार्थतः विचा-

SHANKHA—Ah, wretched Shankhachuda, you whose life was saved by the life of another, why did you not perish while in the (mother's) womb? For every moment you are suffering the agony which is even more than that of death

GARUDA—All this is the consequence of the thoughtless action of my wicked self Therefore, I shall do this (*Fanning with his wings*) O noble one, be consoled be consoled

HERO—(*Recovering*) Shankhachuda, revive my parents

SHANKHA—(*Approaching*) Father, take heart Mother, take heart Jimutavahana has recovered Don't you see that he has got up and is sitting up only to console you?

(*Both recover*)

QUEEN—My son, how, even while we are looking you are being carried away by wretched death?

JIMUTAKETU—Queen do not utter such inauspicious words Our dear son (*Lit the long-lived one*) *is surely alive* So console the daughter-in-law

QUEEN—(*Covering her face with the garment and weeping*) May evil be averted! I shall not weep (*To Malayavati*) Take heart, daughter, take heart and rise up It is better that you should see your husband's face at this time

HEROINE—(*Recovering*) Ah my lord, what shall I do, unlucky that I am!

QUEEN—(*Wiping Malayavati's face with her hand*) My dear, don't do so The evil is averted

JIMUTAKETU—(*With tears, to himself,*)

How is it that I, a sinful one do not split into a hundred pieces, while beholding my son holding his life which has come up to the throat, being left without support, as it were, as all the other limbs have been destroyed (22)

HEROINE—*I am indeed a most miserable one, as I do* not abandon my life even when I see my dear husband in this condition

QUEEN—(*Touching the limbs of the hero, and addressing Garuda*) Ah cruel one! how, has this my son's body which gave beauty even to the ornaments, been reduced to this condition by you?

र्यमाणे। मेदृ इत्यादि । त्वचा चर्मणा आवृते आच्छादिते त्वगावृते शरीरनाम्नि देहसंज्ञे । मेदः वसा। मज्जा अस्थिसार । एतेषा सघाते समूहे। सदा बीभत्स जुगुप्साकारि दर्शन यस्य तस्मिन्। का शोभा। न कापीत्यर्थ । तदुक्त — मास मेदो रुधिर रोम नख देहतो विनैकैकम्। बीभत्स सघाते रमणीयमहो निमोहमाहात्म्यम्॥

१०१ **नाय०** — अम्ब मा मैवम् । किमनेन कृतम् । ननु पूर्वमप्येतदीदृशमेव परमार्थतः । पश्य ।

> मेदोऽस्थिमांसमज्जासृक्संघातेऽस्मिंस्त्वगावृते ।
> शरीरनाम्नि का शोभा सदा बीभत्सदर्शने ॥ २३ ॥

१०२ **गरु०** — भो महात्मन् । नरकानलज्वालावलीढमिवात्मानं मन्यमानो दुःखं तिष्ठामि । तदुपदिश्यतां येनाहं मुच्येयास्मादेनसः ।

१०३ **नाय०** — अनुजानातु मां तातः । यावदस्य पापस्य प्रतिपक्षमुपदिशामि ।

१०४ **जीमू०** — वत्स एवं क्रियताम् ।

१०५ **नाय०** — वैनतेय श्रूयताम् ।

१०६ **गरु०** — (जानुभ्यां स्थित्वा शिरसि निहिताञ्जलिः ।) आज्ञापयतु भवान् ।

१०७ **नाय०** — शृणु ।

> नित्यं प्राणाभिघातात्प्रतिविरम कुरु प्राक्कृतस्यानुतापं
> यत्नात्पुण्यप्रवाहं समुपचिनु दिशन्सर्वसत्त्वेष्वभीतिम् ।
> मग्नं येनात्र नैनः फलति परिणतं प्राणिहिंसासमुत्थं
> दुर्गाधे वारिपूरे लवणपलमिव क्षिप्तमन्तर्ह्रदस्य ॥ २४ ॥

१ (सव्यथम् ।) अम्ब. २ त्वचा—समा—वृत्ते. ३ शरीरे खलु—वास्ति. ४ अनुभवामि. ५ सर्वप्राणातिपातात्प्रविरम कुरुष्वादरेणानुतापं. ६ णातिपा०. ७ प्राक्कृते चा०. ८ विरचय दिशतात्—म. ९ नून. १० परिमितप्राणिहिंसासमेतत्. ११ येनैतत्; दुर्गाधापारवारेः. १२ कण.

इति । अतः एतन्नाशे खेदं मा कृथाः वैनतेयं च मा परुषं वादीः इत्यर्थः ॥ २३ ॥ नागकवचन श्रुत्वाह—महात्मन्निति । पापगौरवेण देहपतनादूर्ध्वं नरकपातो ध्रुव एव इति मत्वा आह—नरकः भाविनरकपातचिन्तेत्यर्थः एवानलस्तस्य ज्वालाभिः अवलीढ कवलीकृताम् । एनसः पापात् । पापस्य प्रतिपक्षं शत्रुं पापस्य दाहकं प्रायश्चित्तमित्यर्थः । **नित्यमिति** । नित्य य प्राणाभिघातः जीवहिंसा तस्मात्प्रतिविरम निवर्तस्व । प्राक्कृतस्य पूर्वाचरितस्य हिंसारूपपापस्य अनुतापं पश्चात्ताप कुरु । सर्वसत्त्वेषु सर्वेषु प्राणिषु अभीतिं हिंसानिवृत्त्या दिशन् ददत् यत्नात्प्रयत्नेन तदेकपरतयेत्यर्थः । पुण्यप्रवाहसुकृतराशिं समुपचिनु सगृहाण । येन पुण्यसञ्चयेनेति वा ।

HERO—Don't say so, mother. What has he done? Indeed, in reality, this body was in this condition even before! See,

What beauty can there be in this body which is just a collection of fat, bones, flesh, marrow and blood covered up with skin and which is always loathsome to look at? (23)

GARUDA—Magnanimous one! I am feeling miserable, thinking myself to be enveloped by the flames of fire in hell. So advise me, so that I may be free from this sin.

HERO—Let my father permit me, so that I may advise him on the atonement for this sin.

JIMUTAKETU—Child, do so.

HERO—Vainateya, listen.

GARUDA—(*Kneeling and folding his palms on his head*) Command me, sir!

HERO—Listen

Abstain for ever from destroying the lives (of others); repent for your actions of the past giving safety (*abhiti*) to all living beings, collect with great *effort* a *stream* (i.e. a heap) of religious merit so that the sin, arising from killing living beings, shall not bear fruit though ripe (*parinatam*), being merged (into it) like a pinch of salt thrown into the fathomless mass of water in a lake. (24)

अत्र अस्मिन्पुण्यप्रवाहे मग्नं प्राणिनां हिंसा प्राणिहिंसा तस्मात्समुत्तिष्ठतीति प्राणिहिंसासमुत्थं जीववधजनितं एनः पापं परिणतं भूत्वा । ह्रदस्य जलाशयस्यान्तः दुर्गाधे गभीरे वारिपूरे जलसमूहे क्षिप्तं लवणस्य पलं पलमितं लवणमित्यर्थः । इव न फलति । तद्यथा अगाधजलस्य ह्रदस्य लवणरसत्वं नापादयति तथा महतः पुण्यराशेः पुरतः खर्वीभूतं ते एनोपि नरकरूपं फलं न जनयेदित्यर्थः । उपमाकारकदीपकयोः संसृष्टिः । स्रग्धरा वृत्तम् ॥ २४ ॥ एवं बोधित उपदेशानुष्ठानं प्रतिजानीते—अज्ञानेति । इतः प्राक् अज्ञानरूपा निद्रा तया शयितः सुप्तः भवता प्रतिबोधितः जागरितः । अज्ञानं निरस्य विवेकं ग्राहितः । अद्य प्रभृति एषोहं सर्वप्राणिवधात् विरतो निवृत्तः । न तु निवर्तिष्ये ॥ २५ ॥ संप्रति अद्यैव न तु आगामिनि काले । क्वचिदिति । नागानां समाजः महोदन्वति महासागरे सुखं निर्भयं यथा तथा विहरतु क्रीडतु । अद्य यावद्भयेन पाताले निलीना नागा उन्मज्य सुखेनेतस्ततः सञ्चरन्तु इति भावः । कीदृशः इत्याह—क्वचित्प्रदेशे पुलिनवत्सैकतवद्विपुलैः विस्तृतैः भोगनिवहैः अहिशरीरसमूहैः । 'भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः' इत्यमरः । द्वीपस्येव आकारो यस्य स द्वीपाकारः द्वीपसंस्थानः । क्वचिदपि वलयितं कुण्डलीकृतं शरीरं येन स तथा । अत एव कृतावर्तभ्रान्तिः कृता जनिता आवर्तस्य वारिभ्रमस्य भ्रान्तिः शङ्का येन स

१०८ गरु० — यदाज्ञापयति भवान् ।

अज्ञाननिद्राशयितो भवता प्रतिबोधितः ।
सर्वप्राणिवधादेष विरतोऽद्य प्रभृत्यहम् ॥ २५ ॥

संप्रति हि ।

क्वचिद्द्वीपाकारैः पुलिनविपुलैर्भोगनिवहैः
कृतावर्तभ्रान्तिर्वलयितशरीरः क्वचिदपि ।
व्रजन्कूलात्कूलं क्वचिदपि च सेतुप्रतिसमः
समाजो नागानां विहरतु महोदन्वति सुखम् ॥ २६ ॥

अपि च ।

स्रस्तानापादलम्बान्घनतिमिरनिभान्केशपाशान्वहन्त्यः
सिन्दूरेणेव दिग्धैः प्रथमरविकरस्पर्शताम्रैः कपोलैः ।
अस्मिन्नायासिताङ्ग्योऽप्यवगणितरुजः कानने चन्दनानां
नित्यं गायन्तु रागादुरगयुवतयः कीर्तिमेतां तवैव ॥ २७ ॥

०९ नाय० — साधु महात्मन्साधु । अनुमोदामहे वयम् । सर्वथा दृढसमाधिर्भव । (शङ्खचूडमुद्दिश्य ।) त्वयापि स्वगृहमिदानीं गम्यताम् ।

११० शङ्ख० — (निःश्वस्याधोमुखस्तिष्ठति ।)

१११ नाय० — (निःश्वस्य शङ्खचूडं पश्यन् ।) शङ्खचूड सत्वरं गच्छ । शोकाकुलां जननीं पश्य ।

उत्प्रेक्षमाणा त्वां तार्क्ष्यचञ्चुकोटिनिपातितम् ।
त्वद्दुःखदुःखिता नूनमास्ते सा जननी तव ॥ २८ ॥

१ पयसि. २ निद्रया सुप्तः. ३ एव. ४ कारैः. ५ महाशैलप्रख्यैः; स्थले वा पाताले. ६ विचरतु. ७ प्रस्थाना — नात्पादल० — स्रस्तान्पाताल — लम्बांस्तिमिरचयनिभान्. ८ हस्तान्. ९ णैव. १० रक्तैः ११ आया — सेना — सादा — स्राङ्गयः. १२ प्यविग०; उपरिग०. १३ अस्मिन्. १४ समाधानः. १५ मातर. १६ विपा०. १७ 'दुःखं.

तर्थोक्तः । क्वचिदपि च कूलात्कूलं तीरात्तीरं व्रजन् सेतुप्रतिसमः सेतुसदृशः । कृतसेतुभ्रम इत्यर्थः । उपमा भ्रान्तिमांश्चालंकारौ । शिखरिणी वृत्तम् ॥ २६ ॥ स्रस्तानिति । स्रस्तान् शिथिलबन्धत्वाद्विगलितान् । आपादलम्बान् पादपर्यन्तं लम्बमानान् । घनं यत्तिमिरं तत्सदृशान् निबिडान्धकारतुल्यान् केशपाशान् कचकलापान् वहन्त्यः । प्रथमाः प्रातःकालिका रविकराः सूर्यकिरणास्तेषां स्पर्शेन ताम्रैः

GARUDA—As you command, sir

Lying in the sleep of ignorance, I am awakened by you I have, from now onwards, abstained from killing all living beings (25)

Let the assemblage of serpents sport happily in the vast ocean—having the form of an island in some places, with the heaps of their bodies as expansive as sandy banks, producing in other places, an illusion of a whirlpool by their bodies coiled up, and in some places looking like a bridge while passing from one shore to another (26)

Moreover,

Possessing abundant masses of hair that are loosened and that hang down up to the feet, and that resemble a mass of darkness (in colour), with (their) cheeks reddened by the touch of the early rays of the (rising) sun, as if anointed with red lead, let the serpent damsels, unmindful of the fatigue though their bodies be tired, always sing happily (*ragat*) your *glory in this forest of sandal trees* (27)

HERO—Very good, noble one, very good We approve of it By all means, be firm in your resolve (*Addressing Shankhachuda*) Shankhachuda, you may also return home now

SHANKHA—(Sighing, stands with his face cast down)

HERO—(*Sighing and looking at Shankhachuda*) Shankhachude, go quickly Meet your mother distressed with grief

Imagining that you are torn by the tip of Garuda's beak, your mother is indeed afflicted by grief for you (28)

बालातपसंपर्केण रक्तैः । अत एव सिन्दूरेण रक्तचूर्णकेन इव दिग्धै. लिप्तैः । अनेन सौकुमार्यमुक्तम् । कपोलैः उपलक्षिता· । आयासितानि परिभ्रमणादिश्रमेण श्रान्तान्य ङ्गानि यासा तादृश्योपि अस्मिन् चन्दनाना कानने अवगणिता रुक् पीडा याभिस्ताः उरगयुवतयः एता तवैव कीर्तिं रागात्प्रेम्णा गायन्तु । उत्प्रेक्षालकारः । स्रग्धरा वृत्तम् ॥ २७ ॥ दृढः समाधिः निश्चयः यस्य स तथा । दृढसमाधान इति पाठे स एवार्थः । उत्प्रेक्षमाणेति । तार्क्ष्यचञ्चुकोट्या गरुडस्य चञ्च्वग्रेण निपतित हतं । विपाटि तमिति पाठे दारित । त्वामुत्प्रेक्षमाणा सभावयन्ती सा पूर्वं शोकविह्वला दृष्टा । तव माता नूनं त्वद्दुःखेन दु.खिता रजातदुःखा आस्ते । अतः तद्दुःखनिरसनार्थं त्वयावश्य गन्तव्यमिति भाव. ॥ २८ ॥ अक्षत अव्रणित सुरक्षितमित्यर्थ. । शरीर यस्य तस्य । परार्थसंपादने रताः प्रीतिस्तेनाक्षेपस्तस्मात् । मर्माणि छिन्दन्ति तादृश्यः । वेदना व्यथापीडाः । समानय एकत्रानय । विपद्यते म्रियते । गात्राणीति । विगता चेतना सज्ञा येषा तानि विचेतनानि अवसन्नशक्तीनि अमूनि मम गात्राणि अवयवा न

११२ **देवी**—(सास्रम् ।) धन्या खलु सा जननी या गरुडमुखपतितस्याक्षतशरीरस्यैव पुत्रकस्य मुखं प्रेक्षिष्यते ।

११३ **शङ्ख०**—अम्ब सत्यमेतत् । यदि कुमारः स्वस्थो भविष्यति ।

११४ **नाय०**—(वेदनां नाटयन् ।) अहह परार्थसंपादनरसाक्षेपादेतावतीं वेला नवेदि ताः संप्रति मां बाधितुमारब्धा मर्मच्छेदिन्यो वेदना । (मरणावस्थां नाटयति ।)

११५ **जीमू०**—(ससंभ्रमम् ।) हा वत्स किमेवं करोषि ।

११६ **देवी**—हा किं नु खल्वेवं वदति । परित्रायध्वम् परित्रायध्वम् । एष खलु मे पुत्रको विपद्यते ।

११७ **नायि०**—आर्यपुत्र मां परित्यज्य गमनं ते न युक्तम् ।

११८ **नाय०**—(अञ्जलिं कर्तुमिच्छन् ।) शङ्खचूड समानय मे हस्तौ ।

११९ **शङ्ख०**—(तथाकुर्वन् । सास्रम् ।) कष्टमनाथीभूतं जगत् ।

१२० **नाय०**—(किंचिन्मीलिताक्षः पितरौ पश्यन् ।) तात अम्ब अयं मे पश्चिम प्रणामः । यत. ।

गात्राण्यमूनि न वहन्ति विचेतनानि
श्रोत्रं स्फुटाक्षरपदां न शृणोति वाचम् ।
कष्टं निमीलितमिदं सहसैव चक्षु—
र्हा तात यान्ति विवशस्य ममासवोऽमी ॥ २९ ॥

अथ वा किमनेन प्रलपितेन । ('संरक्षता पन्नगम्—' इत्यादि पठित्वा पतति ।)

१२१ **देवी**—हा पुत्र हा वत्स हा गुरुजनवत्सल कुत्र गतोऽसि । देहि मे प्रतिवचनम् । हा लोचनानन्द हा जीमूतवाहन कथं पुनस्ते दर्शनम् ।

१ स्वस्थीभ० ; कुमारस्य स्वस्ति. २ दनामृतरसास्वादाक्षिप्तत्वादेता० विदिता... रब्धा वेदना. ३ लक्षिताः. ४ जल. ५ कृतं ; अनर्थीभूत. ६ अर्धोन्मी० ; —चक्षुः. ७ सचेतनत्वं. ८ न गिर—पदा न गिरः—शृणोति. ९ वोपि.

वहन्ति स्वं स्व कार्यं न कुर्वन्ति । तदेव प्रतिपादयति । श्रोत्र कर्णेन्द्रियं स्फुटानि अक्षराणि पदानि सुप्तिङन्तानि च यस्यां तादृशीं गिर वाणीं न शृणोति । अस्फुटमेव शृणोतीत्यर्थः । कष्टं इद चक्षुः सहसा अकस्मादेव उपहतशक्तित्वान्निमीलितं मुकुलितम् । हा तात विवशस्य गलितचैतन्यस्य मम अमी असवः प्राणा यान्ति ।

QUEEN—(*with tears*) Blessed indeed is that mother who will see the face of her son fallen into the mouth of Garuda and yet unhurt

SHANKHA—Mother, it is true only if the Prince would be all right (i e healed)

HERO—(*gesticulating pain*) Oh these acute (Lit. those that pierce the vital parts) pangs, which were not felt by me all this time on account of the distraction caused by my passion for doing good to others, have now begun to oppress me (*Gesticulates dying condition*)

JIMUTAKETU—(*with confusion*) Ah my child, what are you doing?

QUEEN—Alas, why indeed does he speak thus? Oh, save (him), save (him) Here is my dear son dying

HEROINE—*Alas, my lord, it is not proper for you to go,* leaving me

HERO—(*wishing to fold his hands*) Shankhachuda, bring my hands together.

SHANKHACHUDA—(*Doing so, with tears*) Alas, the world is deprived of its saviour.

HERO — (*Looking at the parents with slightly opened eyes*) Father, mother, this is my last salutation (*to you*) For,

These lifeless limbs cannot move The ear cannot hear speech (though) of distinct syllables and words Alas, this eye is suddenly closed, Oh my father, this life of mine, who *am helpless, is departing* (29)

Or what is the use of lamenting thus? (*Repeating the verse* IV-26 *'Through the merit that I have acquired' etc falls down*)

QUEEN—Alas' my son, oh dear child, oh you, affectionate to the elders, where have you gone? Give me a reply, oh you, the delight of the eyes, oh Jimutavahana, how shall we *see you again?*

स्वभावोक्तिः प्राणनिष्क्रमणे गात्राणामचेतनत्वस्य हेतुत्वेन कथनात्काव्यलिङ्गं चालंकारौ । वसन्ततिलकं वृत्तम् ॥ २९ ॥ देहे ममत्वाभावादाह–किमनेनेति । निराधारमिति । हे तनय त्वयि लोकान्तरगते परलोकं गते । अन्यः लोकः लोकान्तरम् । धैर्यं धीरता *निर्गत आधारो यस्य तन्निराधारं निरवलम्बनं जातम् । त्वादृशस्य* लोकोत्तरधैर्यशालिनोऽभावादित्यर्थः । विनयः नम्रता कमिव शरणं यातु आश्रयत्वेनोपैतु । न कमपीत्यर्थः । इहास्मिञ्जगति क्षान्तिं क्षमा वोढुं धारयितुं कः क्षमः । न कोपीत्यर्थः । दानपरता त्यागशीलता । औदार्यमित्यर्थः । विरता समाप्तिं याता । सत्यं सत्यमेव ध्रुवं हतं विनष्टम् । कृपणा आश्रयाभावाद् दीना कृपा दया च अद्य

१२२ **जीमू०** — हा पुत्र जीमूतवाहन हा निखिलजनवत्सल हा सर्वगुणनिधे। क्वासि। देहि[2] मे प्रतिवचनम्। (हस्तौमुत्क्षिप्य।) कष्टं भो. कष्टम्।

निराधारं धैर्यं कमिव शरणं यातु विनयः
क्षमः क्षान्तिं वोढुं क इह विरता दानपरता।
हतं सत्यं सत्यं व्रजतु कृपणा क्वाद्य करुणा
जगज्जातं शून्यं त्वयि तनय लोकान्तरगते ॥ ३० ॥

१२३ **नायि०** — हा आर्यपुत्र कथं मां परित्यज्य गतोऽसि। निर्घृणहृदये वज्रकठिनदेहे मलयवति प्राणनाथं विना कथमद्यापि जीवसि।

१२४ **शङ्ख०** — हा निष्कारणपरोपकारव्रत प्राणेभ्योऽपि वल्लभतर जन विहाय गम्यते। तदवश्यमेव भवन्तमन्वेति शङ्खचूडः।

१२५ **गरु०** — (सोद्वेगम्।) कष्टमुपरतोऽयं महात्मा। तत्किमिदानीं करोमि।

१२६ **देवी** — (सास्रम्। ऊर्ध्वमवलोक्य।) भगवन्तो लोकपाला. कथममृतेन सिक्त्वेमं मे पुत्रकं जीवयत।

१ प्रणयि०; वल्लभ. २ वचनेनापि मे प्रत्युत्तरं न ददासि. ३ हस्तावु०. ४ व्रजतु च कृपा क्वाद्य कृपणा. ५ ज्जातं. ६ अतिनिर्घृणे मलयवति किमेतत् प्रेक्षितव्यमित्येतावद्वेलं जीवितासि।

क्व व्रजतु। न त्वादृगधिष्ठानं यद्गच्छेदित्यर्थः। किं बहुना। जगत् शून्यं त्वां विना निरर्थकं जातम्। अतिशयोक्तिः। शिखरिणी वृत्तम् ॥ ३० ॥ वज्रवत्कठिनः देहो यस्याः तादृशि। निष्कारणः अहेतुकः यः परोपकारः स एव व्रतं यस्य तादृशं। वल्लभतर जन मातापित्रादिकम्। उपरतः मृतः। लोकपालाः अष्टौ दिगीशाः। 'इन्द्रो वह्निः पितृपति (यमः) नैर्ऋतो वरुणो मरुत्। कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्' ॥ इत्यमरः। प्रमृष्टमपमार्जितम्। चिकीर्षितस्येपत्करत्वनिश्चयेन सिद्धवत्कथनम्। तिस्र एव दशा येषां ते त्रिदशाः। त्रिः दश परिमाणं येषां ते इति वा। सख्यया व्यया० इत्यादिना बहुव्रीहिः। तेषां पतिरिन्द्रस्तम्। तद्विसृष्टेन तेन प्रेरितेन। अस्थीनि शेषो येषां ते अस्थिशेषास्तान्। न दास्यत्यसौ पूर्वं दृष्टमत्प्रभाव इत्यर्थः। चिकीर्षितं प्रतिजानीते—पक्षात्क्षिप्तेत्यादिना। पटुतर सरभसकृतं यत्पतनं सागरमभीत्यर्थः। तेन। तत्र पक्षयोराकुञ्चनप्रसरणाभ्यामिति यावत्। प्रेर्यमाणैः प्रेर्यमाणैः समीरैः पवनैः हेतुभिः। पक्षाभ्यामुत्क्षिप्तः अम्बुनाशः लक्षणया

JIMUTAKETU—Alas, my son Jimutavahana! Oh you, kind towards all people! Oh you, the treasure of all virtues! Where are you? Give me a reply (*Throwing up his hand*) Alas! Alas!!

Fortitude has lost its support Whom should Modesty approach for protection? Who is capable of bearing Forgiveness? Benevolence has come to an end Truth is truly destroyed Where can helpless compassion go now? The entire world has become a void, O son, when you departed to the other world! (30)

HEROINE—Alas! My lord, how have you gone away,

SHANKHA—Oh you, who had taken a vow of obliging others without a cause, where are you going away, abandoning this person, even dearer than your own life! Then surely, Shankhachuda will follow you

GARUDA—(*with dejection*) Alas, this noble one is dead! What shall I do now?

QUEEN—(*with tears, looking up*) Oh Guardian deities of the world, will you not revive this son of mine somehow by sprinkling nectar (on him)?

अम्भोधिजलं येन तादृशः। पटुजवपवनप्रेर्यमाणे समीरे इति पाठे समीरे वायौ पटुना महता जवपवनेन वेगवायुना प्रेर्यमाणे प्रतीपं क्षिप्यमाणे। पलायनं कारिते वायौ इत्यर्थः। पक्षैरित्यादिपाठे पक्षैः कर्तृभिः प्रेर्यमाणैः। पटुतराश्च ते जवनाश्च तैः समीरैः अम्बुनाथ। क्षिप्त्वेत्यर्थः। नेत्रार्चिषः नयनाग्नेः यः प्लोष. तत्कृत इत्यर्थः। दाहः तेन या मूर्च्छा मोहस्तया विधुरं विह्वलं यथा तथा विनपतन्तः। यद्वा तया विधुराश्च ते विनिपतन्तश्च सानला अनलेन अग्निना सहिता द्वादश अर्का यस्य तादृशः अहम्। शक्रस्य अशनिं वज्रं धनदस्य कुबेरस्य गदां प्रेतलोकेशस्य यमस्य दण्डं च इत्येतानि प्रधानशस्त्राणि चक्ष्वा सञ्चूर्ण्य आजौ युद्धे देवान् निर्जित्य क्षणं अमृतमयीं सुधामयीं वृष्टिमभ्युत्सृजामि पातयामि। कारकदीपकातिशयोक्त्योः ससृष्टिः। स्रग्धरा वृत्तम् ॥ २१ ॥ सावेगं सावेशम्। आवेशाटोपसंरम्भाः। इति त्रिकाण्डशेषः। लघु शीघ्रं सज्ज अस्मिन्कर्मणि आसक्तो भव। उष्णीष इति। मे मम दुष्कृतैः दुष्कर्मभिः पापैरित्यर्थः। व्याख्यातमेतत्पद्यं २२ पृष्ठे द्रष्टव्यम् ॥ ३२ ॥ अलीकमसत्यं वदतीति अलीकवादिनी। महाराज इति अकार्यत्वद्योतनार्थम्। साहसं चिताप्रवेशरूपम्। न मोघं व्यर्थममोघं सफलं दर्शनं यस्या. सा। अन्ये येन केनापि स्वप्राणरक्षणं कुर्वन्तीति तेभ्यो

१२७ गरु० — (सहर्षमात्मगतम् ।) अये अमृतसंकीर्तनात्साधु स्मृतम् । मन्ये प्रमृष्टमयशः । तदावत्त्रिदशपतिमभ्यर्थ्य तद्विसृष्टेनामृतवर्षेण न केवलं जीमूतवाहनं यावदेतानपि पूर्वभक्षितानस्थिशेषानुरगपतीन्प्रत्युज्जीवयामि । अथ प्रार्थितो न दास्यत्यसौ ततोऽहं

पक्षोत्क्षिप्ताम्बुनाथः पटुतरपतनप्रेर्यमाणैः समीरै-
नेत्रार्चिःप्लोषमूर्च्छाविधुरविनिपतत्सानलद्वादशार्कः ।
चञ्च्वा संचूर्ण्य शक्राशनिधनदगदाप्रेतलोकेशदण्डा-
नाजौ निर्जित्य देवान्क्षणममृतमयीं वृष्टिमभ्युत्सृजामि ॥ २१ ॥

ादयं गतोस्मि । (इति साटोपं परिक्रम्य निष्क्रान्तः ।)

१२८ जीमू० — वत्स शङ्खचूड किमद्यापि प्रतीक्ष्यते । समाहृत्य दारूणि पुत्रस्य मे विरचय चिताम् । येन वयमप्यनेनैव सह गच्छाम ।

१२९ देवी — पुत्र लघु सज्ज । दुखं खल्वस्माभिर्विना भ्राता ते तिष्ठति ।

१३० शङ्ख० — (साश्रम् ।) यदाज्ञापयन्ति गुरवः । नन्वग्रग एवाहमत्र युष्माकम् । (उत्थाय । चितारचनां कृत्वा ।) तात अम्ब सज्जीकृतेयं चिता ।

१३१ जीमू० — कष्टं भोः कष्टम् ।

उष्णीषः स्फुट एष मूर्धनि विभात्यूर्णेयमन्तर्भ्रुवो-
श्चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्धते ।
चक्राङ्कौ च करौ तथापि हि कथं हा वत्स मे दुष्कृतै-
स्त्वं विद्याधरचक्रवर्तिपदवीमप्राप्य विश्राम्यसि ॥ २२ ॥

१ परिमृ०; विनष्टम्. २ पक्षैः क्षीप्त्वाम्बुनाथं पटुतरजवनैः प्रेर्यमाणैः समीरैः. ३ पटुजवपवनप्रेर्यमाणे समीरे. ४ नेत्राग्नि. ५ वारिलोकेशपाशान्. ६ नन्तःसंमग्न–नित्यान्तर्मग्न–पक्षः ७ अमृतमयं वर्षम्. ८ चितिं. ९ वैश्वानर साधयामः. १० एव. ११ महु० १२ किं गच्छसि.

व्यतिरेकं दर्शयन्नाह — निजेनेति । हे वत्स पुत्र निजेन जीवितेनापि । किं वक्तव्यं वस्त्वन्तरेणेति । जगता तन्निवासिनामित्यर्थः । हितसम्पादनेन उपकारिणः ते परितुष्टास्मि । हे जीमूतवाहन जीव पुनरपि सजीवो भव । देहोपाधिमुक्तस्य पुनरपि देहप्रापणाज्जीमूतवाहन इति निर्देशः ॥ २२ ॥ अभिलषितेति । अभिलषितादभीष्टादधिकम् । अयं पर्याप्तं न याचते उत्तमात्महितं वा न जानातीति मत्वेत्यर्थः । वर ददातीति तत्सम्बोधनम् । प्रणिपतिताः प्रणताः शरणमागता इत्यर्थः ये जनास्तेषा-

GARUDA—(*with joy, to himself*) Ah I am well reminded by the mention of the word 'nectar'. I think my infamy is wiped away. Therefore, I shall request the Lord of Gods (i e Indra) and by the shower of nectar sent by him, I shall revive not only Jimutavahana but also these serpent-lords devoured by me before and whose bones alone are remaining now If he does not give (the nectar) though requested, then,

Tossing up the (waters of the) sea with my wings, by means of winds stirred by my furious flight, making the twelve burning suns fall down in a swoon being scorched up (*plosha*) by the flames from my eyes, pulverising with my beak the thunder-bolt of Indra, the mace of Kubera and the staff of Yama (Lit. Lord of the world of the dead), and thus having defeated the Gods in battle, I shall let fall a shower of nectar for a moment (31)

So, here I go (*Moving about haughtily, goes away*)

*JIMUTAKETU—Son Shankhachuda, what are you wait*ing for now? Having gathered the fuel, arrange the funeral pyre for my son, so that we too shall go with him

*QUEEN—Son, arrange it quickly Your brother (Jimuta*vahana) will feel unhappy without us

SHANKHA—(*with tears*) As the elders command But surely I shall be the first to go among you all (*Rising up arranging the funeral pyre*) Father, mother, the funeral pyre has been laid

JIMU—Alas, oh, Alas!

On his head shines distinctly the mark of the crown, and this circle of fine hair (shines) between his eye-brows, his eye resembles a red lotus, his chest vies with (that of) a lion, and even though the pair of these hands bear the marks of a disc, O son, how, by (the force of) my evil deeds, do you rest without attaining the title of the Emperor of Vidyadharas? (32)

मार्तिहारिणि पीडादूरीकरणशीले । शरणे रक्षणे साधुः शरण्या । तत्र साधुः इति यत्प्रत्ययः । तत्सम्बुद्धिः । विद्याधरैः वन्दिते विद्याधराणां कुलदेवते गौरि अहं ते चरणौ नमामि । अत्र विशेषणानां साभिप्रायत्वात्परिकरालंकारः । आर्या छन्दः ॥ २४ ॥ अविद्यमानानि अभ्राणि मेघा यस्याः सा । कारणेन विना कार्यदर्शनात्प्रश्नः—भगवति किमेतदिति । सम्प्राप्तेति । सम्प्राप्तः वर्णकान्त्यादिवैफल्यराहित्येन प्राप्तः अखण्डः समग्रः । न तु केनाप्यंशेन अवयवेन वा हीनः । देहो यैः ते सम्प्राप्ताखण्डदेहाः । स्फुरन्तः प्रकाशमाना मणीनां शिरःस्थरत्नानां किरणा येषां ते. भासुरं. उज्ज्वलं उत्तमाङ्गं

देवि किमिव रुद्यते । तदुत्तिष्ठ चितामारोहामः ।

(सर्वे उत्तिष्ठन्ति ।)

१३२ **नायिका** —(बद्धाञ्जलिरूर्ध्वं पश्यन्ती ।) भगवति गौरि त्वयाज्ञप्तम् । विद्याधरचक्रवर्ती भर्ता ते भविष्यतीति । तत्कथं मम मन्दभाग्यायास्त्वमलीकवादिनी संवृत्ता ।

(ततः प्रविशति ससम्भ्रमा गौरी ।)

१३३ **गौरी** —महाराज जीमूतकेतो न खलु साहसमनुष्ठातव्यम् ।

१३४ **जीमू०** — अये कथममोघदर्शना गौरी ।

१३५ **गौरी** —(मलयवतीमुद्दिश्य ।) वत्से मलयवति कथमहमलीकवादिनी भवेयम् । (नायकमुपसृत्य कमण्डलूदकेनाभ्युक्ष्य ।)

निजेन जीवितेनापि जगतामुपकारिणः ।
परितुष्टास्मि ते वत्स जीव जीमूतवाहन ॥ ३३ ॥

१३६ **नाय०** —(उत्तिष्ठति ।)

१३७ **जीमू०** —(सहर्षम् ।) देवि दिष्ट्या वर्धसे । प्रत्युज्जीवितो वत्सः ।

१३८ **देवी** —भगवत्या गौर्याः प्रसादेन ।

(उभौ गौर्याः पादयोः पतित्वा नायकमालिङ्गतः ।)

१३९ **नायि०** —(सहर्षम् ।) दिष्ट्या प्रत्युज्जीवित आर्यपुत्रः ।

(गौर्याः पादयोः पतति ।)

१४० **नाय०** —(गौरीं दृष्ट्वा बद्धाञ्जलिः ।) अये कथममोघदर्शना भगवती ।

अभिलषिताधिकवरदे प्रणिपतितजनार्तिहारिणि शरण्ये ।
चरणौ नमाम्यहं ते विद्याधरवन्दिते गौरि ॥ ३४ ॥

(इति गौर्याः पादयोः पतति ।)

१ परिक्रामन्ति. २ अभिषिच्य; वारिणाभ्युक्षन्ती. ३ यदयमक्षतशरीरो जीमूतवाहनः समुत्थितः. ४ ताखिल. ५ प्रणतिपरजन. ६ देवते.

शिरोभिः उपलक्षिताः । जिह्वयोः कोटिद्वयं अग्रयुगलं तेन । अमृतरसस्य य आस्वादः तस्य लोभात् तत्स्पृहया । क्षितिं भूमिं लिहन्तः । संप्रति इदानीमेव आबद्धः कृतः गमनौत्सुक्यात् वेगः यैस्ते तथोक्ताः । एते विषधरपतयः मलयगिरेः सरिता वारिपूरा जलप्रवाहा इव वक्र. जातिस्वभावाज्जिह्मैः मार्गैः तोयराशिं विशन्ति । तेषां पातालवासित्वात्तस्य च समुद्रमार्गेण गन्तव्यत्वात्समुद्रप्रवेशः ।

Queen, why are you weeping? Get up, we will ascend the funeral pyre

(*All rise up*)

HEROINE—(*Folding her hands and looking up*) Goddess Gauri, you had commanded 'The Emperor of the Vidyadharas would be your husband' How then have your words proved false about me, unfortunate that I am?

(*Then enter Gauri in haste*)

GAURI—King Jimutaketu, you should not commit this rash act!

JIMU—Ah how? (It is) Gauri whose sight is never fruitless (i e whose sight always brings good luck)

GAURI—(*Addressing Malayavati*) Child Malayavati, how can I ever speak false? (Approaching the hero and sprinkling him with the water from her gourd)

I am pleased with you, my son, who would oblige the world even by (sacrificing) your own life May you revive, Jimutavahana! (33)

HERO—(*The Hero rises up*)

JIMU—(*with joy*) Queen, you are fortunate! Our son has come back to life!

QUEEN—By the favour of the Goddess Gauri

(*Both fall at the feet of Gauri and then embrace the Hero*)

HEROINE—(*with joy*) Luckily my lord has come back to life!

HERO—(*Seeing Gauri, with folded hands*) Oh, how, this is the Goddess Gauri, whose sight is never fruitless!

I bow down at your feet, O Gauri, who confer more boons than are desired for, who remove the misery of people that bow down (to you), who give refuge to all and who are worshipped by the Vidyadharas (34)

(*Falls at the feet of Gauri*)

उत्प्रेक्षास्वभावोक्त्योः संसृष्टिः । स्रग्धरा वृत्तम् ॥ ३५ ॥ जीवितदानमेव जीवितदानमात्र तस्य योग्यः । अभिलषिताधिकवरदे इति यदुक्त तस्य याथार्थ्ये दर्शयन्नाह—तदयमिति । हंसांसेत्यादि । हंसाना मरालाना असैः स्कन्धप्रदेशै आहताना ताडिताना विधूतानामित्यर्थ । हेमपङ्कजाना कनककमलाना रजसा परागेण संपर्क एव पङ्कस्तेन उक्षितैः सिक्तैः संपृक्तैरित्यर्थः । अनेन तेषा सुरभित्वमुक्तम् । मम मानसान्मनसा योगबलादिति यावत् । यद्वा मम मानसमेव मानस तदाख्य सरस्तस्मात् । उपनतै प्राप्तैः । महापावनै अतिपुण्यै ।

(सर्वे ऊर्ध्वे पश्यन्ति ।)

१४१ **जीमू०**—अये कथमनभ्रा वृष्टिः। भगवति किमेतत् ।

१४२ **गौरी**—राजन् जीमूतवाहनं प्रत्युज्जीवयितुमेतांश्चास्थिशेषानुरगपतीन् समुपजातपश्चात्तापेन पक्षिपतिना गरुडेन देवलोकादियममृतवृष्टिः पातिता । (अङ्गुल्या निर्दिश्य।) किं न पश्यति भवान् ।

संप्राप्ताखण्डदेहाः स्फुटमणिकिरणैर्भासुरैरुत्तमाङ्गै-
र्जिह्वाकोटिद्वयेन क्षितिममृतरसास्वादलोभाल्लिहन्तः ।
संप्रत्याबद्धवेगा मलयगिरिसरिद्वारिपूरा इवैते
वक्रैः प्रस्थानमार्गैर्विषधरपतयस्तोयराशिं विशन्ति ॥ ३५ ॥

(नायकमुद्दिश्य ।) वत्स जीमूतवाहन न त्वं केवलं जीवितदानमात्रस्यैव योग्यः । तदयमपरस्ते प्रसादः ।

[illegible]

[illegible]

[illegible]

त्वां विद्याधरचक्रवर्तिनमहं प्रीत्या करोमि क्षणात् ॥ ३६ ॥

अपि च ।

अग्रेसरीभवतु काञ्चनचक्ररत्न-
मेष द्विपश्च धवलो दशनैश्चतुर्भिः ।
श्यामो हरिर्मलयवत्यपि चेत्यमूनि
रत्नानि ते[13] समवलोकय चक्रवर्तिन् ॥ ३७ ॥

१ अनभ्रादाकाशात्. २ ताः शंखचूडं. ३ वेग. ४ इवामी. ५ हंसासेविन. ६ ०कोज्झिते. ७ ०दपि परं; सादवगतैः; सादवतरत्तो०. ८ एवा. ९ भुवम्. १० मरो; सरः श्रयतु. ११ कमेतत्. १२ धवलैः. १३ मे.

स्वेच्छया मत्सङ्कल्पेन निर्मितेषु रत्नकुम्भेषु निहितैः । अभिषेके तेषामावश्यकत्वात् । तोयैः प्रीत्या अभिषिच्य एषाहं त्वां क्षणाद् विद्याधरचक्रवर्तिनं करोमि । उदात्तालंकारः । अनुप्रासश्च । शार्दूलविक्रीडितं वृत्तम् ॥ ३६ ॥ न केवलं चक्रवर्तित्वं तत्साममग्रीमपि वितरामीत्याह—अग्रेसरीभवत्विति । हे चक्रवर्तिन् चक्रेषु रत्नमिव चक्ररत्नं । काञ्चनं चक्ररत्नं काञ्चनचक्ररत्नं । अग्रेसरीभवतु दीयमानेषु प्रथमं भवतु । चतुर्भिः दशनैः दन्तैः उपलक्षित एष धवलो द्विपश्च । एतेन ऐरावतस्ये-

(All look up)

JIMU—Ah, how! there is a shower without clouds! Goddess, what is this?

GAURI—O king, this shower of nectar is made to come down from heaven by the repenting Garuda, the king of birds to revive Jimutavahana and these serpent-lords who remain as mere bones (*Pointing with her finger,*) Don't you see,

These serpent-lords, who have regained their entire bodies, with their heads shining with the rays of bright jewels (in their hoods), and licking the ground with the double tongue-tips out of greed for tasting nectar, are now entering the ocean with great speed in zig-zag movements, like the flood-streams of the rivers from the Malaya mountain. (35)

(*Addressing the Hero*) Child Jimutavahana, you deserve not merely the granting of life, so here is another favour

Having bathed (i e consecrated) you personally with extremely holy waters produced and brought out of my own mind, besprinkled with the thick clogging pollen of the golden lotuses stirred by the shoulders of swans and placed in jewelled jars created by my will, here, in a moment, I shall gladly make you the Emperor of Vidyadharas (36)

Let this golden discus be the foremost, and this white elephant with four tusks, the black steed and Malayavati—Behold, O Emperor, these your jewels (37)

वास्य हस्तिरत्नत्व ध्वनितम् । श्यामो हरिरश्वश्च । अश्वाना श्यामस्य मुख्यत्वात् । मलयवती चापि इति अमूनि मया दत्तानि ते रत्नानि समवलोकय सम्यक् पश्य । समुच्चयालंकारः । वसन्ततिलक वृत्तम् ॥ ३७ ॥ शरदि भवः शारद शशाकः इन्दुः स इव धवलानि बालव्यजनानि चामराणि हस्ते येषा तादृश्य. । मणिमरीचिभि मुकुटस्थरत्नकिरणैः रचिता इन्द्रचापस्य भक्तिः सैस्थान यैस्ते तथाक्ता । पूर्वं कायस्य पूर्वकायः । भक्त्या नमित पूर्वकायः येषा ते तथास्ता । मतङ्गदेवादय. पूर्वं राज्यापहारे प्रवृत्ताः प्रधानवैरिणोपि प्रणमन्ति किमु वक्तव्यमितरे । एव ते सुप्रतिष्ठित चक्रवर्तित्वमिति भावः । किं ते भूयः प्रियमुपकरोमि इत्यनेन काव्यसंहारलक्षणमुपक्षिप्तम् । त्रातोयमिति । "अय शङ्खचूड" पतगपतिभयात् त्रातः रक्षितः । वैनतेयः गरुडः विनीतः विनय प्राप्तः । हिंसाया निवृत्त इत्यर्थः । ये विषधरपतय. तेन प्राक् पूर्वं भक्षितास्ते सर्वेपि जीविताः । मत्प्राणाप्त्या मम जीवितलब्ध्या गुरुभिः पित्रादिभिः असव. प्राणाश्च न मुक्ताः त्यक्ताः । चक्रवर्तित्व चाप्तम् । हे देवि अम्बिके त्व साक्षात्प्रत्यक्षतया दृष्टा । योगिनामपि दुर्लभ निःश्रेयसप्रद जगन्मातुस्तव दर्शन

अपि च । (एते शारदशशाङ्कधवलचामरव्यजनहस्ता मणिमरीचिरचितेन्द्रचापभक्तयो भक्तिनमितपूर्वकाया. प्रणमन्ति त्वा मतङ्गादयो विद्याधरपतयः ।) तदुच्यतां किं ते भूयः प्रियमुपकरोमि ।

१४३ नाय० — अतः परमपि प्रियमस्ति ।

जातोऽयं शङ्खचूडः पतगपतिरयं वैनतेयो विनीत-
स्तेन प्राग्भक्षिता ये विषधरपतयो जीवितास्तेऽपि सर्वे ।
मत्प्राणाप्त्या च मुक्ता न गुरुभिरसदृश्चक्रवर्तित्वमाप्तं
साक्षात्त्वं देवि दृष्टा प्रियमपरमतः किं पुनः प्रार्थ्यते यत् ॥ ३८ ॥

तथापीदमस्तु । (भरतवाक्यम् ।)

वृष्टिं हृष्टशिखण्डिताण्डवभृतो मुञ्चन्तु कालेऽम्बुदाः
कुर्वन्तु प्रतिरूढसंततहरिच्छस्योत्तरीयां क्षितिम् ।
चिन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानसै-
र्मोदन्तां सततं च बान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः ॥ ३९ ॥

(इति निष्क्रान्ताः सर्वे ।)

॥ इति पञ्चमोऽङ्कः ॥

॥ समाप्तं चेदं नागानन्दं नाम नाटकम् ॥

---

१ एते मत्प्रचोदिताश्चटुलचूडामणिमरी०. २ मन्ति नमन्ति च मतङ्गहतका०. ३ हरामि. ४ भुजगे०. ५ मुखात्. ६ निमुक्ता. ७ त्वत्तस्त्व. ८ प्रार्थ्यते किं मया. ९ भर्तः; कृते. १० काले किरन्त्वम्बुदाः. ११ घनाः. १२ कुर्वन्तः. १३ घनबद्धा०. १४ श्रीहर्षकृतौ नागानन्दनाटके जीमूतवाहनजीवनो नाम पञ्चमोऽङ्कः ।.

अपि च ।

शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ॥

सर्वजगतां शिवं कल्याणमस्तु । भूतगणाः प्राणिसमूहाः । सर्वे प्राणिन इत्यर्थः । परहितनिरताः परहितैकपरा भवन्तु । दोषाः—कामः क्रोधो मदो मानः पैशुन्यं परिवादिता । लोभाहंकारनैर्घृण्यदम्भा दोषा दश स्मृताः ॥ इत्युक्ताः नाशं प्रयान्तु । लोकः सर्वत्र सर्वविषये सुखी भवतु ॥

And moreover, here the Vidyadhara-chiefs, Matanga and others bow down to you, having in their hands chowries white as the autumnal moon, producing shapes of a rainbow by the rays of the jewels, and bending the fore-parts of their bodies in devotion Tell me, now, what other favour should I show you?

HERO—Is there any favour other than this?

This Shankhachuda has been saved from the fear of the king of birds, the son of Vinata (i e Garuda) has been humbled, all the serpent-lords, devoured by him before, have been revived, my parents too did not give up their lives as I regained life, I have obtained the sovereignty, and O Goddess, I have seen you in person, what desire other than this should be prayed for? (38)

Yet, let there be this (*Bharatvakya*)

May the clouds pour down the showers at the proper time, making the peacocks dance with joy and make the earth covered with a veil of continuous green crops growing up, and may the subjects performing (Lit collecting) religious acts, free from calamities and with minds bereft of jealousy, rejoice for ever in the delightful association of their friends and relatives (39)

(*Exeunt all*)

END OF ACT V

जातमित्यर्थः । किं पुनः अतः अपर प्रिय अस्ति यत्प्रार्थ्यते मया याच्यते । न किमपि प्रार्थनीयमवशिष्टमिति भावः । काव्यलिङ्गम् । स्रग्धरा वृत्तम् ॥ ३८ ॥ भरतस्य प्रधाननटस्य वाक्य भरतवाक्यम् । नाटकसमाप्तौ नटेन आशीर्दीयते तत्प्रतिपादक वाक्यम् । प्रस्तावनानन्तर नटवाक्याभावादिद भरतवाक्यमित्युच्यते । वृष्टिमिति । अम्बुदा मेघाः हृष्टाना वृष्ट्या जातदर्पाणा शिखण्डिना मयूराणा ताण्डवं नर्तनं कुर्वन्तीति तथा सन्तः काले योग्यसमये वृष्टिं मुञ्चन्तु । तथा च प्रतिरूढमुत्पन्नं सततमविच्छिन्नं यद् हरिद् हरिद्वर्णं सस्यं धान्यादि तदेव आवरकत्वादुत्तरीयमुपरिवस्त्रं यस्याः तादृशीं क्षितिं भूमिं कुर्वन्तु । अपि च निर्गतः मत्सरः येर्म्यस्तानि निर्मत्सराणि तैः मानसैः सुकृतानि पुण्यकर्माणि चिन्वाना कुर्वत्य । अत एव वीता निर्गता विपद् यासा ता वीतविपदो निरापदः प्रजा.। बान्धवानां भ्रात्रादीनां सुहृदा मित्राणा च गोष्ठीषु मेलनेषु प्रमोदो यासां तादृश्यः। सततं मोदन्ता हृष्यन्तु। अत्र आशीर्नाम नाट्याङ्गमुक्तम्। क्रियासमुच्चयश्च। शार्दूलविक्रीडितं वृत्तम् ॥ ३९ ॥ इति श्रीनागानन्दटीकायामर्थबोधिन्यां पञ्चमोऽङ्कः ॥

NOTES

ACT I

नागानन्दम्-नागानाम् आनन्दः यस्मिन् or नागानाम् आनन्दः नागानन्दः. Then the word may be metaphorically identified with the drama which tells us how the Nāgās were pleased As now it becomes the adjective of the word नाटकम् which is neuter we get नागानन्दम्.

Verse (1) *Construe.*—ध्यानव्याजम् उपेत्य कां चिन्तयसि। चक्षुः क्षणम् उन्मील्य इम अनङ्गशरातुर जन पश्य, त्राता अपि नो रक्षसि, मिथ्याकारुणिकः असि, कुतः त्वत्त· निर्घृणतरः अन्यः पुमान्, इति मारवधूभि· सेर्ष्यम् अभिहितः बुद्धः वः पातु।

